602 C

602c

Incomplete

C

Nirṇayasindhu III	Title
Kamalākara	Author
	Editor
	Year, Vols.
	Publisher
602c Begins Abruptly	Remarks

E.I.2112.71

श्रीगणेशाय नमः ॥ अथ त्रिकशांतिः। शांतिसारे। सुतत्रये सुता चेत्स्यात्तत्त्रये वा सुतो यदि। मातापित्रोः कुलस्या
पि तदा दिष्टं महद्भवेत्। ज्येष्ठनाशो धने हानिर्दुःखं वा सुमहद्भवेत्। जातस्यैकादशाहे वा द्वादशाहे शुभे दिने। आचा
र्यमृत्विजो वृत्वा ग्रहयज्ञपुरःसरं। ब्रह्मविष्णुमहेशेंद्रप्रतिमाः स्वर्णतः कृताः। पूजयेद्धान्यराशिस्थकलशो
परि शास्त्रतः। पंचमे कलशे रुद्रं पूजयेद्रुद्रसंख्यया। रुद्रसूक्तानि चत्वारि शांतिसूक्तानि सर्वशः। आचार्यो जु
हुयात्तत्र समिदाज्यतिलांश्चरुं। अष्टोत्तरसहस्रं वा शतं वाष्टाविंशतिं। देवताभ्यश्चतुर्वक्त्रादिभ्यो यतः परं सरं।
ब्रह्मादिमंत्रैरिंद्रस्य यत इंद्र भयामहे। ततः स्विष्टकृतं हुत्वा बलिं पूर्णाहुतिं ततः। अभिषेकं कुटुंबस्य कृत्वा चार्यं
प्रपूजयेत्। हिरण्यधेनुरत्नानि ऋत्विजां दक्षिणा ततः। आज्यस्य वीक्षणं कृत्वा शांतिपाठं तु कारयेदिति। अन्ये
पुत्रकादिकृच्छ्रे पुंशांत्यादिप्रयोग पारिजाते ज्ञेय। मिताक्षरायामप्युक्तं। रक्षणीया तथा षष्ठी निशा तत्र वि
शेषतः। रात्रौ जागरणं कार्यं जन्मदानां तथा बलिः। पुरुषाः शस्त्रहस्ताश्च नृत्यगीतैश्च योषितः। रात्रौ जागरणं कु

नि॰सि॰त॰ र्युदशम्यां चैव सूतके। व्यासः। सूतिकावासनिलया जन्मदा नाम देवताः। तासां यागनिमित्तं तु शुद्धिर्जन्मनि। कीर्तिता।
प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा। त्रिष्वेतेषु न कुर्वीत सूतकं पुत्रजन्मनि। अपरार्के ब्राह्मे। कन्या[illegible]ने[illegible]राकाया
जातश्चौरैव पंचमी। क्रीडनार्थी च बाळानां षष्ठी च शुशिरक्षणी। खड्गे तु पूजनीया वक्ष्ये चैव स्थापि[illegible]मः। राका
कुमतिः सिनीवाली कुहूरिति च तस्य। कन्यारसस्थेऽर्कः। अथ दत्तकपुत्रपरिग्रहविधिः। पा[illegible] शौनकः। अपुत्रो
मृतपुत्रो वा पुत्रार्थं समुपोष्य च। वाससी कुंडले दत्त्वा उष्णीषं चांगुलीयकं। बंधूनन्नेन संभोज्य ब्राह्मणांश्च विशेष
तः। अन्वाधानादि यत्तंत्रं कृत्वाज्यभागांतकं। दातुः समक्षं गत्वा तु पुत्रं देहीति याचयेत्। दाने समर्थो दाता
स्मै ये यज्ञेनेति पंचभिः। देवस्य त्वेति मंत्रेण हस्ताभ्यां परिगृह्य च। अंगादंगेत्यृचं जप्त्वा आघ्राय शिशुमूर्ध
नि। गृहमध्ये तमाधाय चरुं हुत्वा विधानतः। यस्त्वा हृदेत्यृचा तुभ्यमग्ने चैकया। सोमो ददद् इत्येताभिः प्रत्यृ
चं पंचभिस्तथा। स्विष्टकृदादि होमं च हुत्वा शेषं समापयेत्। ब्राह्मणानां सपिंडेषु कर्तव्यः पुत्रसंग्रहः। तद

भावेऽसपिंडे वाऽन्यत्र तु न कारयेत्। मिताक्षरादौ तु व्याहृतिभिराज्यहोम उक्तः। तत्रैव वसिष्ठः। न त्वेवैकं पुत्रं
दद्यात्प्रतिगृह्णीयाद्वा। न स्त्री पुत्रं दद्यात्प्रतिगृह्णीयाद्वा अन्यत्रानुज्ञानाद्भर्तुरिति। एवं तु समंत्रकहोमस्य पु
त्रप्रतिग्रहांगत्वात् ब्रह्मचर्यादिमंत्रपाठे च स्त्रीशूद्रयोरनधिकारात्तयोर्दत्तकः। पुत्रो न भवत्येवेति शुद्धिविवेके रुद्रध
रेणोक्तं। तन्न। मूलं तु मृग्यं। [illegible]पि प्रतिग्रहोक्तेः। यद्यपि मेधातिथिना भार्या न दद्[illegible]रूपदत्तकत्वे हो
मसाध्यमुक्तं। स्त्रियाश्च होमासंभवस्तथापि ब्राह्मणादिद्वारा होमादिकारयेदिति हरिनाथादयः। सबध
तत्रैवं। एवं शूद्रस्यापि स्त्रीशूद्राश्च सधर्माण इति स्मृतेः। अतः शूद्रकर्तृकहोमोऽपि [illegible]द्वारे एव परा
शरेणोक्तः। दक्षिणार्थं तु यो विप्रः शूद्रस्य जुहुयाद्धविः। ब्राह्मणस्तु भवेच्छूद्रः शूद्रस्तु ब्राह्मणो भवेत्। अ
त्र माधवाचार्याः। यो विप्रः शूद्राद्दक्षिणामादाय स्व[illegible]हविः शांतिपुष्ट्यादि[illegible]पादिकं मंत्रेजु

र्ण० तृती० होतितस्याविप्रस्येन दोषः। शूद्रस्तु होमपर्यन्तं लभेतैवेतिव्याचक्षते। मदनरत्ने विशेषः। कालिकापुराणे पितृगोत्रेण यः पु
त्रसंस्कृतः पृथिवीपते। आचूडांतं नपुत्रः स पुत्रतां याति चान्यतः। चूडोपायनसंस्कारा निजगोत्रेण वै कृताः। द
त्तायास्तनयास्ते स्युरन्यथा दास उच्यते। ऊर्ध्वं तु पंचमाद्वर्षान्न दत्ताद्याः सुता नृप। गृहीत्वा पंचवर्षीयं पुत्रे
ष्टिं प्रथमं चरेदिति। अथ यमयोः संस्कारक्रमो ज्येष्ठकनिष्ठभाव उच्यते। मनुः जन्मज्येष्ठेन चाह्वानं सुब्रह्मण्यास्व
पि स्मृतं। यमयोश्चैव गर्भेषु जन्मतो ज्येष्ठता स्मृता। देवलोपि। यस्य जातस्य यमयोः पश्यंति प्रथमं मुखं। स
तानः पितरश्चैव तस्मिन्ज्यैष्ठ्यं प्रतिष्ठितं। भागवतेतु। श्रौतदाभवलोगर्भौ सूतिर्वै शास्त्रविपर्यया। विसुते पश्य
ऊ स्नतस्य ज्येष्ठ्यमुक्तं। अत्र देशाचारतो व्यवस्था। अथ तैलिकास्नानं। ज्योतिषे। कौ[illegible] मौग्यानि कासा
वास मैत्रे दावाश्विध्रुवतेज्यपुसा। तिथावरिक्ते शुभमामनंति सूतिकास्नानविधौ मुनींद्राः। अथ दानन
म। मदनरत्ने बृहस्पतिः। द्वादशे दशमे वापि जन्मतोपि त्रयोदशे। षोडशे विंशतौ चैव द्वात्रिंशे वर्णतः क्रमात्।

याज्ञवल्क्यः। अहन्येकादशे नाम। होमोक्तोपि विष्णुः। नामधेयं दशम्यां तु द्वादश्यां मासिके वा न। अष्टादशेहनि तथा
वदंत्यन्ये मनीषिणः। दशम्यामतितायामिति शेषः। आशौचापगमे नामधेयमिति विष्णूक्तेः। गतं परिशिष्टे[illegible] तन्नाड
शरात्रे ऽथ शतरात्रे संवत्सरे वा नामकरणं। व्युष्टे तीते ज्योतिर्निबंधे गर्गः। अमासंक्रांतिविष्ट्यादौ प्राप्तकालेपि नाच
रेत्। श्रीधरः। मित्रादितिसमपौष्णत्राशतभिषक्स्वातीधनिष्ठाच्युतभाजे शाश्विशशांके पौष्ट्य दिने रूरसु[illegible] शुराशौ
स्थिरोत्थिज्ञाप नंद शीलिं विहाय नवमीं शुद्धे मभोगेवज्ञाचार्यास्तपादभागादिवसे नामानिकुर्यात्। शिष्टाः। मनुः। श
र्मांतं ब्राह्मणस्य स्याद्वर्मांतं क्षत्रियस्य तु। वैश्यस्य धनसंयुक्तं शूद्रस्य प्रेष्यसंयुतं। मदनरत्ने नारदीये। सूतकांते
नातकर्म विधेयं स्वकुलोचितं। नामपूर्वं तु मासस्य मंगलं ससमाक्षरैः। तत्रैव गार्ग्यः। मासनाम[illegible]नाम दद्यात्कृस्य
वैपितः। कृष्णोनंतोच्युतश्चक्री वैकुंठोथ जनार्दनः। उपेंद्रो यज्ञपुरुषो वासुदेवस्तथा हरिः। योगीशः पुंडरीकाक्षो मासना
मान्यनुक्रमात्। अत्र मार्गशीर्षादिश्चैत्रादिर्वा क्रम इति मदनरत्ने। तन्मासनामप्रथमं दद्यात्तेन वृष्ण्यैव
देवाश्रयगणाश्चानारक्षाणां वापि रूपयोः। सर्वापणानांपरस्यानोचित्रार्थं योषितं रणं। कौच्यादीनांक

शीनां च पुष्यादीनां च सर्वशः। राजश्रासादशास्त्ततो नाम कर्म विशिष्यते। नाक्षत्रमपि नाम कार्यं। अभीचादनो
यन समीक्षेत तन्मातापितरौ विद्यालामोपनयनो दित्याश्वलायनोक्तेः। लक्षन क्षत्र पा [illegible] त्याक्षरं कुर्यादि
त्युक्तं परिशिष्ये। तदक्षरादिकं नाम यस्मिन्नभिष्याय पदक्षर मिलि। सुदर्शनभाष्ये तु रो [illegible] विषुवद्वीरा
दौ ठासे चैत्राया अश्व गशाश्वयुक्तः शेपषुनाध्यो कृपरःमर। तः स्वाधारदीप सौवित्सग इच्छः। इत्युत्तमत्वायति पोच
पदे तत्रादौ ठासरे च वृद्धिः। प्रोष्ठपादौ शति। अत्समप भरणी शब्दः। श्रुतावुक्तः। श्रवणे दोच पादि वृद्धिः। अपभर
णः अपभरण इत्यादि। मदनरत्ने वसिष्ठः। जन्मा हेमाद्रौ दशाहे वा दशाहे वा विशेषतः। उत्तरा रेवती हस्तमृ
पंक्ति पुष्याः सवारुणाः। श्रवणादितिमैत्रं च स्वाती मृगशिरस्तथा। जाजापत्यं धनिष्ठा च प्रशस्ता नामकर्म
णि। अथ खट्वारोहः। पारिजाते बृहस्पतिः। खट्वारोहस्तु कर्तव्यो दशमे द्वादशेपि वा। षोडशे विंशसे चापि द्वाविंश
दिवसेपि वा। ज्योतिर्निबंधे। करत्रये वैष्णवरोहवतीषु दितिद्वये श्वाश्विनके ध्रुवेषु। अथ कर्णवेधः। मदनरत्ने
वसिष्ठः श्रीधरो कुर्यात्शिरनान्ते पते श्वन्ति याग्रस्यप्रशस्यते दद्दा दोल्ले वैसुरिकेनो भवति। तत्र पञ्चौ दो

लायने पुंसो द्वादशो दिवसः शुभः। त्रयोदशस्तु कन्याया न नक्षत्रविचारणा। अन्यस्मिन्दिवसे चेत्स्यात्तिर्यगास्ये प्रशस्यते। अ
थ दुग्धपानं। नृसिंहः। एकत्रिंशदिने चैव पयः संखेन पाययेत्। अन्नप्राशन नक्षत्र दिवसोदयराशिषु। अथ कर्णवेधः। मदनरत्ने
वसिष्ठश्रीधरौ। मासे षष्ठे सप्तमे वाष्टमे वाथ व्याकर्णौ द्वादशे षोडशे हि। मध्ये नाने पूर्वभागेन रात्रौ नक्षत्रे चेद्दत्ते थीवजापिता।
अथ जन्ममासे तु ज्यो- ज्योतिर्निबंधे गर्गः। मासे षष्ठे सप्तमे वाष्टमे मासि वत्सरे। कर्णवेधं प्रशंसन्ति पुष्ट्यायुः श्रीविवृद्धये। मदन
रत्ने प्रथमे सप्तमे मासि अष्टमे दशमेथवा। द्वादशे च तथा कुर्यात्कर्णवेधं शुभावहं। हेमाद्रौ व्यासः। कार्त्तिके पौषमासे वाप्य
चैत्रे फाल्गुनेपि वा। कर्णवेधं प्रशंसन्ति शुक्लपक्षे शुभे दिने। श्रीधरः। हरिहरकहृटचित्रासौम्यपौष्णोत्तरायादितिव
सुपुष्य घटात्सिंहवर्ज्येषु लग्नराशि गुरु बुधक काव्यानां दिने परर्युरिक्तां हरितिथिविषशुद्धे धने कर्णवे [illegible] मदनरत्ने बृहस्प
तिः। द्वितीया दशमी षष्ठी सप्तमी च त्रयोदशी। द्वादशी पंचमी शस्ता न्ततो या कर्णवेधने। सौवर्णी राजपु [illegible]। विप्रवैश्ययोः
शूद्रस्य चायसी सूची मध्यमा त्वष्टांगुलात्मिका। हेमाद्रौ देवलः। कर्णरंध्रे रवेश्छायानविशेदग्र [illegible] नः। तं दृष्ट्वा विलयं या
ति पुण्यौघाः पापपुनातनाः। शङ्खः। अंगुष्ठमात्र सुषिरौ कर्णौ न भवतो यदि। तस्मै श्राद्धं न दातव्यं दत्तं चेदासुरं भवेत्। अ
थ ताम्बूलभक्षणं। चंडेश्वरः सार्धमासद्वये दद्यात्ताम्बूलं त्रयमशिशोः। कर्पूरादिकसंमिश्रविन्यासाय। याहि लौ यन। न

मूलार्कचित्रकरतिष्यहरीन्द्रभेषु पौष्णेन था। मृगशिरोदितिवासवेषु। अर्केन्दुजीवभृगुवो पुनर्वासरेषु तांबूलभक्षणवि-
धिर्मुनिभिः प्रदिष्टः। अथ निष्क्रमणं। ज्योतिर्निबंधे यमः। तृतीये वा चतुर्थे वा मासि निष्क्रमणं क्रिया। यमः। ततस्तृती-
ये कर्तव्यं मासि सूर्यस्य दर्शनं चतुर्थे मासि कर्तव्यं शिशोश्चंद्रस्य दर्शनं। अथ मंत्रः [illegible] [illegible] पा श्राद्धं न
निष्क्रमत्रिषु दुर्गपरिशिष्टात् दोषा नो निष्क्रमणे वृद्धिश्राद्धं नास्तीति कल्पतरुः। व्यासः। मैत्रपुष्यपुनर्वसुप्रथमभेषा
श्रवणेषु विधौ हस्ते चैव वसुरेवतीभेषु शस्तासु च। कुर्यान्निष्क्रमणं शिशोः बुधगुरोः शुक्रस्यापि च तिथौ। कन्या
कुंभतुलामृगादिभवने सौम्यग्रहालोकिते। मदनरत्ने। अन्नप्राशनकाले वा कुर्यान्निष्क्रमणं क्रिया। दनी शानां दिनेत
त्रतथा चन्द्रार्कयोर्द्विजः। प्रतनं वासुदेवस्य गगनस्य च कारयेत्। बहिर्निःकाशयेद्गृहाच्छंखपुण्याहनिस्वने। चन्द्र
कयोर्दिग्गीशगनो दिशां च गमनस्य च। निक्षेपार्थमिमं दद्यि ते मे रक्षेतु सर्वदा। अप्रमत्ते प्रमत्ते च [illegible] दिवारात्रमथापि वा।
रक्षंतु सततं सर्वे देवाः शक्रपुरोगमाः। अथोपवेशनं। प्रयोगपारिजाते पापे विष्णुधर्मे च। पंचमे च तथा मासि भूमौ
तमुपवेशयेत्। तत्र सर्वे ग्रहाः शस्ता भौमोप्यत्र विशेषतः। उत्तरात्रितयं सौम्यपुष्यर्क्षं शुक्रदेवतं। प्राजा

पत्यं च हस्तश्च शस्तं भूमिन्निवेशने। वाराहे पञ्जयेदेवं पृथिवीं च सदा द्विजः। रक्षैनं वसुधे देवि सदा सर्वगतं शुभा।
आयुः प्रमाणं सकलं निक्षिपस्व हरिप्रिये। अचिरादायुषस्तस्य ये केचित् परिपंथिनः। जीवितारोग्य [illegible] च सुनिर्दह सर्वं चिर
ंतनान्। नेरण्यशेषभूतानां मातात्वं मासि कामदे। अजरा च अमे पापा च सर्वभूतनमस्कृता। चरसचराणां भूतानामत्र
तिष्ठन्त्यास्य यास्यसि। कुमारं पाहि मातस्त्वं ब्रह्मा तदनुमन्यतां। अथान्नप्राशनं। पारिजाते नारदः। जन्मतो मासि षष्ठे
स्यात् सौरेणान्नाशनं परं। तदभावे त्वष्टमे मासि नवमे दशमेपि वा। द्वादशे वापि कुर्वीत प्रथमान्नाशनं परं।
संवत्सरे वा संपूर्णे केचिदिच्छंति पंडिताः। मदनरत्ने लौगाक्षिः। षष्ठेन्नप्राशनं। जातेषु दंतेषु चेति शंखः।
संवत्सरेन्नप्राशनमर्धसंवत्सरे इति नारदः। षष्ठे वाप्यष्टमे मासि पुंसां स्त्रीणां तु पंचमे। सप्तमे मासि वा कार्यं नवान्न
प्राशने शुभं। रिक्तादिनक्षयं नंदां द्वादशीमष्टमीमिमां। त्यक्त्वान्यतिथयः प्रोक्ताः सितजीव [illegible] च सोमाः। चंद्रता
रे वा प्रशंसति [illegible] बुधे चापि। त्रिकेविनुः श्रीधरः। आर्द्रादित्यतिष्यवसुसौम्यकरानिलाश्विचित्राविनुः पुनर्वसुरूणांत्यरपौष्णमे
त्राः। बालकान्नभोजने विधौ दशमवित्यष्टहे स्थितावविहायनवमीतिथयः शुभाः स्युर्वसिष्ठः। बालकान्नभुक्तौ प्रत्नवे

धनेन राज्याभिषेके रव्यनुजन्मधिष्ण्ये। शुभं लग्नमिच्छंस्तत्ते विवाहे सीमंत यात्रादिषु मंगलेषु मार्कंडेन विप्रधर्मे याः
ब्रह्माणं शंकरं विष्णुं चन्द्रार्कौ च दिगीश्वरान्। भुवं दिशश्च संपूज्य हुत्वा चक्रे तथाग्नये। स्वतापुनस्तस्य पा
श्रुत्वा गणतस्य च। अब्दकृत्यं दास्य दातव्यमन्नं पात्रे सकांचने। मध्वाज्यदधिसंयुक्तं आशापसा[illegible]चेति। अथा
ब्दपूर्तिः व्यवहारनिर्णये। ननावरधरो मत्वा पूजयेच्चिरायुयुषं। मार्कंडेयं नरो भक्त्या पूजये प्रयतस्तथा। न तो दी
र्घायुषं व्यासं रामं द्रौणिं कृपं बलिं। प्रह्लादं च हनूमंतं विभीषणमथार्चयेत्। स्वनक्षत्रे च जन्मतिथि प्राप्य संप्रकु
र्यात्। पक्षी च दधि भक्ते च वर्षे वर्षे पुनः पुनः। तिथितत्त्वे हेमाद्रौ भविष्ये हेमाद्रौ पृथ्व्यां। आदिपुराणे। सं
वत्सरे जन्मदिने स्नात्वा मंगलवारिभिः। गुरुदेवाग्निविप्रांश्च पूजनीयाः प्रयत्नतः। स्वनक्षत्रं च पितरो तथा
देवं प्रजापतिं। प्रतिसंवत्सरं यत्नात्कर्तव्यश्च महोत्सवः। कृत्यचिंतामणौ। गुडउदधाति क्षीरं दद्याद्धस्तेन यो नु च
धयेत्। गुरुकेनिवसि द्रार्थ हूर्वा गोरोचनादिकं। संपूज्य भानुविघ्नेशौ महर्षिं ज्ञाथी यदि दोः चिरजी

यथा त्वं भोल मनिष्यामि तथा मुने। रूपवान वित्तवांश्चैव श्रीयायुक्तश्च सर्वदा। मार्कंडेय नमस्तेऽस्तु सप्तकल्पांतजीव
न। आयुरारोग्यसिद्ध्यर्थमस्माकं वरदो भव। सतिकं गुडसंमिश्रं मंजन्यर्धं मितं पयः। मार्कंडेयवरं लब्ध्वा पिबामि आयु
षे स्तु च। इति पयः पिबेत्। तिथितत्त्वे स्कांदे। खंडनं नखकेशानां मैथुनाध्वम मीतथा। आमिषं कलहं हिंसा वर्षवृद्धौ
विवर्जयेत्। तत्रैव नदी तिथिकृत्ये। कृत्तात कुजयोर्वा रिक्ता यस्य जन्मतिथिर्भवेत्। अन्त्ये क्षयोगसप्राप्तौ विघ्नं तस्य पदे
पदे। कृतांतः शनिः। तस्य संप्रधिस्याने गुरुदेवाग्निपूजनं। वृद्धमनुः। स्वतेऽजन्मनि संक्रांतौ श्राद्धे जन्मदिने दिने त
था। अस्पृश्यस्पर्शने चैव न स्नायादुष्णवारिणा। भ्राज्ञजन्मतिथिरौदयिकी ग्राह्या। युगाद्यावर्षवृद्धिश्च सप्तमी पार्व
तीप्रिया। रवेरुदयमीक्षंते न तत्र तिथियुग्मते। तिकृत्य तत्र पाणि वचनात्। अथ कटिसूत्रं। भवोद्यपारिजाते जाले
शलिसंवत्सरे तत्क्षेवि स्पेन्दर्णा विधिपरा। दत्वा गोभूहिरण्यादि तथा स्वर्णादिनिर्मितं। अत्र वा कटिसूत्रं नल
वासः संगत्पर्नतत। दूर्वां कुर्वस्तथाज्येन चरुणा वापि नाकिनः। आयुष्यमाहस्तूला च तत्पदं परि देयतां। अथ नोल
प्रयोगपारिजाते पदुरात्रिशिष्य जातानां कारान्नमादित्तीयेब्दे तु चौलकं। आ द्वितीयेपंचते के चित्पंचमे दृढि

तीर्थके । उपनीयास्य सहैवेति विकल्पाः कुरु धर्मतः । बृहस्पतिः तृतीये तु शिशोर्गर्भाज्जन्मतो वा विशेषतः । पंचमे स
प्तमे वापि जन्मतो मध्यमं भवेत् । अधमं गर्भतः स्यात्तु नवमैकादशेपि वेति । पारिजाते तु [illegible] । उत्तरायणगे
सूर्ये । विशेषात् सौम्यगोलके । शुक्लपक्षे शुभं प्रोक्तं कृष्णपक्षे शुभेतरत् । अत्र तु [illegible] कृष्णपक्षे
त्रिधा कृते । तत्रैव वसिष्ठः । रवेरंगारकस्यैव सूर्यपुत्रस्य चैव हि । निंदिता दिवसाः क्षौरे शेषाः कार्यकराः
शुभाः । ज्योतिर्निबंधे बृहस्पतिः । पापग्रहाणां वारादौ विप्राणां शुभदं रवेः । क्षत्रियाणां क्षमासूनोर्विट्
शूद्राणां शनेः शुभं । हस्तात्रिवि विष्णुपौष्णश्रविष्ठादितिपुष्यभाः । सौम्यचित्रे नेन नक्षौ उच्चमानं नतारकाः ।
ज्येष्ठोत्तराणि वायव्यं रोहिणी वारुणं तथा । क्षौरे षण्मध्यमाः प्रोक्ताः शेषा द्वादश गर्हिताः [illegible] जन्मन
क्षत्रे चैव नाशो च द्रुमो ह्यमे । विपत्करे न घे क्षौरं प्रत्यरे च विवर्जयेत् । अत्र लग्नशुद्धिरन्याच योगाः ज्योति
र्निबंधे ज्ञेयाः । अन्ये च विशेषाः श्मश्रुकर्मनिर्णये वक्ष्यंते । अत्र च शिशोर्मातरि गर्भिण्यां न कार्यं । स

दाह ज्योतिर्निबंधे मदनरत्ने च [illegible] गार्ग्यः । पुत्रचूडाकृतौ माता यदि सा गर्भिणी भवेत् । शस्त्रेण मृत्युमाप्नोति तस्मा
त्क्षौरं विवर्जयेत् । अस्यापवादमाह तत्रैव नारदः । सूनोर्मातरि गर्भिण्यां चूडाकर्म न कारयेत् । पंचमा[illegible] त्प्राग् ऊर्ध्वं तु गर्भि
ण्यामपि कारयेत् । यदि गर्भविपत्तिः स्याच्छिशोर्वा मरणं यदि । सहोपनीतौ सा कुशा चेत्तदा पदोषो [illegible] । बृहस्पतिः ।
गर्भिण्यां मातरि शिशोः क्षौरकर्म न कारयेत् । व्रताभिषेकेप्यनेकाकोदने ब्रूतेप्वपि । गर्भिण्यामपि पंचमास पर्यंत
न दोष इत्युक्तं स्मृतिदीपिकायां गर्गेण पंचममासात् पंचममासादूर्ध्वं मातुर्गर्भस्य जायते मृत्युरिति । मदनरत्ने बृहस्पतिः
पुत्रचूडाकृतौ माता गर्भिणी यदि वा भवेत् । विद्यते गुरुरत्रेदं प्रतिशिशुदरक्षुलः । भ गर्भे मातुः कुमारस्य न कुर्याच्चौ
लकर्म तु । पंचमासादधः कुर्यादत ऊर्ध्वं न कारयेत् । गर्भे । ज्वरस्यापादने यस्य लग्नं वा तस्य न कारयेत् दोष[illegible] गमनात् स
ख्यां तं रक्षां धर्मं समाचरेत् । लग्ने मिति मृगक्कोपलक्षण ज्योतिर्गर्गः । विवाहोत्सवयात्रा च मातुर्यदि रजस्वला । तदा
सम्यक्तु मन्यो तिपंचमे दिवसे विना । वसिष्ठः । यस्य मांगलिकं कार्यं तस्य माता रजस्वला । [illegible] तदेव । तत्रैव बृहस्प
त्याप्त गार्ग्य मध्यदपश्चाद्दं पुत्रसंस्कारकर्मणि । पत्नी रजस्वला चेत्स्यात्तं कुर्यात्सितात् [illegible] दा । मितेति कृत्वा मात्रोपनयने ।

संकटेतु वाक्यसारेउक्तं। अलाभे स्वकर्म हर्तु स्यरजो दोषहत परिस्थिते। श्रीधरसंग्रह्यविधिनत्तो मे गाक्रमालरेत। स्वकृ
त मंडनो न रनेकार्यं। नमंडना। चापि हितेंडुने च गोत्रैकता या। यदि नाद्य भेदरतिमरदनरत्नपसिद्धो तो मंत्रेकलायनम
सत् कुले वेत्र पादवो श्मंडनाच्चुलुमुंडनं। प्रवेशानि गोमाने छोनकुर्यान्मगकत्रयं। चक्रमनु। [illegible] कय स्त्रं दपु
रुषस्त्रियाः। नसमानक्रियाकुर्यीमात भेदेवि धीयते। आमोचलुसंग्रहे। सकळसमनु प्राप्ते स्वत्वकेसंलिपागते। कृष्ण
दीभिधतं तुला गोवरद्यापयस्त्विरे। हे डाप कायनोद्धा हर्म्यदिक्षादि कमाने रेक्षुदिति। अन्यो तिनिर्बंधापछे दक्षाउशे
ष विवाहे कृत्य वन। अंतर्वत्न्यां रजायायां नेष्यते मंडनक्रिया। अन्याविशेषाणि हाचनकरणं वृक्ष्यते दीपका
यानरजउजन्म भाग्ययदारूपणेषु रानौकुजे। प्रतिपदृत्तरिक्तासुविद्यारंभस्तुपवने। प्रयोगरत्ने। मध्येशिर
सिरजोस्या न्मासिष्ठानां तु दक्षिणे। उभयोः पार्श्वयो रत्त्रैः कश्यपानां शिखामता। धमा [illegible] नेष्य वे। आपस्तंब
स्वाहा। तद्ग्रोत्रे शानिनीत्यय थापि शिरखानि दधाति। यथर्षिप्रवरसंख्यया। तासां मध्यशिखा वर्जं उपनयने
वपनं कार्यं। वतिरिशंयन पा। निउपनयने तेवेवो कः रिक्तो वापयेत्वा न पिरिता यनु [illegible] स्तस्येत दपि धार्यं।

षि रेवतिग्रुले विशिखस्याद्धुपवीत कृत्यकरतिनतत्र लमितिनेषधाच। सत्रेतु विवनात्सशिखेष्य पनमितितस्कंदशं
नभौष्यउक्तः। यत्तु कुमारादि। शिखा इवेतिल्लिगं तच्चेदोगपरं। अपरार्के मदनरत्ने च लौगाक्षिः। दक्षिणमेतः कुमेत्रा व
सिष्ठ। नाभ्रुभयतो त्रिककश्यपासु उाम्रगर्गपंचरुडा अंगिरसः। वाजि मेकमेगरू मंसी [illegible] भावुकधमिव
कमुवमशिखावाजिः। एकशपीके स्वलिदपेण [illegible] शिखा दक्षिणतो नसिष्ठगोत्रस्य पंच गिरसां कृत्ये
लुने कः शिखाकश्यपज गोत्रजानां शिखोभय त्रापि यथाकुलं च। उ तच्च द्वातिरिक्तविषय १८ ड
स्यां स्यानि यता कविशर्व पार्श्विन सिष्ठाके। यत्तु पाने [illegible] शिखा सी नौ पत्नी सीस्यान्नो चरेत्स रूतां गिरमिति। एतद्
मुप कृष्या के तदस्य ऊरूच्य चेति नैचितः। विकल्प्य रलिलु युक्तं। अत एव हारितः स्त्री [illegible] शिखं कियो
क्रं पाद्धराम्य तापिवा। बाजाप संपकुर्यात्नो निस्मत्त रतिनान्यथा भवेत्। [illegible] स्य हेपश्रेअन्त्र
अंत्रवद्धु शेष्या श्रवस्थलिदिकः। न्यायातिनिर्बंधे। नर्मदोत्तरने शेलुसितस्त्वे दर्वमचिणिर अकर्मनकुर्याद्इति निषेधो
नास्ति दक्षिणे। अत्र भोजन प्रायश्चित्तमुक्तं पराशरमाधवीये। निवृत्ते रूड हेत्मेतु प्रानुगानकरणात्तथा

०पु० त०

चरस्तनपनं भु[illegible]ज्ञानकर्माणि नैवहि अतोन्येषां तु संस्कारेषु पवासेन शस्यानि इन्त संस्काराः स्त्रीणाममंत्रकाः । श्री
पी होमस्तु समंत्रक इति प्रयोगपारिजाते । आश्वलायनोपि होमकर्म सं तूष्णीं वल्स्या स्त्रीणां चूडाकर्मापि [illegible] । मनुरपि । अमंत्रिका तु का
र्येयं स्त्रीणामावृदशेषत इति ॥ होमोप्यमंत्र इत्येके । संस्काराः स्त्रीणां महोमकाः स्युः सर्वे स्युः शिलि सम् [illegible] । होमोनेति [illegible] ।
अथ विद्यारंभः । मदनरत्ने नृसिंहः । अक्षरस्वीकृतिं कुर्यात्प्राप्ते पंचमहायने । उत्तरायणगे सूर्ये भेकुंभे सविनश्च
यत् । दीपिकायां । नर्षेपर्जन्यकृकाकुष्ठीरिकोशनिकुजं । अनध्यायादि उत्तनत्ता द्वंगेथ रूतं गुरं । श्रीधरः । ह
स्तादिस समीरमित्र पुरुजित्सौस्याश्विधिषित्रान्युते धाराव येश्वादिनोदयादिरहितेराशौस्थिरे चोभये । पक्षेपूर्णे निशाकरेप्राप्ति
पदेरिक्ता विहायाष्टमीषष्ठीमप्यमस्तु हृष्ट्वा जिष्णु वनेप्सोर्काभार स्विडो ति । धिष्ण्यधर्मोत्तरे । पूजयित्वा हरिं लक्ष्मीं तथाद
वीं सरस्वतीं । स्वविद्यां सूत्रकारांश्च स्वां विद्यां च विशेषतः । एतेषामेव देवानां नाम्ना तु जुहुयात्[illegible]ता दक्षिणां भोजयेद्द्वि
जाणां कर्तव्यं चात्र पूजनमिति । अथ धनुर्विद्या । दीपिकायां । अदितिगुरुयमार्कस्वातिचित्रा[illegible]मैत्र्य भुवनहारेचस
र्वकेविंड भागात्यभेषु । शनिशनिकुजनारीविष्णु बोधे विपोषेसकसमयतिथयो गेचापविद्याप्रदाने । अथान्न

पनीतस्य विशेषः गौतमः । प्रागुपनयनात्कामचारवादभक्षारति । लक्षणं न्यशनादेरप्रीतिर्हरिदत्तः । अ
अपरार्के वृद्धशातातपः । शिशोरभ्युक्षणं प्रोक्तं बालस्याचमनं स्मृतं । रजस्वलादिसंस्पर्शे स्नानमेव कुमारके ।
प्राक्चूडाकरणाद्बालः प्रागन्नप्राशनाच्छिशुः । कुमारकस्तु विज्ञेयो यावन्मौंजीनिबं[illegible] । आपस्तंबः । प्राक्
बालस्या वापि अन्नप्राशनात्प्रयतो भवत्यासंवत्सरादित्येके । इति गौतमोपि । ननु उपस्पर्शनादशौचे । तस्या
नुपनीतस्य चेडाकादिस्पर्शस्यापिस्पर्शानस्नाने । इदं च षडब्दवर्षात्प्राक् [illegible] ऊर्ध्वं तु स्नानं भवत्येव बालस्य पंचमा
द्वर्षादिक्षार्थं शौचमाचरेदिति स्मृतेः । कामचारादिकेप्येवं । । अथोपनयनं । आश्वलायनः । गर्भाष्टमेष्टमे वाब्दे पंचमे सप्तमेपि वा । द्वि
जत्वं प्राप्नुयाद्विप्रो वर्षे त्वेकादशे नृपः ॥ मनुः । ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पंचमे । राज्ञो बलार्थिनः षष्ठे वैश्यस्यार्थार्थिनोष्टमे । वि
कुः । षष्ठे तु धनकामस्य विद्याकामस्य सप्तमे । अष्टमे सर्वकामस्य नवमे कांतिमिच्छतः ॥ आपस्तंबः । गर्भाष्टमेषु ब्राह्मणमुपनयीत ।
वंहृ[illegible] वचनं गर्भषष्ठगर्भसप्तमयोः प्राप्त्यर्थमिति सुदर्शनभाष्ये । केचित्तु विप्रस्य षष्ठमन्यंते । आपस्तंबः । अथ काम्यानि । सप्त
मे ब्रह्मवर्चसकाममष्टम आयुःकामं नवमे तेजस्कामं दशमेन्नाद्यकाममेकादश इंद्रियकामं द्वादशे पशुकाममुपनयेत् । गौण

कालमाह मनुः। आषोडशाद्ब्राह्मणस्य सावित्री नातिवर्त्तते। आद्वाविंशात्क्षत्रबंधोराचतुर्विंशतेर्विशः। ज्योतिर्निबंधे। अथवा द्विगुणो
कां वैश्यानां त्ववधेरूर्ध्वमब्दतः। अकृतोपनयाः सर्वे वृषला एव ते स्मृताः। गर्गः। विप्रं वसंते क्षितिपं निदाघे वैश्यं [illegible] व्रतिनं विदध्यात्। माघा
दिशुक्रांतिकपंचमासाः साधारणा वा सकलद्विजानां। हेमाद्रौ ज्योतिषे। माघादिपंचमासेषु मौंजी पं[illegible]। पारिजाते बृहस्पतिः।
क्षपयापकुलीरस्थो जीवोप्यशुभगोचरः। अतिशोभनतां दद्याद्विवाहोपनयादिषु। वृत्तशते। न जन्मधिष्ण्ये न च जन्ममासे न जन्मका
ली यदि न विदध्यात्। ज्येष्ठे न मासि प्रथमस्य सूनोस्तथास्कृताया। अपि मंगलानि। राजमार्तंडः। जातं दिनं दूषयते वसिष्ठोऽष्टौ च
गर्गो नियतं दशात्रिः। जातस्य पक्षं किल भागुरिश्च शेषाः प्रशस्ताः खलु जन्ममासि। जन्ममासे तिथौ भे च विपरीते दक्ष
सति। कार्यं मंगलमित्याहुर्गर्गभार्गवशौनकाः। जन्ममासनिषेधोपि दिनादित्रिशतं त्यजेत्। आरभ्य जन्मदिवसा
न्मासस्तु त्रिंशद्योपरे त्वन्यथान्तरे। व्रतजन्मरिकारिष्ठजीवोपीष्टौ च नात्र सत्कृत्। शुभे निकाके कृतुया[illegible]मचस्मै। द्विगुणाचेनाव।
शुद्धिर्नैव गुरोर्यस्य वर्षे प्राप्तेऽष्टमे यदि। चैत्रे मीनगते भानौ तस्योपनयनं शुभं। जन्मभाद[illegible]भे सिंहे नीचे वा शत्रुभे गुरौ।
मौंजीबंधः शुभः प्रोक्तश्चैत्रे मीनगते रवौ। नारदः। बालस्य बलहीनोपि शंस्यो जीवो बलक्रदः। यथोक्तवत्सरे कार्यमनुक्ते
वोपनायने। शांतिश्चाग्रे वक्ष्यते। ज्योतिर्निबंधे नृसिंहः। रतीयापंचमोषष्ठो द्वितीया वापि सप्तमी। पक्षयोरुभयोश्च

च विशेषेण सूर्यपूजिताः। धर्मिकामौ सितेपक्षे कृष्णे च प्रथमं तथा। शुक्ले त्रयोदशीं केचिदिच्छन्ति मुनयस्तथा। टोडरानंदे वसि
ष्ठः। नैमित्तिकमनध्यायं त्यजेच्च प्रतिपद्दिनं। मेखलाबंधने शस्तौ नोले वेदव्रतेष्वपि। पररुत्साहात्प्रतिपद्युक्तेन न पूर्वोपरसंयुते
प्रतिपत्तीनकार्येत्यत्वस्य वदोरुपनयनविषय। प्रशस्ता प्रतिपत्सर्वेक दाचिद्भगविधौ। चंद्र[illegible]वर्षाणम्
विलंघने। इति व्यासोक्तेरित्याहुः। नवसप्तम्यापि। तस्या गलग्रहत्वोक्तेः। बृहस्पतिः। शुक्लपक्षः शुभः प्रोक्तः। कृष्णश्चा
न्त्यत्रिकं विना। मिथुनस्थे स्थिते भानौ ज्येष्ठमासो न दोषकृत्। मदनरत्ने नारदः। विनर्तुनावसंतेन कृष्णपक्षे गलग्रहे। अ
अपराह्णे चोपनीतः पुनः संस्कारमर्हति। अपराह्णस्य धामकृद्दिनत्रसीयांशः इत्युक्तं। तत्रैव। वसंते गलग्रहे न दोषः
पाठैत्यर्थः। नारदः। कृष्णपक्षे चतुर्थी च सप्तम्यादिदिनत्रयं। त्रयोदशीचतुष्कं च अष्टावेते गलग्रहाः। वसिष्ठः।
मापाशापगते चंद्रेऽरिनीचस्थितेपि च। अनध्याये चोपनीतः पुनः संस्कारमर्हति। अन[illegible]यस्य पूर्वेद्युस्तस्यैव
चापरेऽहनि। ब्रह्मबंधविसर्गं च विद्यारंभं न कारयेत्। राजमार्तंडः। आरभ्यानंतरं यच्च प्रत्यारंभो न सिध्यति। गर्गः

दिमुनयः सेर्वंतमेवाहुर्गर्ग्यकाहं । ज्योतिर्निबंधे अष्टकासु च सर्वासु युगमन्वंतरादिषु । अनध्यायं प्रकुर्वीत तथा सो
पिपदास्वपि । सोपपदास्तु स्त्यर्थसेर । सिता ज्येष्ठे द्वितीया च आश्विने दशमी तथा । चतु[illegible]द्वादशी माघे एताः
सोमपदाः स्मृताः । एवं प्रदोषदिनं वर्ज्यं । प्रदोषस्वरूपमाह गोभिलः । षष्ठी च द्वादशी चैव अ[illegible]रात्रोननाडिका प्र
दोषमिह कुर्वीत त्वतीया त्वनयामिका । ज्योतिर्निबंधे व्यासः । याश्चैत्रवैशाखसिता तृतीया माघस्य सप्तम्यथ फाल्गुन
स्य । कृष्णे तृतीयोपनये प्रशस्ताः प्रोक्ता भरद्वाजमुनींद्रमुख्यैः । अत्रापि कृष्णग्रहणं पद्धत्येयं यत्तु स्तह प्राग्धि । अन
ध्यायेप्रकुर्वीत यस्तु नैमित्तिको भवेत् । सप्तमी माघशुक्ले तु तृतीया चाक्षया तथा । बुधत्रयं तु वाराश्च शस्ता
निबलवंधनहेति । मन्वाद्यपि तोपनयविषयं । साध्यापवियुजो पश्चाः कृष्णप्रतिपदादयः । प्रो[illegible]तेभित्ते
तु मेरवन्नावधनेमता । इति लैवैवोक्तेरिति निर्णयामृतकालादर्शौ । यद्यप्येतावेतस्ववस्ये सल्का अनि
रुक्तेपरिदानेकाकस्मिलोऽश्वकापनेतपुनरुपनयने काका नियम इति लुप्तुक्तो । गर्गः । गृहेरवीक्षेर

वनिप्रकंपे केतुधूमोल्कापतनादिदोषे । अतेदशाहानि वदंति तज्ज्ञास्त्रयोदशाहानि वदंति केचित् । सकृदेतु नंदेष्व
रः । द्वाहरिराशं च नधराप्रकंपे वज्रपाते थविदारणे च । केतौ तथोल्कास्तकरणप्रभाते त्र्यहं न कुर्वीत मंगलानि । तत्रैकं नंदव्रते
पनयने साध्यायाध्ययनेतथा । नदोषाययजुषां सोपपदास्वध्यय । नेपि च । हेमाद्रौ ज्योतिषे । हस्तत्रये पुष्य धनिष्ठयोश्चपौ
ष्णाश्विसौम्यादितिविष्णुभेषु । शस्तेतिथौ चंद्रबलेन युक्ते कार्यो द्विजानां व्रतबंधमोक्षौ । ज्योतिर्निबंधे [illegible] ज्यर्कच
र्यां चंद्रादिश्रुत्तराणि च । विष्णुत्रयाश्विमित्रो ज्येष्ठो योनिभागान्युपनायने । बृहस्पतिः । त्रिषूत्तरेषु रोहिण्यां हस्ते मैत्रे च वास
वे । त्वाष्ट्रे सौम्य पुनर्वस्वोरुत्तमं ह्युपनायनं । ज्योतिर्निबंधे । पूर्वाहस्तत्रये सार्प श्रुतिमूलेषु पूर्वह्णे । यजुषां सौम्यमैत्रादितिहस्त
मुष्यमृदुध्रुवैः । सामगानां हरौ शाक्रे च स्युः पुष्योत्तराश्विनेः । धनिष्ठादितिमैत्राश्विद्युपौष्णमथर्वणं । शाक्रमार्तंडमस्तु प्रशस्त
णस्यपुनर्वसुनिषेधीत । ताराचंद्रानुकूलेषु यहाद्रेषु शुभेष्वपि । पुनर्वसौ कृतो विप्रः पुन[illegible] संस्कारमर्हति । ज्योति
र्निबंधे नारदः । सूर्येणाङ्गीरसः शुक्रः शुभावाराः प्रोक्ताः पाले रेर भेः । चंद्रार्कौ मध्यमौ ज्ञेयौ सामवा[illegible] कुजे । स्वशाखाधिप
तिवारश्च शाखाधिपबलं तथा । शाखाधिपतिलग्ने च दुर्मंत्रिलयेत्रते । शाखाधिपाश्चरत्नसेग्रहकेंद्रपंसोरेमयजुषा

मधिकागरसौम्यभौमसिताः। जीवसितैर्विज्ञाणाक्षत्रस्यारोग्यं स्त्रीवशां च द्वरति। पारिजाते बृहस्पतिः। ऋग्वेदं बानागुरोर्थीरे
यजुर्वेदज्ञ बुधे। सामगानां परास्तु तोर अथर्वविदुषा रवेः। अत्र लग्न रउआदि दैवज्ञेभ्यो ज्ञेयं। विस्तरभयान्नोक्तं। ...। वृतोहिप
र्यस्य ध्यायो वारिदो यदि गर्जति। तद्दिनेस्यादनध्यायो जनत तत्रविवर्जयेत्। ज्योतिर्निबंधे। नाद्रि...। तस्यादनध्यायस्य
कालिकः। तदोपनयने कार्ये नेदारंभनं कारयेत्। ग्रनद्धूत्वाति रिक्तानां। तेषां तद्दिने वेदारंभो नास्ति। अंतस्तेषामुपनयने भवत्येव।
इतत्त्वज्ञानतः स्वतिनेते। सायस्ति नित्ते तु दिवैवमब रश्च पयिता सायस्य ध्योतं रहोमं कुर्यात्। तस्य योगार्जितका ... नरस्य सातदुपि
तौ। ब्रह्मोदनं पनेदग्नौ पक्वमन्नेन तद्भूयसी तीसेग्र हो केरि लिप्रयोगरत्ने भउन्नरणं॥ अत्र शांतिरप्युक्तानन्तसिंहप्रसादे। ब्रतो
दनवेदि पे पर्वदशदोषगर्जितयदि। नदावि... करजैयवदोर ध्ययनस्य लत्। तस्य रुशाति प्रकारस्तु वक्ष्ये शास्त्रानुसारतः। प्रधानेपा
यसंसाज्यइध्मशांतिपजो भवेत्। स्मृत्यर्थहस्ते विद्यापठे ... शाविष्ट ... ये। गायत्रीशौनमंत्रस्याप्यायूष्मितेतु स पूर्णा। धेनुं सवत्स
कां दद्यात् आचार्याय पयस्विनीं। ब्राह्मणान् भोजयेत् स भक्तितो ... लेहनेनरेत्। उपनयने चाधिकारिणो माध्यन्दीये मनुनोक्ताः।
पिता पितामहो भ्राता ज्ञातयो गोत्रजाग्रजाः। उपायनेधिकारी स्यात् पूर्वाभावे परः परः। प्रयोगरत्ने। पितैवोपनयेत्सुतं

तदभावे पितुः पिता। तदभावे पितुर्भ्राता तदभावे पि सोदरः। मितेतिवि अपरं न क्षत्रियेद। तेषां पुरोहितः इन। उपनयन
स्य दृष्टार्थत्वात्। तेषां नाध्यापनेनधिकारात्। अत्रापि लव्ध्वस्य ज्येष्ठ भ्रात्रभावेधिकारः। असंस्कृतास्तु संस्कार्या भ्रात
भिः संस्कृतैरिति याज्ञवल्क्योक्तेः। मातृरजोदोषे तु प्रागुक्तं। अथ षंढमूकादीनां विशेषः। प्रयोगपारिजाते ब्राह्मे। ब्राह्मण्यां
ब्राह्मणाज्जातो ब्राह्मणः सः इति श्रुतिः। तस्माच्च षंढबधिरकुब्जवामनपंगुषु। जडगद्गदरोगार्तशुष्कांगविकलांगिषु। मत्तो
न्मत्तेषु मूकेषु शयनस्थे निरिन्द्रिये। ध्वस्तपुंस्त्वेषु चैतेषु संस्काराः स्युर्यथोचितं। मत्तोन्मत्तौ न संस्कार्याविति केचित् प्रचक्षते।
कर्मस्वनधिकाराच्च पातित्यं नास्ति चानयोः। तदपत्यं च संस्कार्यमपरे त्वाहुरन्यथा। संस्कार मंत्रहोमादीन् करोत्याचार्य
एव तु। उपनेयांश्च विधिवदाचार्यः स्वसमीपतः। आनीयाग्निसमीपं वा सावित्रीं स्पृश्य वाचयेत्। कन्यास्वीकरणाद
न्यासर्वं विप्रेण कारयेत्। एवमेव द्विजैः कीलो संस्कार्यो कुण्डगोलकावपि इति। स्मृत्यर्थसारेप्येवं। संकीर्ण ... योः संस्कार्यं तथात्वेनि
येध्यश्व क्षेत्रज पुत्र विषयः। अन्यस्य ब्राह्मण्येनोपनयनाद्यप्राप्तेरिति सपराकः। गायत्र्युपदेशार्थं ... नरदोग्ये ... कार्यः। उत्तरे
णाग्निमुपविशतः प्राङ्मुखस्येवाचार्य प्रत्यङ्मुख इत रोधीहि भो इति शाखोपनमस्कृतो ...। यद्यपि ... लायनेनाधास्मिन्सावि

सं० ८० सावित्रीमन्वाहोत्तरतोग्नेः प्रत्यङ्मुखायेत्युक्त्वा दक्षिणतस्तिष्ठत आसीनस्यैकेनेति विकल्प उक्तस्तथापि कात्यायनामेन
सः स्वहस्तान्नोत्तरतश्चानेदेयात्। भिक्षायां विशेष महाकात्यायनः। मातरमेवाग्रे भिक्षेत। पराशरमाधवीये। मातरं वास्व
सारं वा मातुर्वा भगिनीं निजां।। भिक्षेत भिक्षां प्रथमं या चैनं न विमानयेत्। अथ संस्कारलोपे प्रायश्चित्तं। आरभ्याधान
माचौलात्काले तेषां कर्मणां। आपद्यप्यस्य संस्कारस्य कृताकृतस्य यथाक्रमं। उक्तेष्वेकैकलोपे तु पादकृच्छ्रं समाचरेत्। छेदाया
अर्धकृच्छ्रस्यापदि तेन मीरितं। अनापदि तु सर्वत्र द्विगुणं द्विगुणं चरेत्। पारिजाते कात्यायनः। लुप्ते कर्मणि सर्व
त्र प्रायश्चित्तं विधीयते। प्रायश्चित्ते कृते पश्चाल्लुप्तं समाचरेत्। स्मृत्यर्थसारे तु। कारिकायां तु। प्रायश्चित्ते कृतेतीते।
कर्मकृतार्थकृतमित्युक्तं। प्रायश्चित्ते कृते पश्चादतीतमपि कर्म वै। कार्यमित्येके नेत्यन्ये तु निषिध्यन्नतीते। त्रिकाण्डमण्डने
न तु कालातीतेषु कार्येषु प्राप्तस्वपरेषु च। कालातीतानि कृत्वैव विदध्यादुत्तराणि तु। स्मृत्यन्तरे। तत्र सर्वेषां तन्त्रेणैव
दीश्राद्धं कुर्यात्। देशकालकर्तॄणां स्यात्। गणशः क्रियमाणानां मातॄणां पूजनं सकृत्। सकृदेव भवेच्छ्राद्धमादौ न पृथ
आचार्या

गादिष्विति च्छन्दोगपरिशिष्टात्। उत्तरं बहूनामपत्यानां युगपत्संस्कारकरणविषयमिति बोपदेवः। अतीतसंस्काराणां
युगपत्करणे त्वन्ये। तत्रापि चौलस्योपनीत्यासत्ते तिपक्षे उपनीतदिनेऽनुष्ठानेन सर्वदिने। सततस्य दिनसैव्यसन्नि
कृष्णतरस्तात् ब्रह्मचारी एवं उपनीतदिने अनध्याये सन्ध्यामाहपारिजाते जैमिनिः। यावद्रोपदेशस्तु तावत्सन्ध्यादिकं न च।
ततो मध्याह्नसन्ध्यादि सर्वकर्म समाचरेदिति। ब्रह्मगार्ग्यत्रीप्रत्युवचनं। उपायनेतु कर्तव्यं सायंसन्ध्योपासनं। आरभेद्रु
त्यपक्षे तु मध्याह्ने तु परेहनीति। तच्छाखाभेदविषयमिति पारिजातः। विकल्प इतियुग्यं पश्यामः। उपनयनाग्निसंस्कारा
न्धार्यः। व्यहमेत मग्निं धारयेतीत्यापस्तम्बोक्तेः। ब्रह्मयज्ञे विशेषमाह तत्रैव जैमिनिः। अनुपाकृतवेदस्य कर्तव्यो ब
ह्मयज्ञकः। वेदस्थाने तु सावित्रीं गृह्यते तत्समा यत इति। येषां त्वदिने ग्रन्थवेदारम्भस्तेषां नेदमिति दिक्। अथ ब्रह्मचा
रिधर्माः। याज्ञवल्क्यः। मधुमांसांजनोच्छिष्टशुक्तस्त्रीप्राणिहिंसनं। भास्करालोकनाश्लीलपरिवादादि वर्जयेत्। मनुः।
अभ्यंगमंजनं चाक्ष्णोरुपानच्छत्रधारणं। वर्जयेदितिशेषकृतं। पारिजाते कौर्मे। नादर्शं चैव वीक्षेत नाचरेद्दन्तधावनं।
गुरूच्छिष्टं भेषजार्थं प्रयुञ्जीत न कामतः। उत्तमन्निषिद्धमध्वादिविषयं। अन्यस्य गुरूच्छिष्टस्य सर्वदा प्राप्तेः। गुरुप

सत्येष्वाधीयतकामं गुरोरुच्छिष्टं भैक्षजार्थं सर्वं प्राश्नीयादिति वसिष्ठोक्तेः। ज्येष्ठभ्रातुरपि पितृत्वेय। पितुर्ज्येष्ठस्य च भ्रातु
रुच्छिष्टं भोज्यमित्यापस्तंबोक्तेः। गुरुपुत्रे स्मृत्यंतरेउक्तेः गुरुवद्गुरुपुत्रस्यादन्यत्रोच्छिष्टभोजनात् इत्युपचेतो॥ ताहृन्ला
दिश्यंजनं चैव कांस्यपात्रे च भोजनं। यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत् परम्॥ मेखलां [illegible] दंडमुपवीतं
चैव हि शाः। कौपीनं कटिसूत्रं च ब्रह्मचारी तु धारयेत्। आग्नीध्रनं भैक्षचर्यामध्यः स्थाग्रोहितं। कुर्यादिति शेषः॥
मेखला माश्वलायनमः। तेषां मेखला मौंजी ब्राह्मणस्य धनुर्ज्या क्षत्रियस्याविवैश्यस्येति आचार्यः। छिद्रलाभे
विकल्पः कार्या त्रिवारं स्यात्समावर्तनात्। न ग्रंथयस्त्वयः कार्याः पंचवा सप्त वा पुनः। अत्र च प्रवरसंख्यया निपम इति रेक्षा।
अथ दंडाः। मनुः। ब्राह्मणो बैल्वपालाशौ क्षत्रियो वाटखादिरौ। पैप्पलौदुंबरौ वैश्यो दंडानर्हंति धर्मतः। प्रथा
भभावे गौतमः। यज्ञियो वा सर्वेषां मूर्द्धललाटेनासाग्रप्रमाणः स्मृतः। अदीनमहाश्वलायनः अहतेन वा सतांसमौ
लमैणेयेन वाजिनेन ब्राह्मणो रौरवेण क्षत्रियं माजेन वैश्यमिति। यद्यप्येणेयशब्देन स्मृगीचर्म मेवोच्यते। एण्ये

दरीतपाणिनिस्मृतेः। एणेयमैण्यानमीचर्मैणस्यैतेण स्तुमैति पुंसि हसमकरोशाच्च। तथापि कृष्णसार रस्तान्यजिनानि तिसस्वोक्तेः। सर्वेषा
रौरवमितियमोक्तेश्च मृगचर्मणा सहविकल्पो ज्ञेयः। वस्त्राणि नयोस्तु विकल्पः। कार्पासं वा विकृतमिति गौतमोक्तेः। अथ यज्ञोपवी
तं मनुः। कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत्। पारिजातेदेवलः। कार्पासक्षौममगोवालशणवल्कतृणादिकं। यथासं
भवतोधार्यमुपवीतं द्विजातिभिः। तेन वृते तु कार्यं। सावित्र्या त्रिगुणं कुर्यान्नवसूत्रं तु कारयेत्। इति तन्नवोक्तेः। भृगुः। छंदोगप
रिशिष्टं। त्रिवृदूर्ध्ववृतं कार्यं तंतुत्रयमधोवृतं त्रिवृतं चोपवीतं स्यात्तस्यैको ग्रंथिरिष्यते। ऊर्ध्ववृतं दक्षिणं करमूर्ध्वं संवृते तत्कार्यं तद्व
नेयमनेपायत्नं। त्रिवृतं चोपवीतं स्यात्तस्यैको ग्रंथिरिष्यते। ऊर्ध्ववृतं दक्षिणकरमूर्ध्वं कृत्वा वलितं। वामावलितं त्रिगुणीकृत्वा दक्षिणावर्तं व
लितं। कार्यं। सग्रंथिकस्तु। ग्रंथितंतुकमित्यर्थः। कात्यायनः। पृष्ठवंशे च नाभ्यां च धृतं यद्विंदते कटिं। तद्धार्यमुपवीतं स्यान्नातिलंबं न चोच्छ्रि
तं। वसिष्ठः। नाभेरूर्ध्वमनायुष्यमधो नाभेस्तपःक्षयः। तस्मान्नाभिसमं कुर्यादुपवीतं विचक्षणः। [illegible] उपवीतं बटो
रेकं तेन तेन रख्या स्मृते। ... शास्त्रस्य निश्चयः। सएव। बहूनि चायुःकामस्य [illegible] मासहस्रं वा। यज्ञोपवी
तमिति वाक्याद्बहून्यपि धारयेत् गृहे। माधवः। यज्ञोपवीते द्वे धार्ये श्रौते स्मार्ते च कर्मणि। तृतीयमुत्तरीयार्थं वस्त्राभावे तदिष्यते। दे
वलः। सावित्र्या दशकृत्वोद्भिर्मंत्रिताभिस्तदुक्षितं। विच्छिन्नं चाप्यधो यातं भुक्त्वा निर्मितमुत्सृजेत्। ताम्रमनुः। मेखलामजिने

सं.८ दंडमुपनीतकमुंडनं। अप्सु प्रास्य निनवानि गृहीतान्यानि मंत्रतः॥ अथैतल्लोपे प्रायश्चित्तं। मनुः। अकृत्वा भैक्षचरणम
समिध्य च पावकं। अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत्। अमता आपदि स्मृतेस्तु याज्ञवल्क्यः। भैक्षाग्निकार्ये त्यक्त्वा तु सप्त
रात्रमनातुरः। कामावकीर्ण इत्याभ्यां जुहुयादाहुतिद्वयं। उपस्थानं ततः कुर्यात् समासिंचंत्वनेन तु। मंत्रास्तु मिताक्षरायां
ज्ञेयाः। सकृल्लोपे तु ऋग्विधाने। मानस्तोके जपेन्नित्यं शतसंख्यं शिवालये। अग्निकार्यं विना भोक्तुर्न पापं ब्रह्मचारिणः। स्मृत्य
र्थसारे तु संध्याग्निकार्यलोपे स्नात्वाष्टसहस्रं जपः॥ भिक्षालोपेष्टशतं। अभ्यासे द्विगुणं पुनःसंस्कारश्चेत्युक्तं। अशक्तौ सवि
तुः। यः संध्यां चैव नोपास्ते अग्निकार्यं यथाविधि। गायत्र्यष्टसहस्रं तु जपेत् स्नात्वा समाहितः। पारिजाते शातातपः। ब्रह्मचारी
तु योऽश्नीयान्मधुमांसं कथंचन। प्राजापत्यं तु कृत्वासौ व्रतशेषं समापयेत्। ऋग्विधाने। तद्वोधियाज पुनर्भव मूसं चैव शिवालये।
ब्रह्मचारी स्वधर्मेषु। न्यूनं चेत्करणीमेति तत्र तु। स्त्रीसंगे तु मनुः। अवकीर्णी तु काणेन गर्दभेन चतुष्पथे। स्मार्तपाक
विधानेन यजेन्निर्ऋतिं निशि। विस्तरस्तु मिताक्षरादौ ज्ञेयः विशेषः। स्मृत्यर्थसारादि पारिजातादौ ज्ञेयः॥ उपनेतुनाशे

८

बहुहारितः। मनोव्रतपतीभिश्च लक्षा आज्याहुतीर्हुत्वा पुनः प्रलीयात् तत्रैव मरीचिः। ब्रह्मसूत्रं विना भुंक्ते पुनर्नकुरु
ते यदा। गायत्र्यष्टसहस्रेण प्राणायामेन शुध्यति। अभिवादनप्रत्यभिवादनादौ विशेषः। स्मृत्यर्थसारादि पारिजा
तादौ ज्ञेयः। यम। व्याख्यानपिकनीयांसं संध्यायामभिवादयेत्। विना शिष्यं न पुत्रं च दौहित्रं दुहितुः पतिं। अथ पुनरुप
नयनं। पारिजाते शातातपः। लशुनं गृंजनं जग्ध्वा पलांडु कवकं तथा शुनं। उष्ट्रमानुषकेभाश्वरासभीक्षीरभोजनात्।
उपायनं पुनः कुर्यात् तप्तकृच्छ्रं चरेन्मुहुरिति हेमाद्रौ वृद्धमनुः। ज्ञानव्यदि समागच्छत् तत्कुंभेनिमज्यन्न॥ उपत्य स्नापयि
तास्य जातकर्मादि कारयेत्। तत्रैव पाल्ये। प्रेतशय्याप्रतिग्रहे पुनःसंस्कारमर्हति मनुः। आकाशवासाश्च यत्किंचित्रं
सुरासपृक्तमेव च। पुनःसंस्कारमर्हति त्रयो वर्णा द्विजातयः। मिताक्षरायां पराशरः। यस्य व्यस्तसूत्रानादि प्रव्रज्याता
निनिगतः। अनाशकनिवृत्ता ग्राव्येचिह्नस्थाने चिशोधितिः। स चरेत्त्रीणि कृच्छ्राणि त्रीणि चांद्रायणानि च। जातकर्मादि
भि सर्वसंस्कृतः शुद्धिमाप्नुयात् तथा। त्रिपादिमाति रेकेण ब्रह्मचारिणः प्रेतकमरणे पुनरुपनयनमिसंपर

कोदयः। त्रिरुद्धो सेतौ। कर्मनाशाजलस्पर्शात् करतोयाविलंघनात्। गंडकीबाहुतरणात् पुनःसंस्कारमर्हति। गौडास्तु करतोया
जलस्पर्शात् कर्मनाशाविलंघनात्। इति पठंति। तन्न। दानधर्मेषु करतोयास्नानं प्राशस्त्योक्तेः। करतो[illegible]रसारि[illegible]इति विश्व
ते। अज्ञानवयसि पौराणाः पापहरकरतो[illegible]इति स्मृतिदर्पणे। [illegible]कालरिक्तस्नानमंत्राच। पराशरः। आर्के[illegible]त्वादंडो मेखलायोप
लानि च। निवर्त्तंते द्विजातीनां पुनःसंस्कारकर्मणि। हरदत्तस्तु यजुर्वेदमधीत्यान्यवेदमध्येतुमिच्छतस्तस्य पुनरुपनयनमिच्छ
ति वेदमुपनयनं कर्तव्यमित्याह। अन्ये नेत्यमन्यंते। सर्वेभ्यो वेदेभ्यः सावित्र्यनूच्यत इत्यापस्तंबोक्तेः। लघ्वाश्वलायनकारिकायां तरमधी
स्य ऋग्वेदं येऽत्राधीयते। उपनीतिरियं तेषां मंत्रकरणवर्जिता। यद्वैतदनुपनीतस्य प्रायश्चित्तं यथा। [illegible]कृताकृतं चपपनेम
पाठनं न मेव च। मे पाज ननासह वेवतलयो भेवेदिह। अतरुनननीयश्च तदूभोषेद्धयं नहि। परिदानं नकार्यं स्यान्निमित्तानंतर
त्तिदं। पर्वस्यावाचयेत्तूक्तानेन तत्सवितुर्वरेण्यमिह इति। यत्तु हारितः। द्विविधाः स्त्रियो ब्रह्मवादिन्यः सद्योवध्वश्च। तत्र ब्रह्मवादि
नीनाम् उपनयनमग्नींधनं वेदाध्ययनं स्वगृहे भैक्षचर्येति। सद्योवधीनामुपनयनं कृत्वा [illegible]विवाहः। कार्य इति तद्युगांतर

विषय। पुरा कल्पेषु नारीणां मौंजीबंधनमिष्यते। अध्यापनं च वेदानां सावित्रीवाचनं तथेति यमोक्तेः। अथानध्यायाः। पारिजा
ते हारीतः। प्रतिपत्सु चतुर्दश्यामष्टम्यां पर्वणोर्द्वयोः। श्वोऽनध्यायेऽद्य शर्वर्यां नाधीयीत कदाचन। नारदः। अयने विषुवे चैवश
यने बोधने हरेः। अनध्यायस्तु कर्तव्यो मन्वादिषु युगादिषु। अनध्यायस्तु कर्तव्यो माघे सोपपदातिथिः। गर्गः। स्याललेन
तपस्ये च याद्वितीया विषुवे क्षये। चातुर्मास्य द्वितीयास्ताः प्रवदंति मनीषिणः। स्मृत्यर्थसारे फाल्गुनाषाढकार्त्तिकीफा
ल्गुनीसमीपस्थद्वितीयास्तु चैत्रेति। मनुः। उपाकर्मणि चोत्सर्गे त्रिरात्रं क्षपणं स्मृतम्। अष्टकासु त्वहोरात्रमृत्वंतासु च रात्रिषु। इति।
उत्सर्गे च मन्वाकृपक्षिण्यहोरात्रमध्याय इति विज्ञानेश्वरः। अष्टका शब्देन सप्तम्यादित्रयमित्यर्थः। निरुक्ते
काम्भिरा त्रमप्सानेकं इति गोलमोक्तेः। कृतेनास्मिंस्तिसोरकृतेनासु चान्द्रायणस्य पर्वतेऽनेनानिषेधसिद्धेरिति सर्वज्ञनारायणः। उ
तेनित्याः। नैमित्तिकानप्याह। याज्ञवल्क्यः। त्र्यहं प्रेतेष्वनध्यायः शिष्यर्त्विग्गुरुबंधुषु। उपाकर्मणि चोत्सर्गे स्वशाखाश्रोत्रि
येन था सं ध्यागर्जितनिपातभूकंपोल्कानिपातने। समाप्य वेदं द्युनिशमारण्यकमधीत्य च। पंचदश्यां चतुर्दश्यामष्टम्यां
राहुसूतके। ऋतुसंधिषु भुक्त्वा वा श्राद्धिकं प्रतिगृह्य च। पशुमंडूकनकुलश्वाहिमार्जारमूषकैः। कृतेंतरे त्वहोरात्रं श

सिं०त०

शस्त्रमालेतथोच्छ्रये। ग्रहणे द्युतिशक्रे च विपिग्रहास्तासौम्यह इत्युक्तं। प्राक् स्मृत्यर्थसारे चैवं पांसुपश्चाद्य नरायत्र्यहमुप
वासेविप्रवासश्चेति गोलमो। क्तातत्त्रथनाध्यापने। पाञ्चकल्प्ये। अक्रोष्ट्रे दंगे भोसामवाणान्ते निःस्वने। अमेध्यशव
शूद्रान्त्यश्मशानपतितसन्निके। देशेशुचावात्मनिचविद्युत्स्तनितसंप्लवे। भुक्तार्द्रपाणिरंभोतर्धरात्रेतिमारुते। पांसुप्रव
र्षे दिग्दाहे संध्यानीहारभीतिषु। धावतः पूतिगंधे च शिष्टे च गृहमागते। खरोष्ट्रयानहस्त्यश्वनौरक्षेरिहरोहणे।
सप्तत्रिंशदनध्यायेनेताञ्चात्कालिकान्विदुः। बाणाः नशोः। शल्ललुर्वर्णिनिलिरदत्तेः। अमेध्याः स्मृतिकादयः। स्तनि
तंगर्जः। चपीतोऽन्यत्र दृष्टगर्ज इति विद्युता योगपद्ये आकालिकः। नर्षाद्युतात्कालिक इति नारायणः। संध्यागर्जित
हारीतः। सायंसंध्यास्तनिते रात्रिः। प्रातःसंध्यास्तनिते होरात्रं। रात्रौ विद्युत्सपर रात्र्यवधिः। विद्युतनक्तं चापर
रात्रादिति गौतमोक्तेः। दिन तृतीयांशोत्तरत्वेपि द्युतिसर्वरात्रमित्याह सग्रव। त्रिभागादि। भत्र वृत्तौ सर्वमिति
अर्धरात्रे मध्ययामद्वयेति। विज्ञानेश्वरः। संध्यद्वडत्तलुच्छयशीतिविज्ञानेश्वरः। निर्णयामृते। मनुः। नृविराजेन कक
हे न सेनायानसंगरे। न भुक्तमात्रे नाजीर्णे न वमित्वा न सूतके। रुधिरे च स्रतेगात्राच्छस्त्रेण च परिक्षते। नकौ १८

शे रोष्णातरुस्य छायायां श्लेष्मातकस्य च। कदाचिदपि नाध्येयं कोविदारकपित्थयोः। मनुः। शयानः प्रौढपादं
स्य कृत्वा चैवावसक्थिकां। नाधीयीतामिषं जग्ध्वा सूतकान्नाद्यमेव च। प्रौढपादः पादेपरिपाद दाना। आसनारूढ
पादो वेविहरदतः। सोपवदाश्रीत्र त्रा गुरुकं। स्मृत्यर्थसारे। श्रवणद्वादशी महाभरण्योः। येन द्वितीयाया पां।
स्यसाहम्यामाकारोरावदर्शने चाहोरात्रं। असपिंडे गुरौ त्रिरात्रं। आचार्ये उपाध्याये च पक्षिणी। आचार्यभार्यापुत्रशि
ष्येष्वहोरात्रं। अभ्युषिते गोविप्रन्तेलीति रात्रं। अयनेविषुवे च पक्षिणी। अष्टकासु पक्षो च। आरण्यमार्जारसर्पनकु
लपंचनखपांतरागमनेत्रिरात्रं। आरण्यश्वमगारश्वादिवानररजकाहो द्वादशरात्रं। खरवराहोष्ट्रनडाक्रस्त्र
तिकादक्यौशवादोमासं। गोगवयाजानास्तिकादौ त्रिमासं। श्वमनमेकश्वपाददाडैः षण्मासं। गजगंडसास्थिरेहि।
याघ्रमितापाशितघाढौ वत्सरमनध्यायः। विवाहोप्रतिष्ठाद्यापनादिमासमात्रे सर्वाको याणामनध्याय
उदये स्नमयेचापि मुहूर्तं नवयगामियत्र। तद्वि च आर्धरात्रेनाडिका। प्रदोषेनस्वधीयीतत्त्तीयानव नाडिका।
निर्णयामृते गर्भः। रात्रौयामचतुर्याद्वर्काकू। सप्तमीमादन्त्रयोदशी। प्रदोषे। सतु विज्ञेयः। वसंधेनिष्प्राविवध्ये

तद्भिवर्जयेत्।शौनकः।नित्येजपेनकाम्येचक्रतौपारायणेपिच।नानध्यायोस्तिवेदानांग्रहणेग्राहणेस्मृतः।रस
नध्यायः।अथमहानाम्न्यादिव्रतं।श्रीधरः।तिथिनक्षत्रताराशशिबलोदयनिरीक्षणं।शौनकस्तु[illegible]संख्यातसंगो
दानव्रतेषुच।एतेषांलोपेशौनकः।व्रतानिविधिनाकृत्वास्वशाखाध्ययनंचरेत्।अकृत्वा[illegible]येनसपा
पीविधिघातकः।प्रसंगेनकृच्छ्रमेकैकंचरित्वाज्याहुतीःशतं।हुत्वावैगतिगायत्र्यास्नायादित्याहशौनकः।व्रतानिवि
धिनाकृत्वा।स्वस्वशर्थसारेतुत्रीहृद्वादशनाकृच्छान्कृत्वापुनर्व्रतंचरेदित्युक्तं।अथसमावर्त्तनं।सुरेश्वरः।सौमभा
नुजयोर्नारेनक्षत्रेचाध्वितोदिते।ताराचन्द्रविशुद्धौचस्यात्समावर्त्तनक्रिया।वसिष्ठः।स्नानंमध्याह्नकाले[illegible]
कारयेच्छुभं।पश्चात्तदर्भावेतुकुर्यात्स्नानंयथाविधि।सर्वंकृतवतोविवाहस्येति।सव्रात्यदुर्दक्षिणायनेविवाह
कृदासमावृत्तंनक्त्स्नानंवसिष्ठः।मपिहत्तेना।अन्यथोदगयनेसमावर्त्तेनअनाश्रमीनतिष्ठेत्।तेविरोधः।स्यादि
त्युक्तं।शुदर्शनभाष्ये।गतश्चब्रह्मकाः।शीघ्रतलोपेप्रायश्चित्तंकृत्वाकार्यंगतदातृवोधापनः।शौनकस्याद।भीमिक्षा

त्निकार्यंराहिंसकौपीनोपवीतमेखलादंडाजिनधारणादिविवास्वाप[illegible]स्यग्निधारणोद्वर्तनानुलेपनं।जन्मरतन
कृत्यगीतवाद्याभिरतोब्रह्मचारीरक्षुत्रयचरेन्महासांकृतिहोमपाहिकयादशाहोमेवकुर्यात्।समावर्त्तनोतुरस
र्वस्मृतानांत्रिरात्रमाशौचकार्यं।आदिष्टीनोदकंकुर्यादाव्रतस्यसमोपनात्।समासेतुदकंदत्वात्रिरात्रमशुचिर्भवेदि
तिमनूक्तेः।आदिष्टीब्रह्मचारीतिविज्ञानेश्वरः।ब्रह्मचर्येचदिकश्चिन्नमृतस्तदात्रिरात्रमेवविवाहःकार्यस्य
योनेनिसिद्धत्ति।जननेतुसतसपिनत्रिरात्रं।तत्राधिकाताशौचभावाउदकंदत्वेतिवञ्चनाद्वेतिदिक्।पृथ्वातकृच्छ्रता
न्याह।व्यासः।यज्ञोपवीतद्वितयंसोदकंचकमण्डलुं।छत्रंचोष्णीषममलंपादुकेचाप्युपानहौ।रौक्मेचकुण्डलेवेदंकृ
त्तकेशनखःशुचिः।वेदोदर्भंदण्डं।मनुः।उपानहौचवासश्चधृतमन्यैर्नधारयेत्।उपवीतमलंकारंस्रजंकरक
मेवच।अन्यान्यपिदृढमंगल्यस्मृत्यादिभ्योज्ञेयानि।अथक्षुरिकाबन्धः।ज्योतिर्निबन्धेनीरदः[illegible]क्षुरिकाबन्धनंच
क्ष्येनृपाणांप्राक्करग्रहात्।विवाहोक्तेषुमासेषुशुक्लपक्षेसनस्तनस्तगे।जीवेशुक्रेचभूपुत्रेचन्द्रे[illegible]वग्गलिते।
मौञ्जीबन्धक्षितितिथि[illegible]वर्जनवासरे।सगृहे।शूद्राणांराजपुत्राणांमौञ्ज्यभावेस्त्वबन्धनं।मौञ्जीबन्धोक्ति

ध्यादिकार्यं भौमादिनवमिना ॥ अथ विवाहः । याज्ञवल्क्यः । अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् । अनन्यपूर्विकां
कान्तामसपिण्डां यवीयसीं । अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजां ॥ लक्षण्या बाह्यान्तरलक्षणोपेता । बाह्यानि
काशीखण्डादौ प्रसिद्धानि । आंतराण्यपि पिण्डान्यत्ते सा [illegible] सापिण्ड्यं [illegible] । एकशरी
रावयवान्वयेन भवति । एकस्य हि पितुर्मातुश्च शरीरस्यावयवाः पुत्रपौत्रादिषु साक्षात्परंपरया चानुगताणि तद्द्रू
पेणानुस्यूताः । यद्यपि पत्न्याः पत्या सह भ्रातृपत्नीनां च परस्परं नैतत्संभवति । तथाप्येकशरीरारंभकत्वेनैकशरीरावयवान्व
योस्त्येव । एकस्य हि पितृशरीरस्यावयवाः पुत्रद्वारा तास्वाहिता इति । विज्ञानेश्वरादयः । चन्द्रिकापरार्कमेधातिथि
माधवादयस्तु । एकपिण्डदानक्रिया । अन्वयित्वं सापिण्ड्यं । लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः । पिण्डदः स
प्तमस्तेषां सापिण्ड्यं साप्तपौरुषमिति मात्स्योक्तेः । न च पितृव्यादिष्वेतन्नास्तीति वाच्यं । तत्तत्कर्तृकश्राद्धे हि ये देवता
भूतास्तेषामेव यत्र कस्मिंश्चिदन्यकर्तृकश्राद्धे नत्र विशातिले पां संपीडनं । नद्यर्थाणामपि कल्पतत्कश्राद्धे साह

पिण्डाभिरिति न तदव्याप्तिः । न च मातुलादिष्वेतन्नाऽतिव्याप्तिरिति वाच्यं । तत्र [illegible] एकदेवतात्वात् । ननु गुरुशिष्यादेरपि श्राद्ध
देवतात्वात्सापिण्ड्यं स्यात् । किं बहुना सर्वाभावे तु नृपतिः कारयेत्तस्य रिक्थत इति मार्कण्डेयपुराणाद्राज्ञोऽपि श्रा
द्धकर्तृत्वात्सापिण्ड्यप्रसंगः । स सप्तमात्पञ्चमात्समसमाद्ध्वं मातृतः पितृतस्तथेति याज्ञवल्क्यवचनेन मातापितृसंबन्ध
एव तत्समतत्त्वात् । ऊर्ध्वं सापिण्ड्यं निवर्तत इति शेषः । मन्त्रोपचमत्वा [illegible] न मातृत [illegible] भेदात् । मेवामा
तृकुले पंचमस्यापि तत्कुले वै सप्तमत्वस्य वचनावधेर्वलत्वं न्याः पौरुषत्वाद्दोष इति चेत् । तुल्यमन्यत्रापि किं
च । अन्वयत्वान्वयपक्षे पंचमाद्यर्गरूप्याः परिहारस्तथेहापि । अनेन मातृकुलेपि तत्कुले चैकपिण्डदानक्रियान्वयित्वं सापि
ण्ड्यमिति सिद्धं । तेनैकस्य पित्रादयः षट् पुत्रादयश्च षट् सपिण्डा भवन्ति । अत्र केचिदुभयमतं [illegible] विवाहो नान्यथे
त्याहुः । हरदत्तादयस्तु सगोत्रत्वं च सापिण्ड्यस्य सद्वितीयगिकत्वेनकत्वं निरन्तनावश्य [illegible] आवश्यकत्वान्म
हपुरुषमारभ्याष्टमो वरः स्वपुरुषमारभ्य द्वितीया तृतीया यदि कामुद्वहेदित्याहुः । शिष्टास्तु [illegible] रयोः स्वतःसापि
ण्ड्यं किन्तु कउरुसलिलान्तसापिण्ड्येन च । अतो न मन्नरं प्रति कन्यायस्या । असापिण्ड्येऽपि कन्यायाः [illegible] नसापिण्ड्या ।

ततां ततिरुक्ताद्धरस्तां प्रतिसपिंडग्रन्थेष्वनिरात्। सपिंडासपिंडयोः प्रतियोगिभेदेन विरोधादित्याहुः। इदमेव युक्तं। अशौचे शेषेण
सापिंड्यं ज्ञेयं। यत्र तु मध्ये विच्छिन्नमपि सापिंड्यमहकं स्युर्लिवक्तु नरनुवर्त्तते। यथा कूटस्थासन्नयोः क[illegible]सुतो। तत्र निर
तिः। लदपसयोस्तन्नुवर्त्तिस्तत्रापि सदोषः। संबंधिभेदात्। अत्र कूटस्थमारभ्य गणनीका पीत[illegible]रस्य पातातः
कुटस्थात्पंदिसप्तमः। पंचमीचेत्तर्यो मातान त्सापिंड्यनिवर्त्तइति। कूटस्थो मूलपुरुष[illegible]पानवेधे। प्रनमुक्तप्रकारे
णापितृबंधुषसप्तमात्। ऊर्ध्वमेव निवासस्तं पंचमात्मात्बंधुतः। संतानेभिधते[illegible]स्मा[illegible]भयत्र ना। ल वादा
यगणेद्धीन्वरंया वच्च कन्यके। स्मृतिन्तेन नारदः। आसप्तमासेन माच्च बंधुभ्यः पितृमातृतः। अविवाह्या सगोत्रा न
समानप्रवरा तथा। अत्र बंधुभ्य इति पंचमीनिर्देशात्किंतु। पितृपक्षस्य युत्रोत्सप्तमी मातृ[illegible]पुवा व पंचमो ऽपि
त्वर्जेत्। अनमन्यबंधुषु ज्ञेयं। तत्रापि त्रिगोत्रात्सये वार्गपि विवाहं कुर्यात्। वक्ष्यमाणवचनात्[illegible]त्रि गोत्रगणना च माहामहगो
त्रापेक्षया तु त्रिगोत्रात गतैनविवाह प्रसंग इति स बंधत लाट योगो दुग्धाः। सव धर्वि[illegible]पाणिरप्याह। पंच मातृ
[illegible] वीगपि त्रिगोत्रात तरितावि वाह्या। असंबंधा भवेन्मातुः पिंडे नेवोदकेन वा। [illegible]विना[illegible]ज्ञाती नानि गोत्रा[illegible]

मिताच येति बृहन्मनूक्तेः। सन्निकर्षेपि कर्त्तव्यं त्रिगोत्रात्परितो पदीति देवलोक्तेः[illegible]लिङ्गल दाक्षिणात्यामनमन्यते। यह
त्सिष्ठः। पंचमीसप्तमी चैव मातृतः पितृतः स्तथेति। यच्च पुराणे। पंचमीमातृपक्षाच्च सप्तमी। उद्वहेत्कन्यां न्याये[illegible]
विधात्पति। तस्य च मीसप्तमीमपी त्याल्पव्याख्येयं। पंचमे सप्तमे चैव नडाषाने वाहि कीक्रिया। किं पाय्यापि हि ते पतितो
एहता गता इति स्वपरोक्ते मरीचीवजनात्। हारलतायां शंखलिखितो। सपिंडतालु सर्वे[illegible]तः। सासपोरु पीपिटु[illegible]
दानेन आशौचं तदानुगे। यत्तु पंचमी मातृतः परिहरेत्सप्तमी पितृतः स्त्रीव मातृतः पंच पितृते[illegible]तेषष्ठी मसिस्मृतौ वीनिसन्नु
कन्यइति माधवोक्तेः। पंचमीसप्तमी चैव मातृतः पितृतः स्तथा। दशभिः पुरुषैः ख्याता तु श्रोत्रियाणां महाकुलात्। उद्वहेत्त
समादूर्ध्वं तदभावे तु सप्तमी। पंचमी तदभावे तु पितृपक्षेप्ययं विधिः। सप्तमीं च तथा ष[illegible]मी च तथैव च। उद्वहेत्त
न्यानदोषः शाकटायनः। तृतीयां वा चतुर्थीं वा पक्षयोरुभयोरपि। विवाहयेन्मनुः प्राह[illegible]पिस्तुमेयस्तु दरानुत्त
रूपेण कुक्कमार्गेण वोढ हेतुः। नित्यं संयम हायेस्या हेदाभूतस्य दृश्यत इति। चतुर्विंशति मातामहा। चतुर्[illegible]चतुर्थः पंचमेपि
वा। पराशरमते षष्ठी पंचमी न तु पंचमीमिति पराशरोक्तेः श्चानुकूल्यात्ते नपदि पंचम्यादि यं चतुर्थ्यादि परिण[illegible]कार्यमिति प्रती
यते। अत्राहितद भावेरीत स्पष्ट मेवानुकूल्पत्वमुक्तं। तन्नायथा श्रुतं ज्ञेयं। एवं क्रमरी बीचवोविरोधादीपरं तस्मसमाधि
मा

नायकन्यामुद्वहेद्द्विजः । गुरुतल्पी स विज्ञेयः । सगोत्रां चैव मुद्वहेदिति विष्णूक्तेश्च । तस्मान्मदनपारिजाताद्युक्तदिशा दत्तक
पुत्रस्य संबंधाद्यनुप्रवेशो ब्राह्मणानां श्रोत्रियादिसपिंडविषये यावद्वोढा ज्ञानिनेयानि । नेतनुकल्पः ३ । इति भाषितं । यत्तु स्म
लिंचन्द्रिकामाधवादय आहुः । तृतीये संगच्छावहै चतुर्थे संगच्छावहा इति शातपथश्रुतेः । [illegible] उद्वहेन्मातुलस्य च यां पाणि
ग्रहेत्पितृष्वसुर्यां वापि मैनेति । गर्भेन्तु नो जनितादप्नीकारिति मन्त्रवर्णात् । मातृष्वसृसुतां [illegible] स्वसृसुतां तथा ।
मित्राहं लिखाचित् देशसंकोच्यापि सपिंडितालयोत् श्च मातुलकन्योद्वाहः कार्यः । यद्यपि पितृष्वसृकन्योद्वाहोपि प्राप्तस्तथा
प्यस्वर्ग्यं लोकविद्विष्टमिति निषेधाद्वचनान्तरेणानुद्वाहस्याविधानाच्च न कार्यः । अयं तु उद्वाहो [illegible]णात्यशिष्टाचा
रात्कार्य इति न वंप्रगीतश्रुतीनामर्थवादमात्रतामान्तरेणासिद्धेः उपरिष्टाद्[illegible]धारयतीतिव
दनुवादानुपपत्तेर्विधिकल्पनात् यत्तु वशातातपः । मातुलस्य सुतां मूढो मातृगोत्रां तथैव च । स
मानप्रवरां चैव त्यक्त्वा चान्द्रायणं चरेत् । पुत्रमनुः । पैतृष्वसेयीं भगिनीं स्वस्रीयां मातुरेव च । मातुश्च भ्रातुरा
प्तस्य गत्वा चान्द्रायणं चरेत् । एतास्तिस्रस्तु भार्यार्थे नोपयच्छेत्तु बुद्धिमान् । यच्च व्यासः । मातुः सपिंडा
यत्नेन वर्जनीया द्विजातिभिरिति । तद्ब्राह्मादिविवाहोढमातृविषयं तत्र

पितृगोत्रानिवृत्तेः अत एव मार्कण्डेयपुराणे गांधर्वादिविवाहेषु पितृगोत्रेण धर्मवित् इति ब्राह्मादिविवाहेषु परिणयेनेति
मदनसोमेश्वरोपि मातुलकन्योद्वाहमुदाहृत्य स्मृतिविरोधेपि पूर्वोक्तश्रौतलिंगबलीयस्त्वादस्य कर्तव्यतामाह तदेतदत्तकस्य
पाककर्तृत्व मम मातुलसोदरकन्याविषयत्वेनामकरणमातुलकन्याविषयत्वेनोपपन्नमप्यविनाशितरमणीयं पथा तथास्तु तथापि केलानावान्नोपि दूषय
गोत्रान्मातृसपिंडाच्च विवाहो गोवधस्तथेत्यादिपुराणात् माधवीयबौधायनापस्तम्बैः शमाह पंचधा विप्रतिपत्तिरिति पातंजलयोत्तरतर्दुर्णा वि
कृयानुपतनमिति यानसहभोजनं पर्युषितभोजनं मातुलपितृस्वसृदुहितृगमनमिति मदनसोमेश्वरेणापि स्मृतिविरुद्धानां मातुलकन्योद्वाहादीनाम
स्माहत्वनादप्रामाण्यमित्युक्तं बृहस्पतिरपि उद्वहेत दाक्षिणात्यैर्मातुलस्य सुता द्विजैः मत्स्याद्याश्च नराः पूर्वे व्यभिचाररताः स्त्रियः उक्तेरमप्रमाश्च
वस्त्वरयाद्भ्रूणारतत्त्वलाड इत्यनारत्वमाहात्मा आग्रवहरमादौ मत्स्य कर्णाटकादीनां तत्कारणां श्राद्धनिषेधः वोपदेवेनापि लिखितं ब्राह्मे यत्र मातुलोद्वा
हो यत्र वृषलीपतिः श्राद्धं न गच्छेत्तत्र द्विजः भुक्त्वं यश्च निरामिषं भिन्न तस्मान्मातुलः पंचपितृवः सप्तवर्त्य कोद्वहेदिति सिद्धं मनुं धर्मिकवसुमंतुः [illegible]
पानमकार्षिद्ः स्वधानामास्थामाद्दुर्मनिविद्वितिर्मवति आसप्तमादिक्रियाविच्छित्तिर्मवति आत्मतीयगोत्रपिंडविच्छित्तिरन्यथापिंडाशौचक्रियाविच्छेदाद्दुत्तत्तुल्या
भवति अस्यायमाह शूलपाणिः जीवत्पितृकादिकस्य वृद्धप्रपितामहादयः स्त्रियश्चाद्येह्विरत्वनात्यापिंडभाजो भवति तदूर्ध्वं त्रयो नव पुरुषपर्यंतास्ते
पभाजः श्राद्धकर्ता दशमः इति दशमाद्यूर्ध्वं सापिंड्यनिवृत्तिः दशमादित्युपलक्षणं तेन पितृपितामहजीवने नवपुरुषपर्यंत पितृजीवने नाष्टपुरुषपर्यं

ने

तं सापिंड्यमिति ॥ तेयं अपुत्रधनग्रहणे सन्निहितासोदसप्तपुरुषपर्यंतं अधिकारः धनग्राहित्वमारभ्य तृतीयः पौत्रः तदूर्ध्वं श्राद्धे विकल्पः अन्य
थाधनहारित्वे अपुत्रश्राद्धप्रकरणे बलहेत्वर्थः आत्मतीयाहित्यत्र कन्याविषयं अप्रत्तानां तु स्त्रीणां त्रिपुरुषी विज्ञायते इति न सिद्धोक्तेः ।
। एतच्चाशौचविषयं सापिंड्यं न तु विवाहादौ तत्र प्रवोक्तत्वे नैःसंनमतसंसमत नियमादिति मधूक्तिमितिधर्मसुखादिशिपात्या ॰ वागादीनां तु स्मृति
निरुक्तिविवेकः मातृकुलविषयं कानीनकन्याविषयं नैतत् अन्यथा अप्रत्तानां तथा स्त्रीणां सापिंड्यं साप्तपौरुषं प्रत्तानामत्र सापिंड्यप्रा
दुःप्रजापतिरिति कौर्मेण विरोधस्यादिति रत्नाकरस्मृतिनत्राविगोडन्येषां युक्तं चैतत् अन्यथा कन्योत्पन्नौ पुरुषत्रयपर्यंतमेव मृतकं स्यान्नो
पसापत्नमातामहकुले त्वाह मिताक्षरायां शंखः यथैकजाता बहवः पृथक्क्षेत्राः पृथक् जनाः एकपिंडाः पृथक्शौचाः पिंडस्त्वावर्तते त्रिषु ।
पृथक्क्षेत्रा भिन्नजातीयस्त्रीषु जाताः पृथक् जनाः सजातीयभिन्नमातृषु जाताः अत्र त्रिपुरुषं सापिंड्यमिति विज्ञानेश्वरव्याख्यानं एष्वीचंद्रा ने
यसापिंड्यदीपिकायां त्वेवं मदनपारिजाते तु पृथक्क्षेत्रा भिन्नमातृजाः । पृथक् जना भिन्नजातीयाः एतद्विजातीयसापत्नमातृकुलविष
यं सवर्णसापत्नमातृकुले न तु पुरुषं सापिंड्यं पंचमीं सप्तमीं चैव मातृतः पितृतस्तथेति वसिष्ठोक्तेः सप्तमीमिति ब्राह्मणादीनां क्षत्रियादि
हारोत्पन्नपितृकुलविषयं तच्च तत्स्वकपोलकल्पितत्वात् कृत्यांतरविरोधाच्च निर्मूलं तस्मात्प्राच्यव्याख्यायुक्ता प्रयोगस्त्वेतत्स्मृति
तत्वादिगोडग्रंथेषु तु सपत्नमातामहकुलेयावदुक्तं वाचनिकमेव सापिंड्यमुक्तं यथाह स मनुः मातृपितृसंबद्धा आसप्तमाद्विवाह्यास्सर्व
ति आपंचमाद् न्येषां पितृपत्न्यः सर्वा मातरः स्तद्भ्रातरो मातुलास्तद्भगिन्यो मातृष्वसारस्तद्दुहितरश्च भगिन्यस्तदपत्यानि भागिनेयानि ।
अन्यथा संकरकारिणः स्यात्तस्याध्यापयितुरेतदेवेति आपंचमादिति मातृकुले त्रिगोत्रांतरविषयं वेति प्राच्याः मात्स्ये समानप्रवरांचैव

शिष्यसंतानिरेव च ब्रह्मदातु गुरोश्चैव संततिः प्रतिषिध्यते तद्भगिन्यो मातृष्वसार इति तु आकरेन पठितं नृनिहत्वनादि विवाहः य
पाद्ममर्षपरिशिष्टे अविरुद्धसंबंधामुपयच्छेतेत्युक्त्वा विरुद्धसंबंधः स्वयमेवोक्तः यथा भार्यास्वसुर्दुहिता पितृव्यपत्नी स्वसा नेति ।
बौधायनः मातुः सपत्न्या भगिनीं तत्सुतां च विवर्जयेत् अतो मातृष्वसुः सापत्नपुत्रकन्याप्यविवाह्या सा सापत्नमातृकुलजामिति मदन
पारिजातोक्तेरिति केचित् केचित्तु ज्येष्ठभ्रातापितुसम इति मनूक्तेस्तत्पत्न्या मातृत्वात् सितुर्माता महत्वाज्येष्ठभ्रातृपत्नीभगिनी न विवाह्या ।
तथा उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पितेति मनूक्तेर्गुरुपत्नीत्रिपुरुषसापिंड्यं सर्वाधिनिर्वाप्य अतस्तेषां कन्या नोद्वाह्या गायत्र्याद्युपदेष्टुश्च
कन्यां न वोढव्या हि तु गुरोश्च कन्या शिष्यो वा तत्सुतस्यापि नैष्यते वाक्संबंधकृतानां तु स्नेहसंबंधयोगिनां विवाहो न कर्तव्यो लोकगर्हा प्रसज्यत
इति वचनाच्चेत्याद्युः तत्र कंचित्यं दत्तकविषये तु च्यते तत्र गोतम उर्ध्वं सप्तमात् पितृबंधुभ्यो बीजिनश्च मातृबंधुभ्यः पंचमादिति अत्र स्मृतिचंद्रिका
नियोगाद्युत्पादयितृसाद्बीजिनो पूर्ध्वं सप्तमाद्विषयर्ति दत्तकस्य जनककुलविषयमेतदिति सापिंड्यमीमांसायां तेन दत्तस्य जनककुले साप्तपौरुषं जन
नीकुले पांचपौरुषं पालकमातृकुले त्रिपुरुषं तृयावापरार्के पैठीनसिः त्रीन्मातृतः पंच पितृतः पंचपितृतः पुरुषानतीत्योद्वहेदिति एतत्त एव व्याख्यो
दत्तकादीन्सु चान्यत्र प्रसन्नो निवृत्तपिंडगोत्रार्षेयान् प्रत्यगुच्यते पंचपितृत इति नान्यान्प्रतीति यत्तु द्व्यामुष्यायणः स्वगोत्रेषु कृतायस्कर्दत्तकीनादि
यः स्कृताः विधिना गोत्रमायांति न सापिंड्यं विधीयते यच्च वसिष्ठः अन्यशाखोद्भवोदत्तः पुत्रश्चैवोपनायितः स्वगोत्रेण स्वशाखोक्तविधिना
स्वशाखभागिति यच्च नारदः धर्मार्थं वर्धिना पुत्रास्त्वत्र दात्रेण पुत्रवत् अंशपिंडविभागित्वं तेषु केवलमीरितमिति तत्र पालककुले साप्तपौरु

न॰ सिं॰ षसापिंड्यं नत्वेवंपरं नतु सर्वथा सापिंड्यनिषेधपरमिति सापिंड्यमीमांसायां मदनपारिजातादपि दत्तकानुप्रवेशेल्पसापिंड्यं प्रतिभाति तथा
हि तेन त्रीनतीत्य एकदाहत्यस्य यं माता दत्तपुत्रीप्रति गृहीत्वा पुत्रीकृता तस्याः प्रतिग्रहीतुः कुले त्रीनतीत्येति पंचापि वा तरति यस्य दत्तपुत्रः
पिता तस्य दत्तस्य च जनककुले तादृश्यामित्युक्तं वस्तुतस्तु पूर्ववचसां महानिबंधेषु क्वाप्यनुपलंभादपरार्कादिलिखितत्वाभावाच्च वति
व्यवस्थायाश्च प्रातिभत्वानुलुल्यत्वाधरेतल्लिखितं तेषामेव शोभते मम तु पादकेकुले एकपिंडदानक्रियान्वयत्वात्पंचसप्तपौरुषसापिंड्यवी
त्तिनश्चेति गौतमोक्तेर्जनककुले पितावदेवेति युक्तं प्रतिभाति अत एवास्य द्व्यामुष्यायणत्वं हेमाद्रिप्रवरमंजरीकृन्नारायणादिभिरुक्तम्
दत्तामेश्वरेणापि कृष्णायाः कुंतिभोजस्य पालकन्यात्वेपि ऊर्ध्वं सप्तमात्पितृबंधुभ्यो बीजिनश्चेति गौतमोक्तेः रत्नमाया कृष्णायाः जनकस्य शूरसेनस्य
कुलेपि साप्तपौरुषं सापिंड्यमुक्तमपि वाकारणाग्रहणादुक्तं च सपिंड्यदीपिकायां तु दत्तक्रीतादीनां जनकगोत्रेणोपनयने तु जनककुले साप्तपौरु
२ षं सापिंड्यं पालकमातापितृकुले त्रिपुरुषं पिंडनिर्वापान्निर्वाप्यलक्षणं त्रिपुरुषं सापिंड्यं पालकगोत्रेणोपनयने तु तत्कुले साप्तपौरुषमित्युक्तं। तन्न। चूडो
पायनसंस्कारा निजगोत्रेण वै कृताः दत्ताद्यास्तनयास्ते स्युरन्यथा दास उच्यते इति कालिकापुराणादुपनयनोत्तरं दत्तकनिषेधात् त्रिपुरुषमित्यत्रापि मू
लं मृग्यमिति बालं बहूनां मातापितृद्वारकसापिंड्यवतीनां कन्यानामियं संख्या उद्वोढुः पितरौ पितुश्च पितरौ तज्जनकदंपती हि द्वे तस्य चतुष्कमष्टत्वं चतुर्णामप्य
स्येकमात्रा [illegible] षोडश वंशारंभकदंपतिप्रभृति स्त्रियाः सप्तकसंदर्भ एकैकान्वयकन्याः काः पितृकुले त्वासप्तकं संभवे। यद्यप्येकस्य बहवः सुतास्त
त्तदपि हेतु साबंधसाम्यादेकैव गणकेत्यवधार्यताम् एकस्मान्मिथुनात्कतोपि दुहिता द्वे द्वे तयोस्तस्मान्न द्वे तु चक्रमक घ्नतं तं षोडश
तो द्वेरेः पावत्सप्तमकं क्षमग्निकृतवः कन्या इह कान्वये तादृत्ते गुणिता सूरसेकवद्दशो वंशः सपिंडाः पितुः मातुर्जन्मदंपती च मिथुनद्वंद्वं तवासाग

राः सप्तस्याः पंचम पक्ष सप्तम भश्च मिमिति रित्येकान्वयः पुंसतो दृहद्वं द्वंद्वयगतनतो ब्रूयइलोद्योपचक संशरक्नोप्ययः सप्तगुणाशाराता विधवो मातुः सपि
तः कुलद्वयस्य कन्यका युता मिथः सपिंडकाः हिमांशुसूनुधराह्वं गोविवाहकर्म वर्जितैरिति एतच्च सर्ववर्णसाधारणं सर्वत्र सापिंड्यसद्भावादिति वि
ज्ञानेश्वरोक्तेः पंचमात्सप्तमादूर्ध्वं मातृतः पितृतः क्रमात् सपिंडता निवर्तेत सर्ववर्णेष्वयं विधिरिति हरनाथधृत देवलवचनाच्च संबंधतत्त्वे सुमंतुः पितृप
त्स्कृतां मातृष्वसृसुतां मातुलसुतां मातृसगोत्रां समानार्षेयीं विवाह्य चांद्रायणं चरेदित्याद्युक्तं नात्र वक्ष्यामहे इति दिक्। ऋषेरिदमार्षं प्रवरः गोत्रं च
सिद्धं समाने आर्षगोत्रे यस्य तस्मा जाता यान समा ॥ अथ संक्षेपण गोत्रप्रवरनिर्णयः तौ न भिन्नौ निषेधनिमित्तं गोत्रायइ दाहनरेनप्रयं
दि सापस्तंबोक्तेः असमानप्रवरैर्विवाह इति गौतमोक्तेश्च तत्र गोत्रलक्षणमाह प्रवरमंजर्यां बौधायनः विश्वामित्रो जमदग्निर्भरद्वाजोथ गौतमः अत्रि
र्वसिष्ठः कश्यप इत्येते सप्तर्षयः सप्तानामृषीणामगस्त्याष्टमानां यदपत्यं तद्गोत्रमिति यद्यपि केवलभार्गवविधा हितबणादिषु केवलांगिरसेषु हरितादि
षु नैतत् भृग्वंगिरसोरुक्तेष्वनंतर्गतेः तथाप्यत्रेरपत्नीरेवनीतिकेचित् अत एव स्मृत्यर्थसारे प्रवरैक्यादेव त्वाविवाह उक्तः यद्यपि वसिष्ठादीनां न गो
त्रत्वं प्रकृतं तेषां सप्तर्षित्वेन तदपत्यत्वाभावात् तथापि तत्पूर्वभावि वसिष्ठाद्यपत्येन गोत्रत्वं युक्तं अत एव पूर्वेषां परेषां चैव गोत्रं अत्र विशेषोस्मत्
प्रवरदर्पणे ज्ञेयः प्रवारास्तु प्रवरणानि प्रवराः कश्यपकाराहित्यासिष्ठेति हाना वसिष्ठवदित्यध्वर्युरित्यादिना येषां वरणमाम्नातं ते प्रवराः तत्र वरणं
यद्यपि गोत्रत्वं तस्यापि क्वचिद्दृश्यते तथापि पूर्ववद्दोषसंदोदृश्य अन्यथा तेषामार्षेय एकार्षेय इत्यादिनिर्देशानुपपत्तेः अन्येतु तद्गोत्राणामा
र्षेय इति मदनभाद्रीरिति दिक् अत्र विशेषमाह बौधायनः एक एव ऋषिर्यावत्प्रवरेष्वनुवर्तते तावत्समानगोत्रत्वमन्यत्र भृग्वंगिरसां गणादिति

स्मृत्यर्थसारः ध्रियमाणतयाबाधितत्वात्प्रवरानुवर्तनं एकस्य द्वयस्य चेत्यवगतो ऽत्रैतस्य कथ्यते भृग्वंगिरोगणेषुतु माधवीये स्मृत्यंतरे पंचानां त्रिषु सा
मान्यादविवाहस्त्रिषु द्वयोः भृग्वंगिरोगणार्षवंशेषेष्वेको ऽपि वारयेत् बौधायनो ऽपि भृग्वंगिरसां वधिरस्त्यद्व्यार्षेयसन्निपाते विवाहस्त्र्यार्षेयाणां त्र्यार्षेय
सन्निपाते विवाहः पंचार्षेयाणां पंचार्षेयाणामिति भृग्वंगिरोगणेष्वपि जमदग्निगौतमभरद्वाजेष्वेकप्रवरसाम्येपि सर्वेषामप्यसाम्येवा सगोत्रत्वादेवा विवाहइ
तिदिक् अथगोत्राणिप्रवराश्चोच्यंते तत्र बौधायनः गोत्राणांतुसहस्राणि प्रयुतान्यर्बुदानिच ऊनपंचाशदेवैषां प्रवरा ऋषिदर्शनात् तत्र सप्तभृगवः
वत्साविदा आर्ष्टिषेणा यस्कामित्रयुवः वैन्याः शुनकाइति वत्सानां भार्गवच्यावनाप्नवानौर्वजामदग्न्येति भार्गवौर्वजामदग्न्येतिवा भार्गवच्यावना
प्नवानार्ष्टिषेणानूपेति भार्गवार्ष्टिषेणानूपेतिवा एषांत्रयाणां परस्परमविवाहः वत्स्यानां भार्गवच्यावनाप्नवानेतिवत्सपुरोधसयोः पंचभार्गवच्याव
नाप्नवानवात्सपौरोधसेति बैजपनमथितयोः पंच भार्गवच्यावनाप्नवानबैजवनैमथितेति एतेत्रयः कश्चित् एषामपि पूर्वैरविवाहः अत्रतद्गणास्था
ऋषयोन्यश्च विशेषो मत्कृत प्रवरदर्पणोज्ञेयः यस्कानां भार्गववैतहव्यसावेदसेति मित्रयुवां भार्गववाध्र्यश्वदिवोदासेति भार्गवच्यावनदिवोदासेतिवा
वाध्र्यश्वेत्येकोवा वैन्यानां भार्गववैन्यपार्थेति एत एव श्येनाः शुनकानां शुनकेतिवा गार्त्समदेतिवा भार्गवगार्त्समदेतिद्वौवा भार्गवशौनहोत्रगा
र्त्समदेतित्रयोवा वेदविश्वज्योतिषां भार्गववेदवैश्वज्योतिषेति शाठरमाठराणां भार्गवशाठरमाठरेति एतौद्वौकश्चित् यस्कादीनांस्वगणेत्यन्तरं
सर्वैर्विवाहः तदुक्तं स्मृत्यर्थसारे यस्कमित्रयुवो वैन्याः शुनकाः प्रवरैक्यतः स्वंस्वंहित्वागणंसर्वैविवहेयुः पुरावरैरिति अथांगिरसः तेगौत
माः भरद्वाजाः केवलांगिरसश्चेति त्रिधा तत्र गौतमा दश अयास्याः शरद्वंताः कौमंडाः दीर्घतमसः औशनसाः कारेणुपालयः राहूगणाः

सोमराजकाः वामदेवाः बृहदुक्थाश्चेति तत्रायास्यानामांगिरसायास्यगौतमेति शरद्वंतानामांगिरसगौतमशारद्वंतेति कौमंडानामांगिरसौ
तथ्यकाक्षीवगौतकौमंडेतिवा आंगिरसौशिजकाक्षीवेति त्रयोवा दीर्घतमसामांगिरसौतथ्य काक्षीवतगौतमदैर्घतमसेति आंगिरसौत
थ्यदैर्घतमसेति त्रयोवा औशनसानामांगिरसगौतमौशनसेति त्रयः कारेणुपालानामांगिरससोमराजकगौतमेति वामदेवानामांगिरसवामदेव्य
गौतमेति बृहदुक्थानामांगिरसबार्हदुक्थगौतमेति आंगिरसवामदेवबार्हेतिवा उतथ्यानामांगिरसौतथ्यगौतमेति राहूगणानामांगिरसराहू
गणगौतमेति एतेद्वौकश्चित् एषांसर्वेषां गौतमानामविवाहः अथभरद्वाजाः ते चत्वारः भरद्वाजाः गर्गाः ऋक्षाः कपयइति भरद्वाजानामांगिरसबार्ह
स्पत्यभारद्वाजसैन्यगार्ग्येतिपंच आंगिरससैन्यगार्ग्येतिवा अंत्ययोर्व्यत्ययोवा भारद्वाजगार्ग्यसैन्येतिवा गर्गभेदानामांगिरसतैत्तिरिकापिभुवेति
ऋक्षाणां कपिलानांवा आंगिरसबार्हस्पत्यभारद्वाजवांदनमातवचसेतिपंच आंगिरसवांदनमातवचसेति त्रयोवा कपीनामांगिरसामहीयवोरुक्षय
सेति आत्मभुवामांगिरसभारद्वाजबार्हस्पत्यमंत्रवरात्मभवेतिपंच अयंकश्चित् भरद्वाजानांसर्वेषामविवाहः अथकेवलांगिरसः हरीतमांगिर
सांबरीषयौवनाश्वेति आद्यामांधातावा कुत्सानामांगिरसमांधात्रकौत्सेति कण्वानामांगिरसाजमीढकाण्वेति आंगिरसघोरकाण्वेति रथी
तराणामांगिरसवैरूपराथीतरेति आंगिरसवैरूपपार्षदश्वेतिवा अष्टादंष्ट्रपार्षदश्ववैरूपेतिवा अंत्ययोर्व्यत्ययोवा मुद्गलानामांगिरसभार्म्यश्व
मौद्गल्येति आद्यस्थाने तार्क्ष्यो वा आंगिरसतार्क्ष्यमौद्गल्येतिवा विष्णुवृद्धानामांगिरसपौरुकुत्सत्रासदस्यवेति एषांस्वगणं विहाय सर्वैर्विवाहो
भवति हरितकुत्सयोस्तुन भवति अथात्रयः ते चत्वारः आत्रेयाः वाद्भुतकाः गविष्ठिराः मुद्गलाइति आत्रेयाणामात्रेयार्चनानसश्या

वाश्वेति वा द्रुतकानामात्रेयार्चनानशावाद्रुतकेति धनंजयानामात्रेयार्चनानधानंजयेति कंचित् गविष्ठिराणामात्रेयार्चनानशगाविष्ठिरेति·
आत्रेयगाविष्ठिरपौर्वातिथेति वामुद्गलानामात्रेयार्चनानशपौर्वातिथेति वा नरथ्यस्कमंगलवैजवापनामात्रेयार्चनानततनिपति आत्रेयार्चना
नशगाविष्ठिरेति वा स्कमंगलानामत्रिस्कमंगलश्यावाश्वेति केचित् अत्रेः पुत्रिकापुत्राणामात्रेयवामरथ्यपौत्रिकेति अत्रीणां सर्वेषामविवाहः
अथ विश्वामित्राः ते दृश कुशिकाः लोहिताः रौक्षकाः कामकायनाः अजाः कताः धनंजयाः अघमर्षणाः पूरणाः इंद्रकौशिकाः इति कुशिकानां
वैश्वामित्रदेवरातौदलेति लोहितानां विश्वामित्राष्टकलौहितेति अंत्ययोर्व्यत्ययो वा वैश्वामित्रमाधुछंदसाष्टकेति वा विश्वामित्राष्टकेति द्वौ वा·
रौक्षकानां विश्वामित्रगाथिनरैवणेति वैश्वामित्ररौक्षकरैवणेति वा कामकायनानां विश्वामित्रदेवश्रवसदैवतरसेति· अजानां वैश्वामित्रमाधुछं
दसाजेति वैश्वामित्राश्मरथ्यवाधूलेति वा अघमर्षणानां विश्वामित्राघमर्षणकौशिकेति पूरणानां विश्वामित्रपौरणेति द्वौ विश्वामित्रदेव
रातपूरणेति वा इंद्रकौशिकानां विश्वामित्रेंद्रकौशिकेति द्वौ धनंजयानां विश्वामित्रमाधुछंदसधनंजयेति वैश्वामित्रमाधुछंदसाघमर्षणेति वा
कतानां वैश्वामित्रकात्याक्षीलेति एते बौधायनोक्ताः रोहिणानां वैश्वामित्रमाधुछंदसरौहिणेति रेणूनां वैश्वामित्रगाथिनरेणवेति वेणूनां वैश्वा
मित्रगाथिनवैणवेति जह्नूनां वैश्वामित्रशालंकायनकौशिकेति आश्मरथ्यानां वैश्वामित्राश्मरथ्यवाधूलेति उदवेणूनां वैश्वामित्रगाथिनरैणवेति
एते आश्वलायनमात्स्योक्ताः अन्ये त्वन्येषु ग्रंथेषूक्ताः ते न्यत्र मत्कृतौ ज्ञेयाः एषां विश्वामित्राणामविवाहः अथ कश्यपाः ते पंच निध्रु
वाः कश्यपाः शांडिलाः रेभाः लौहायश्च निध्रुवाणां काश्यपावत्सारनैध्रुवेति कश्यपानां काश्यपावत्सारासितेति रेभाणां काश्यपावत्साररैभ
गा

ति शांडिलानां काश्यपावत्सारशांडिल्येति अंत्ययोर्व्यत्ययो वा देवलो वासितो वा शांडिल्यासितदेवलेति वा काश्यपासितदेवलेति वा अंत्ययोर्व्य
त्ययो वा देवलासितेति द्वौ वा लौगाक्षीन्वक्ष्यामः एषां कश्यपानामविवाहः अथ वसिष्ठाः ते पंच वसिष्ठाः कुंडिनाः उपमन्यवः पराशराः जातू
कर्ण्याश्चेति वसिष्ठानां वासिष्ठेंद्रप्रमदाभरद्वस्विति वासिष्ठेत्येके वा· कुंडिनानां वासिष्ठमैत्रावरुणकौंडिन्येति उपमन्यूनां वासिष्ठेंद्रप्र
मदाभरद्वस्विति वसिष्ठाभरद्वस्विंद्रप्रमदेति वा आद्ययोर्व्यत्ययो वा पराशराणां वासिष्ठशाक्त्यपराशर्येति जातूकर्ण्यानां वसिष्ठात्रिजातूकर्ण्ये
ति· वासिष्ठानां सर्वेषामविवाहः अंत्यस्यात्रिभिश्च अथागस्त्याः ते चत्वारः इध्मवाहाः सोमवाहाः सांभवाहा यज्ञवाहाश्चेति· आद्या
नामागस्त्यदार्ढच्युतेध्मवाहेति आगस्त्येत्येके वा सोमवाहानामागस्त्यदार्ढच्युतसोमवाहेति सांभवाहानां सांभवाहेत्यु· यज्ञवाहानां य
ज्ञवाहेत्यु· अथापरे प्रोक्ता वेव सांभवाहानां नरदं नारत्रय· अगस्तीनामागस्त्यमाहेंद्रमायोभुवेति पूर्णमासानामागस्त्यपौर्णमासपारणेति·
हिमोदकानामागस्त्यहैमवर्चिहैमोदकेति पाणिकानामागस्त्यपैनायकपाणिकेति एते षट् कृताः अगस्तीनां सर्वेषामविवाहः अथ
द्विगोत्राः शौंगशैशिरीणामांगिरसबार्हस्पत्यभारद्वाजकात्याक्षीलेति पंचार्षाः कात्याक्षीलयोः स्थाने शौंगशैशिरीर्वा आंगिरसकात्याक्षीलेति
त्रयो वा एषां भरद्वाजैर्विश्वामित्रैश्चाविवाहः एवं कपिलानां कतानां च संकृतिपूतिमाषादीनामांगिरसगौरिवीतिसांकृत्येति·
शाक्त्यगौरिवीतिसांकृत्येति वा एषां त्रयाणामत्रिवसिष्ठैः शौंगशैशिरैर्लौगाक्षिभिश्चाविवाहः कश्यपेरपीति प्रयोगपारिजाते लौगाक्षी
णां काश्यपावत्सारवासिष्ठेति काश्यपावत्सारासितेति वा· एते द्वे वसिष्ठानांके कश्यपाः एषां वसिष्ठैः कश्यपैः संकृत्यादिभिश्चाविवाहः

नि॰ सि॰ ते

कश्यपेरपीति प्रयोगपारिजाते देवरातस्य जामदग्न्यैर्विश्वामित्रैश्चाविवाह इति प्रयोगपारिजाते धनंजयानांविश्वामित्रैरभिश्चाविवाहः आतकश्यपैर्नात
सिष्ठैरत्रिभिश्चाविवाहः एवंदत्तककृत्रिमस्वयंदत्तपुत्रिकापुत्रादीनामुत्पादकपालकयोः पित्रोर्गोत्रप्रवरावर्ज्याविति प्रवरमंजरी नारायणवृत्तिप्रयोग
पारिजातादयः अत्र सर्वत्रोपपत्तयो मूलं च मत्कृतप्रवरदर्पणे ज्ञेयमिति दिक् [illegible] नियंवध्ययोस्तु पुरोहितगोत्रप्रवरानेवोनि सर्वैः सदृशानि यद्यपि बहूनां स्वर्णाशोधि
कपिभरद्वाजयोर्विवाह उक्तस्तथापि भरद्वाजाः पंक्त्यो गर्गाः शैशिरपर्यास्तु इति चत्वारोपि भरद्वाजगोत्रे चान्योन्यं चान्यैर्युर्मिथः कपिगर्गभरद्वाजा मिथो
रोक्षायणादिजाः नोद्वहेयुः सगोत्रत्वात्प्रवरैक्यान्न कुत्रचित् इति स्मृत्यर्थसारविरोधात्कपेर्विवाह एवं तयोरिति प्रवरमंजरी स्वगोत्रप्रज्ञानेतु तत्या
पाठः अथानाज्ञानबंधोः पुरोहितप्रवरेणाचार्यप्रवरेणवेति आचार्यगोत्रप्रवरानभिज्ञस्तु द्विजः स्वयंदत्वा त्मानंतु कस्मैचिन्नकुर्यात्प्रवरोत्तरे
त पद्वास्वगोत्रप्रवर विधुरोज मद्गुण्निजाः विवाहं तन्नेनेव गोत्रेणातु समाचरेदिति कश्चित् अथगोत्रनिर्णयः शातातपः मातुलस्य सुतामू
द्वा मातृगोत्रां तथैव च समानप्रवरां चैव गत्वा चांद्रायणं चरेत् यद्यपि सगोत्रां मातुरप्येके नेच्छंत्युद्वाहकर्मणि जन्मनाम्नोरविज्ञाने युद्धहेद्वि
शंकित इति आसीत्के रजाननामत्वेन सगोत्रत्वदोषस्तथापि न दंकालोप्रवर्त्तते गोत्रान्मातुः सपिंडाश्च विवाहं गोवधस्तथेति कवित्वेत्रातेः
उद्वहं मातृगोत्रस्य उनं माध्यंदिनीयानामेवामातृगोत्रं माध्यंदिनीया नामपुत्राया श्चेति सत्याषाढोक्तेरिति कश्चित् तन्निर्मूलं अत एवाह प्रवर
मंजरीकारः दोषस्यातिगुरुत्वात्सर्वेषां मातृगोत्रं वर्ज्यमिति दिक् यत्तु एकस्मिन्प्रवरे तुल्ये मातृगोत्रवरस्य च तमुद्वाहं न कुर्वीत सा कन्या मा श्रीराम
गिनी स्मृतेति मातृकुले प्रवराद्यनमुक्तं तदासुरादिविवाहोढापरमिति दिक् विस्तरस्तु ग्रंथांतरेण्यो ज्ञेयः सगोत्रादिविवाहे प्रायश्चित्तं
स्मृत्यर्थसारे इत्युक्तं सगोत्रसंबंधविवाहविषये स्थिते यदि कश्चिज्ज्ञानतस्तां कन्यामूद्वा पगच्छति गुरुतल्पव्रतकुर्यात् इर्भ सन्ततोमातांव्रतेत

सोगमत्स्तां परित्यज्य पालयेज्जननीमिव अज्ञानादैवं वेशङ्कदौ त्रिवर्गमस्तककश्यपः एवं सापिंड्ये पिवसपिंड्या उपत्यदारेषु प्राणत्यागो विधीयत
इति हदयमोक्ते तिथितत्वे बोधायनः सपिंडां च सगोत्रां चेदूतमत्वोपयच्छे मातृवदेनां बिभृयात् कन्याविवाहकारउक्तो ज्योतिर्निबंधे षडब्दमध्ये
नोद्वाह्या कन्या वर्षद्वयं यतः सोमो भुंक्ते ततस्तद्वद्गंधर्वश्च तथानलः राजमार्तंडः अयुग्मे दुर्भगा नारी युग्मे तु विधवा भवेत् तस्माद्गर्भान्विते पु
ग्मे विवाहे सा पतिव्रता मासत्रयादूर्ध्वमयुग्मवर्षे युग्मेपि मासत्रयमेव यावत् विवाहशुद्धिं प्रवदंति संतो वात्स्यादयस्त्रीजनिजन्ममासात्
पराशरमाधवीये तु जन्मतो गर्भाधानाद्वा पंचमाद्वत्सरात्परं कुमारीवरणंदानं मेखलाबंधनं तथेत्युक्तं संवर्धतत्वे यमः कन्याद्वादशवर्षा
णि यामदत्ता वसेद्गृहे ब्रह्महत्या पितुस्तस्याः सा कन्या वरयेत्स्वयं भारते त्रिंशद्वर्षः षोडशाब्दां भार्यां विंदेत नग्निकां दशवर्षोष्टवर्षां वाध
र्मसीदतिसत्वरः मतो प्रकृते रजसि कन्यां दद्यात्पिता सकृत् तत्रैव सप्तसंवत्सरादूर्ध्वं विवाहः सार्ववर्णिकः कन्यायाः सत्यते राजन
न्यथा धर्मगर्हितः राजमार्तंडः नाद्वयस्तेन थाद्धि पितृपांत्राणसंशये अतितो ठानया कन्यानंदलानबक्षेनतु मनुः त्रिंश
द्वर्षो वहेत्कन्यां हृद्यां द्वादशवार्षिकीं त्र्यष्टवर्षोष्टवर्षां वा धर्मे सीदति सत्वरः यद्यपि विवाहस्त्वष्टवर्षायाः कन्यायाः शस्यते बुधैरिति
संवर्तोक्तेरगर्भत्वे रजस्वलत्वादर्वागेव वर्षादूर्ध्वं विवाहो निषिद्धस्तथापि पराशरमते द्वादशषोडशादब्देषु त्रीणि वर्षाण्यृतुमती काङ्क्षेत
पितृशासनमिति पराशरमाधवीय बौधायनोक्तेश्च नर्क्षवृक्षनदीनाम्नीं नांत्यपर्वतनामिकां न पक्ष्यहिप्रेष्यनाम्नीं न च भीषणनामिकां
यमः तस्मादुद्वाहयेत्कन्यां यावन्नर्तुमती भवेत् तथा मूक आदीनां प्रागुक्तं तथावर्णविरहस्यगह ८ हमेत्यादि घटितविनाल्मोतिर्निर्दिष्टो

नि·सि·त·

ज्ञेयः विस्तरान्नुनोच्यते अथ गुर्वर्कचंद्रबलं ज्योतिर्निबंधे वर्गः स्त्रीणां गुरुबलं श्रेष्ठं पुरुषाणां रवेर्बलं तयोश्चंद्रबलं श्रेष्ठमिति गर्गेणोक्ता
वित्तं जन्मत्रिदशमारिस्थः पूजयाशुभदो गुरुः विवाहे च चतुर्थाष्टद्वादशस्थो मृतिप्रदः देवलः नष्टात्मजा धनवती विधवा कुशीला
पुत्रान्विताहतधवा सुभगा विपुत्रा स्वामिप्रिया विगतपुत्रधवा धनाढ्या वंध्या भवेत्सुरगुरौ क्रमशोऽस्तिजन्म बृहस्पतिः अपनाप
कुलीरस्थो जीवो नापशुभो गोचरः अतिशोभनतां दद्याद्विवाहोपनयादिषु लल्लः द्वादशाष्टमचतुर्थजन्मनि षष्ठार्थ्ये मतृतीयके त्राप्नेष
णिनद्वयोऽतीव वेशधाव्यमाप्नोति गर्गः सर्वत्रापि शुभदः स्याद्वादशाष्टांतरं गुरुः पंचषष्ठार्थ्यारिवेशुभस्सगोचरतामतः सप्तमात्पंचम
वर्षेषु स्वोच्चस्वक्षेत्रगतोऽयदि अशुभोपि शुभं दद्याच्छुभक्षेत्रे किं पुनः रजस्वलायाः कन्यायाः गुरुशुद्धिं न चिंतयेत् अष्टमेपि प्रकर्तव्यो
विवाहस्त्रिगुणार्चनात् अर्कगुर्वोर्बलं गौर्योः रोहिण्यर्कबलं स्मृतं कन्यायां चंद्रबलं प्रोक्तं वृषली लग्नतो बलं अष्टवर्षा भवेद्गौरी
नववर्षा च रोहिणी दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला अथ बृहस्पतिशांतिः शौनकः कन्याकोद्वाहकाले तु आनुकूल्यं न विद्यते श्री
ब्राह्मणस्योपनयने गुरोर्विधिरुदाहृतः स्वर्णेन गुरुं कृत्वा पीतवस्त्रेण वेष्टयेत् ईशान्यां धवलं कुंभं धान्योपरि निधापयेत् दमनं मधुप
र्णं पलाशं च वसर्षपान् मांसीगुडूच्यपामार्गी विडंगी शंखिनी वच सहदेवी हरिक्रांता सर्वौषधिर्न्यातावरी बलांनं सहदेवीन निशाद्वित
यमेव च कृत्वाज्यस्नानपर्यंतं स्वशाखोक्तविधानतः गृहोक्तमंडले यचश्च पीतपुष्पाक्षतादिभिः देवपूजोत्तरकाले ततः कुंभानुमंत्रणं।
अश्वत्थसमिधश्चाज्यं पायसं सर्पिषायुतं यवव्रीहितिलाः साज्या मंत्रेण वृहस्पते अष्टोत्तरशतं सर्वं होमशेषं समापयेत् पुत्रदार
समेतस्य अभिषेकं समाचरेत् कुंभाभिमंत्रणोक्तैश्च समुद्रज्येष्ठमंत्रतः प्रतिमां कुंभवस्त्रं च आचार्याय निवेदयेत् ब्राह्मणांश्च भोज

येत्पश्चाच्छुभदः स्यान्नसंशयः इति बृहस्पतिशांतिः शौनकः गुर्वादित्ये व्यतीपाते वक्रातिचारगे गुरौ नष्टे शशिनि शुक्रे वा बाल्ये
के वृद्धे च वा गुरौ पौषे चैत्रे च वर्षासु क्षयाधिकमासके केतूद्गमे निरंशेर्के सिंहस्थे चरमांशेणि विवाहव्रतयात्रादि पुरहर्म्यगृहादिकं
प्रारंभियोपविद्धांश्च यत्नतः परिवर्जयेत् मदनपारिजाते ज्योतिःसागरे बालेशुक्रे वृद्धेशुक्रे च वृद्धे जीवे च जीवे सिंहे सिंहादित्ये जीवादि
त्ये तथा फाल्गुनमासि क्रूरा न चार्येति सारगे नापी कूपविवाहादि क्रियाः प्रागुदिता स्त्यजेत् सिंहस्थं मकरस्थं च गुरुं यत्नेन वर्जये
त् लल्लः अतिचारगतो जीवस्तं राशिं नैति चेत्पुनः लुप्तः संवत्सरो ज्ञेयः सर्वकर्मबहिष्कृतः सिंहस्थगुरोरपवादमाह पराशरः गोदा
भागीरथीमध्ये नोद्वाहः सिंहगे गुरौ मघास्थे सर्पदेत्राप्युत्तपामीन्नगतरवौ वसिष्ठोपि विवाहो दक्षिणे कूले गौतम्या नेतरत्र तु भा
गीरथ्युत्तरे कूले गौतम्या दक्षिणे तथा विवाहो व्रतबंधश्च सिंहस्थेज्ये न दुष्यति कन्यादातृक्रममाह याज्ञवल्क्यः पिता पितामहो भ्राता सकु
ल्यो जननी तथा कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः अप्रयच्छन्समाप्नोति भ्रूणहत्यामृतावृतौ गम्यं त्वभावे दातॄणां कन्या कुर्यात्स्वयंवरं
भ्रातॄणामसंस्कृतानामनधिकारमाह याज्ञवल्क्यः असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः भगिन्यश्च निजादंशाद्दत्वांशं तु तुरीयकं अ
नेन कारणपूर्वसंस्कृतानित्यस्यानुवृत्तेर्विवाहपर्याप्तद्रव्यदानेन संस्कृतस्य ग्रहणां व्ययं स्यात् अतः कर्तृनियमाय तेनानुपनीतभ्रात्रा माताचासत्वे
मातापितृपर्यंताधिकारीन्न भ्रातृत्वसंबंधतत्त्वादौ कन्याश्च स्वयं वरमातु दातृत्वेन तायामेव नांदीश्राद्धं कार्यं तत्र च स्वयं प्रधानसंकल्पमात्रं कृत्वा
न्यद्ब्राह्मणद्वारा कारयेदिति प्रयोगपारिजाते वरस्तु असंस्कृतात्रात्रापि प्रमाव स्वयमेव नांदीश्राद्धं कुर्यान्न माता पुत्रे पुत्रिपमाने पुनान्यं तेकारम

·सिं·धु·

स्वधामितिनिषेधादुपनयनेनकर्माधिकारस्यजातत्वाज्जैतिपृथ्वीचंद्रोदये माधवीयपाठेन नारदः पितादद्यात्स्वयंकन्यांभ्रातावानुमतेपितुः
मातामहोमातुलश्चैवसकुल्योबांधवस्तथा मातात्वसत्सुसर्वेषांप्रकृतौयदिवर्तते तस्यामप्रकृतिस्थायांकन्यांदद्युःस्वजातयः सकुल्यःपितृव्य
स्तीयः बांधवोमातृवंश्यः मदनपारिजाते कात्यायनः स्वयमेवौरसींदद्यात्पित्रभावेस्वबांधवाः मातामहस्ततोन्योहिमातावाधर्मतःसुतां
ततोन्यामौरसींपित्रोधर्मजांनियोगात्क्षेत्रजांमातामहोमातामातुलोवानदद्यात् ततोप्यसौदनेपितृवंश्यपुरुषस्तस्मात्मातामहादीनांनापि
कारः अस्यापवादस्तत्रैव दीर्घप्रवासयुक्तेषुपौगंडेषुचबंधुषु मातातुसमयेदद्यादौरसीमपिकन्यकां मनुः यदातुनैवकश्चित्स्यात्क
न्यांराजानमाव्रजेत् परिक्रीयकन्याहर्तानोविशेषोमदनरत्नेसंस्कारे आत्मीकृत्यसवर्णायपरकीयानुकन्यकां धर्मेणविधिनादानमसगो
त्रेपियुज्यते अत्रप्रकृतिस्थग्रहणादप्रकृतिस्थेनकृतमकृतमेव स्वतंत्रायाहितत्कार्यंकुर्यादप्रकृतिंगतः इतरप्रकृतमेवस्यादस्वातंत्र्य
स्यहेतुतः इत्यपराकेनारदोक्तेः यदितुसप्तपदीविवाहहोमादिप्रधानंजातं तदागोत्रैकत्वेतिनात्रनिर्विवाहस्य गोत्रांतरमाहुः तत्रैवमरी
चिः गौरींददन्नाकपृष्ठंवैकुंठंरोहिणींददत् कन्यांददद्ब्रह्मलोकंरौरवंतुरजस्वलां अथमासनिर्णयः तत्रजन्ममासनिषेधःप्रागुक्तः श्रीराम
ज्योतिःप्रकाशेव्यासः माघफाल्गुनवैशाखेषुमार्गशीर्षके ज्येष्ठेचाषाढमासेचसाकन्यावित्तसंयुता श्रावणेवापिपौषेवाकन्या
भाद्रपदेतथाचैत्राश्वयुक्कार्तिकेषुयातिवैधव्यतांलघु नारदः माघफाल्गुनवैशाखज्येष्ठमासाःशुभावहाः कार्तिकोमार्गशीर्षश्चमध्य
मानितिरेताःपरे वसिष्ठः पौषेपिकुर्यान्मकरस्थितेर्के चैत्रेभवेन्मेषगतेयदास्यात् प्रशस्तमाङ्गल्यविवाहपदं तिगगांमिथुनस्थितेर्के
×पाठ×

नद्विगुस्वराः मार्गेमासितथाज्येष्ठेक्षौरंपरिणयंव्रतं ज्येष्ठपुत्रदुहित्रोस्तुयत्नेनपरिवर्जयेत् कृत्तिकास्थरविंत्यक्त्वाज्येष्ठपुत्रस्यका
रयेत् उत्सवादिषुकार्येषुदिनानिदशवर्जयेत् रत्नकोशे जन्मर्क्षेजन्मदिवसेजन्ममासेशुभंत्यजेत् ज्येष्ठमासेवृषगतेस्य
र्केसंवर्जेत्स्त्रियाअपि पराशरः अज्येष्ठाकन्यकायत्रज्येष्ठपुत्रोवरोयदि व्यत्ययेज्येष्ठयोर्बालयोस्तत्रज्येष्ठोमासःशुभप्रदः।
मिहिरः ज्येष्ठपुत्रस्यज्येष्ठकन्यायाविवाहोनप्रशस्यते तयोरन्यतरज्येष्ठेज्येष्ठोमासःप्रशस्यते द्वौज्येष्ठौमध्यमौप्रोक्तावेकज्येष्ठं
शुभावहं ज्येष्ठत्रयंनकुर्वीतविवाहेसर्वसंमतं युक्तसारेकेवलमेकविवाहमितितद्भास्करादिविवाहविषयं धर्मेषुविवाहेषुकालपरी
क्षणंनाधर्म्येविनिगस्त्यपरिशिष्टात् रत्नमालायामप्येवं अथदशदोषाः व्यवहारोच्चयेविद्धपादलत्तापातयोर्विपातःस्वाजरेवेधोदशयो
गः कांतिसाम्यमित्रमुपग्रहश्चबाणाख्यवः ज्ञेयादशेवदोषाः एषांलक्षणंज्योतिषेज्ञेयं अतीचारगतेगुरौनृसिंहः अतीचारगते
जीवेवर्जयेत्तदनंतरं विवाहादिषुकार्येषु अष्टाविंशतिवासरान् रत्नमालायां एकपंचनवयुग्मषड्दशरात्रीणिसप्त८चतुरष्टचात्मेदः
द्वादशाजदशकादिराशितोघातचंद्रइतिकीर्तितोबुधे नारदः भूबाणनंदहस्ताभ्रवसासिंग्वांक्रि रौल्कांशाः वेददावसुशिवादित्या
घातचंद्रोयथाक्रमं यात्रायांयुद्धकार्येषुघातचंद्रंविवर्जयेत् विवाहेसर्वमांगल्येचौलादौव्रतबंधने घातचंद्रोनैवचिंत्यइतिपारा
शरोक्तेः ज्योतिर्निबंधेविवाहचौलव्रतबंधयज्ञेपट्टाभिषेकेचतथैवराज्ञां सीमंतयात्रावितिभ्येवल्लाने नोविचिंतनीयः

ने. ति. त.

खलुघातवंद्ः मारः अकालजातमेवपुत्र्यद्विरुक्तीहस्तदृश्यः अथर्कपरिवेषद्वितापाद्भ्रमेयोर्यदि दोषायमंगलेनमदोषायेनकालजाः
अकालवृष्टिस्वरूपमा हुल्लुः पौषादिचतुरोमासानकालेकालजाश्रिरकालजो भवति शार्ङ्गधरः निर्घातक्षितिचलनग्रहणकेतुगतद्दर्शनेनन आ
पंचाहिनात्कन्यापरिणीतानाशमुपयाति उल्कापातदिवापरिवेषकपनरजोभ्रमनिर्घातविपर्ययदृष्टप्रथ केदोषाद्दृपुसकलवधूस्याज्य
मेवकरात्र दुःस्वप्नदुर्निमित्तक्षुतस्फकदरोदुर्मनात्मानतमुद्धोनोत्तिभोजी निर्वर्यपरिणयनविधासर्वदाज्ञाज्ञमेव ज्योतिःप्रकाशे
अवगोपवशनाद्यःसंक्रांतिःपुण्यहाःपरतरः उपनयनव्रतयात्रापरिणयनादौ विकल्पोस्तीत्यगर्गः दिग्दाहहिमनिमेकेनमहसप्तदिनानि
तु भूकंपवसमुत्पन्नेत्र्यहमेवतुवर्जयेत् उल्कापातेत्रिदिवसांधूमेपंचदिनानच घर्जपातेनेकदिनंवर्जयेत्सर्वकर्मसु दर्शनादर्शनादादुकेतोः
सप्तदिनंत्यजेत् पावकेनदमस्ताभ्रमःसमयोस्तन अस्यापवादोद्भुतसागरे अथदिवसत्रयमभ्रोमृदुपानीयंदयदारशेवयि ते अत्रा
तद्दोषशमनंतदेवशंसाद्भरावार्यः सर्वधनतले भूकंपादेनदोषोस्तिवृद्धिस्यादु कृतेसनि अथापरिहार्यकन्याभावेधव्ययोगेविवापत्यने वा
ऽवैधव्ययोगेतुकुंभदुत्पत्तिमादिभिः कृत्वालग्नेततःपश्चात्कन्योद्वाह्येतिचापरे तत्रपुनर्भूदोषाभावेनकोविधानस्वर्णरौप्यवर्णेवापिपल्लानां
वप्रतिमाविष्णुरूपिणी तयासहविवाहेतुपुनर्भूत्वंनजायते सूर्यारूपासंवादे विवाहात्पूर्वकालेचदद्यैनारावकान्विने विवाहात्केनमंपन्या
कुंभेनसहवोद्धृते तत्रेणविधिवत्सम्यग्दृत्तानुविधानतः कुंकुमालंकृतंदेहंतयोरेकांतमंदिरे ततःकुंभंचनिःसार्य प्रसज्यसलिलाशयेः
ततोभिषेचनंकुर्यात्पंचापल्लववारिभि कुंभेप्रार्थनातवैव वरुणांगस्वरूपायजीवनानांसमाश्रये पतिंजीवयकन्यायाश्चिरंपुत्रसु
खंकुरुदेहि विष्णुवरादेवकन्यांपालयदुःखतः ततोलंकारवस्त्राढ्यांवरायप्रतिपादयेत् इतिकुंभविवाहः मर्त्तिदानमपितत्रैवोक्तं

श्रीराम

स्वर्णयांसाधुमामंथ्यसंपूज्यविधिवद्धार्हज्जै तस्येर्याद्विधानेनविष्णोर्मूर्तिचतुर्भुजां शुद्धुवर्णांस्वर्णेनवित्तंशाक्यापिवापुनः निर्मितांश
चिरांशंखगदानक्राभ्रसंयुतां दधानांवामसीपीतेकुमुदोत्सकमालिनीं सदक्षिणांचतांदद्यान्मंत्रमेनमुदीरयेत् यन्मयाप्राचिजनुषिघ्नत्या
पतिसमागमम् विषोपविषशस्त्राद्यैर्हतोवातिविरक्तया प्राप्यमाणंमहाघोरंयशःसौख्यधनापहं वैधव्याद्यतिदुःखौघनाशायसुख
लब्धये बहुसौभाग्यलब्ध्यैवमहाविष्णोरिमांतनुं सौवर्णांनिर्मितांशक्त्यातुभ्यंसंप्रददेद्विज अनघाद्याहमस्मीतित्रिवारंप्रजपेदिति
एवमस्त्विचिततस्यांकी गृहीत्वास्वगृहंव्रजेत् ततोवैवाहिकंकुर्याद्विधिदानामृगीदृशः अन्येप्यश्वत्थविवाहइत्संसेवनादयस्तत्रैवज्ञे
याः विस्तरभयान्नोच्यते अपप्रतिकूलादि ज्योतिर्निबंधेगर्गः कृतेतुनिश्चयेपश्चान्मृत्युर्भवतिकस्यचित् तदानमंगलंकुर्यात्कुन
वैधव्यमाप्नुयात् ज्योतिर्निबंधतिथिः वधूवरार्थघटितेसुनिश्चितेवरस्यगेहेप्ययकन्यकायाः मृत्युर्यदिस्यान्मनुजकस्यचित्तदान
कार्यंखलुमंगलं बुधैः मंगलविवाहः स्मृतिचंद्रिकायां कृतेयानिदृश्चयेपश्चान्मृत्युर्मर्त्त्यस्यगोत्रिणः तदानमंगलंकार्यंनारीवैधव्य
दं ध्रुवां भृगुः वाग्दानानंतरंयत्रकुलयोःकस्यचिन्मृतिः तदोद्वाहोनेवकार्यः स्ववंशक्षयदोयतः शौनकः वरवध्वोर्नपितामा
तापितृव्यश्चसहोदरः एतेषांचप्रतिकूलेनमहानिःप्रत्यवायं भवेत् पितामातामहश्चैवमातानेवपितामही पितृव्यस्त्रीसुतोभ्रा
तामभिनीत्वविवाहिता एभिरत्रविपन्नैश्चप्रतिकूलंबुधैःस्मृतं अन्यैरपिविपन्नैस्तुकुलेवृद्धेनतद्भवेत् मांडव्यः वा
ग्दानानंतरंमातापितायत्रविपद्यते विवाहोनैवकर्तव्यःस्ववंशहितमिच्छता संकटेतुमासातिथिः वाग्दानानंतरंयत्र
कुलयोःकस्यचिन्मृतिः तदासंवत्सरादूर्ध्वंविवाहःशुभदोभवेत् स्मृतिरत्नावल्यां पितुरवमत्रोर्नस्यात्तदर्धमातुरेवच

नि॰ सिं॰ त॰

४०

मासत्रयं तु भार्यायास्तदर्धं भ्रातृपुत्रयोः अन्येषां तु सपिंडानां माशौचं मासमीरितं तदंते शांतिकं कृत्वा ततो लग्नं विधीयते ज्योतिः
प्रकाशे प्रतिकूलेपि कर्त्तव्यो विवाहो मासतः परः शांतिं विधाय गौरीं चावादानादि नैरृत्पुनः शांतिं विनायकशांतिं तथा मेधाति
थिः संकटे समनुप्राप्ते याज्ञवल्क्येन योगिना शांतिरुक्ता गणेशस्य कृत्वा तां देवमानेरीरिति प्रतिकूले न कर्त्तव्यो गच्छ
घावद्वत्सरत्रयं प्रतिकूलेपि कर्त्तव्यमित्याकुर्वन्कुविप्लुव स प्रतिकूले सपिंडस्य मासमेकं विवर्जयेत् ज्योतिःसारे दुर्भि
क्षे राष्ट्रभंगे च पित्रोर्वा प्राणसंशये प्रौढायामपि कन्यायां नानुकूल्यं प्रतीक्ष्यते मेधातिथिः पुरुषत्रयपर्यंतं प्र
तिकूलं स्वगोत्रिणां प्रवेशान्निर्गमस्तद्वत्तथा मुंडनमंडने व्रतकर्माण्यां निर्वर्त्य प्रयत्नात्युदयक्रियां आनंतुर्यंन
तःपुंसि पंचमेशकस्तदंतं वतः अथ रजोदोषनिर्णयः माधवीये प्रारंभात्प्राग्विवाहस्य माता यदि रजस्वला निर्वृत्ति
स्तस्य कर्त्तव्या सहस्रश्रुतिचोदनात् भारसाज्नाद्भिराद्धान्नः नांदीमुखं विवाहादि दिनत्रयादिनात्पश्च प्रारंभात्कि मेधा
तिथिः चौलव्रतबंधेन विवाहे यज्ञकर्मणि भार्या रजस्वला यस्य प्रायस्तस्य न शोभनं वधूवरान्यतमयोर्जननी
चेद्रजस्वला तस्यां शुद्धेः परं कार्यं मांगल्यं मनुरब्रवीत् वृद्धमनुः विवाहव्रतचूडासु माता यदि रजस्वला तदा न मंगलं कार्यं शुद्धौ का
कार्यं शुभेप्सुभिः गर्गः मत्योद्वाहादिमांगल्ये माता यदि रजस्वला तदा न तत्प्रकर्त्तव्यमायुःक्षयकरं यतः नांदीश्राद्धोत्तरं रजोदोषाकपर्दिका॰

श्रीराम॰

रिकासु। सूतिकोदक्ययोः शुद्धौ गांधर्वाहोमपूर्वकं। प्रोक्तकर्मणि शुद्धिः स्यादितरस्मिन्नशुद्धिमान्। अलाभे सुमुहूर्त्तस्य रजोदोषेस्व
संगते। श्रियं संपूज्य तत्कुर्यात्पाणिग्रहणमंगलं। हैमीं माषमितां पद्मां श्रीसूक्तविधिनार्चयेत्। प्रस्थ चंपायसं हुत्वा अभि
षेकं समाचरेदिति। अथैकक्रिया निर्णयः। ज्योतिर्निबंधे वृद्धमनुः। एकमातृजयोरेकवत्सरे पुरुषस्त्रियोः। न समानक्रियां
कुर्यान्मातृभेदे विधीयते। एतेन एकस्य पुंसो विवाहद्वयमेकदिने निषिद्धं। मातृभेदाभावात्। नारदः। पुत्रोद्वाहात्परं पुत्री विवाहो न
ऋतुत्रये। न तयोर्व्रतमुद्वाहो मंडनादपि मुंडनं। वराहः। विवाहस्त्वेकजातानां षण्मासाभ्यंतरे यदि। असंशयं त्रिभिर्वर्षैस्त
त्रैका विधवा भवेत्। मदनरत्ने वसिष्ठः। न पुंविवाहोर्ध्वमृतुत्रयेपि विवाहकार्यं दुहितुः प्रकुर्यात्। न मंडनाच्चापि हि मुं
डनं च गोत्रैकतायां यदि नाब्दभेदः। एकोदरभ्रातृविवाहकृत्यं स्वसुर्न पाणिग्रहणं विधेयं। षण्मासमध्ये मुनयः समूचु
र्न मुंडनं मंडनतोपि कार्यं। एतदपवादस्तत्रैव। ऋतुत्रयस्य मध्ये चेन्नाब्दस्य प्रवेशनं। तदाप्येकोदरस्यापि विवा
हस्तत्प्रशस्यते। सारावल्यां। फाल्गुने चैत्रमासे तु पुत्रोद्वाहोपनायने। भेदादब्दस्य कुर्वीत नर्तुत्रयविलंबनं। संहि
तादीपे। ऊर्ध्वं विवाहात्तनयस्य नैव कार्यो विवाहो दुहितुः समार्द्धं। अप्राप्य कन्यां श्वशुरालयं च वधूप्रवेशा

स्य॰

संकटे एकप्रसूतविधौ
उद्वाहनिर्णयः

त्वच्यप्रकं न वादो। मदनरत्ने वसिष्ठः। द्विशो भिन्नं तैकारे हे पिने ष्टं शुभं तु पश्चान्नवमेऽपि दिने शुभं। आवश्यके शोभनमुत्सवो वा दो
रेथवा चार्यविभेदतो वा। एकोदरप्रसूतानां नानि कार्यत्रयं भवेत्। भिन्नोदरप्रसूतानां नेति रात तपो ब्रवीत्। ज्योतिर्निबंधे
कात्यायनः। कुर्के सतु द्वयादर्वाक्तु ऽन्नान्न तु मंडनं। प्रवेशान्निर्गमो नेष्टो न कुर्यान्मंगलत्रयं। कुर्वन्ति मुनयः केचिदन्यस्मि
न्वत्सरे लघु। लाघुवा गुरु वा कार्यं प्राप्तं नैमित्तिकं तु यत्। पुत्रोद्वाहः प्रवेशाख्यः कन्योद्वाहस्तु निर्गमः। मुंडनं चौलमित्युक्तं
व्रतोद्वाहौ तु मंडनं। चौलं मुंडनमेवोक्तं वर्जयेन्मंडनात्परं। मौंजी चोभयतः कार्या यतो मौंजी न मुंडनं। अभिन्नेवत्सरे पि स्यात्
दहस्तत्र भेदयेत्। अभेदे तु विनाशः स्यान्न कुर्यादेकमंडपे। संकटे तु कपर्दिकारिका। वराहमिहिरश्चैव उद्वाह्य पुत्रीं नृपि
सी विदध्यात्सुश्चान्तरस्योद्वहनं कदापि। याव च तु र्वेदिनमत्र पूर्वं समाप्य चान्योद्वहनं विदध्यात्। कश्यपः। मौंजीबंध
स्तथोद्वाहः षण्मासाभ्यन्तरेऽपि वा। पुत्र्युद्वाहं न कुर्वीत विभक्तानां न दोषकृत्। ज्योतिर्निबंधे। विवाहमारभ्य चतुर्थि
मध्ये तदाहूस्विं दर्शदिनं यदि स्यात्। वैधव्यमाप्नोति तदा स कन्या जीवेत्पतिश्चेदनपत्यता स्यात्। तथा। स्वविवाहमध्ये
यदि वसिया हस्तत्र खमुरूव्याः पितरो नयांति। दर्शे विवाहे परतस्तु कुर्याद्दिग्वाहसदोभिर्न तु दूषयेत्तं। येवा भिद्रूरूपयं

विसवधाभिरितिश्रुतेश्च। मासिकविषये हेमाद्रौ शाट्यायनिः। प्रेतश्राद्धानि सर्वाणि सपिंडीकरणं तथा। अपकृष्यापि कु
र्वति कर्तुं नांदीमुखं द्विजः। ऋद्धिं विना पकर्षं दोषमाह। तत्रैव उशनाः। वृद्धिश्राद्धविहीनस्तु प्रेतश्राद्धानि यश्चरेत्। स
श्राद्धी नरके घोरे पितृभिः सह मज्जतीति। मेधातिथिः। प्रेतकर्माण्यनिर्वर्त्य चरेन्नाभ्युदयक्रियां। आ चतुर्थं ततः पुं
सि पंचमेशुभदं भवेत्। स्मृत्यंतरे। सपिंडीकरणादर्वाग् अपकृष्य कृतान्यपि। पुनरप्यपकृष्यन्ते वृद्ध्युत्तरनिषेधनात्। स्मृति
सारावल्यां। रत्न पुगे स्वस्य युगे श्रात्रु स्वस्य युगे तथा। एकस्मिन्मंडपे चैव न कुर्यान्मंडनद्वयं। सोदरविषयमेतत्। ततः
एकोदरप्रसूतानामेकस्मिन्वासरे पुनः। विवाहं नैव कुर्वीत मंडनोपरि मुंडनं। गार्ग्यः। भ्रातृयुगे स्वसृयुगे भ्रातृ
स्वसृयुगे तथा। न कुर्यान्मंगलं किंचिदेकस्मिन्मंडपेऽहनि। एकस्मिन्वासरे प्राप्ते कुर्याद्यमकजातयोः। क्षौरं
चैव विवाहं च मौंजीबंधनमेव च। ज्योतिर्विवरणे। एकोदरयोर्द्वयोरेकस्मिन्नुद्वहने भवेन्नाशः। नयंतरे एकदिने कैष्या
दि संकटे च शुभं। ऊर्ध्वं विवाहात्पुत्रस्य नारीविवाहो मंगलं तु त्रयं स्यात्। नारीविवाहात्तु रहे विशस्तत दस्यपा
णिग्रहमाह राघवः। भिन्नमातृजयोस्तु एकवासरे विवाहमाह मेधातिथिः स्पष्टं। न तयोः कार्यो विवाहस्त

नि. सिं.

कवासरे।एकस्मिन्मंडपेकार्यःपुष्पवैदिकयोस्तथा।पुष्पदंतिकयोःकार्यस्त्रीणांतशिरस्कयोः।भगिनीभ्यामुभाभ्यां
चयावत्सप्तमपदीभवेत्।यमयोस्तुविशेषः।भट्टकारिकायां।एकस्मिन्वत्सरेचैववासरेमंडपेतथा।कर्तव्यंमंगलंस्वस्रोर्भ्रात्रो
र्यमजातयोः।ज्योतिर्निबंधेनारदः।प्रत्युद्वाहोनैवकार्योनैकस्मैदुहितृद्वयं।नैवैकजन्ययोः।पुंसोरेकजन्येतुकन्यकेन
था।नैवकस्याविदुद्वाहोनैकदामुंडनद्वयं।नैकजन्येतुकन्येद्वेपुत्रयोरेकजन्ययोः।नपुत्रीद्वयमेकस्मैप्रदद्यात्तुकदाचनेति।
कन्यायारजोदर्शनेतुअपरार्केसंवर्तः।मातायोवापिताचैवज्येष्ठभ्रातातथैवच।त्रयस्तेनरकंयांतिदृष्ट्वाकन्यांरजस्वलां।हा
रीतः।पितुर्गेहेतुयाकन्यारजःपश्यत्यसंस्कृता।साकन्यावृषलीज्ञेयानसनिर्वृषलीपतिः।देवलत्रीकश्यपाः।पूर्वार्धंतदेव।भ्रूणह
त्यापितुस्तस्याःसाकन्यावृषलीस्मृता।यस्तांसमुद्वहेत्कन्यांब्राह्मणोज्ञानदुर्बलः।अश्राद्धेयमपांक्तेयंतंविद्याद्वृषलीपतिं।माधवी
येबौधायनः।त्रीणिवर्षाण्यृतुमतीकांक्षेतपितृशासनं।विष्णुः।ऋतुत्रयमुपास्यैवकन्याकुर्यात्स्वयंवरं।अत्रवरस्यदोषाभावमाह
यमः।कन्याद्वादशवर्षाणियाऽप्रदत्तावसेद्गृहे।भ्रूणहत्यापितुस्तस्याःसाकन्यावरयेत्स्वयं।एवंचोपनतांपत्नींनावमन्येत्कदाच
न।नर्तुतांबंधकींवियात्मनुःस्वायंभुवोब्रवीत्।मनुः।अलंकारंनाददीतपितृदत्तंमातृदत्तंस्तेयंस्याद्यदितंहरेत्।वरंप्रत्याहपि
त्रेनदद्याच्छुल्कंतुकन्यामृतुमतींहरन्।सहिस्वाम्यादतिक्रामेदृतूनांप्रतिरोधनात्।अत्रप्रायश्चित्तमुक्तमाश्वलायनेन।कन्यामृतुम

तीमुद्वाह्यकृत्वानिष्कृतिमात्मनः।शुद्धिंचकारयित्वातामुद्वहेदान्यशंस्यधीः।पिताऋतुत्वपुत्र्यास्तुगणयेद्दाहिनःसुधीः।दानावधिगृहेस्य
तांपालयेद्रजोवतीं।दद्यात्तदृतुसंख्यागाः।शौनकः।कन्यापितायदि।दातव्येकालेनिःस्वःस्वदानेतस्याययथाविधि।दद्याद्ब्राह्मणे
भ्योमतिनिःस्वःसदक्षिणां।नेस्यतीतांतुसंरक्ष्येषुवरायप्रतिपादयेत्।उपोष्यत्रिदिनंकन्यारात्रौपीत्वागवांपयः।अदृष्टरजसेदद्या
त्कन्यायैरत्नभूषणं।तामुद्वहन्वरश्चापिकूष्मांडैर्जुहुयाद्घृतमिति।मदनपारिजातेगोपथपर्वे।विवाहेविततेतंत्रेहोमकालउपस्थिते।
कन्यामृतुमतींदृष्ट्वाकथंकुर्वंतियाज्ञिकाः।स्नापयित्वाततांकन्यामर्चयित्वायथाविधि।युंजानायाहुतींहुत्वाततस्तंत्रंप्रवर्तये
त्।अत्रगांधर्वादिष्टौविवाहास्तदवस्थायाकारेज्ञेया।संकटेपैशाचमाह।माधवीयेवत्सः।सर्वोपायैरसाध्यास्यात्कन्यापुरुषस्य
या।चौर्येणापिविवाहेनसाविवाह्यारहःस्थिता।गांधर्वादिविवाहेष्वग्न्युदकपूर्वकंदानमाहतत्रैवयमः।नोदकेननवावाचाकन्यायाःप
तिरुच्यते।पाणिग्रहणसंस्कारात्पतित्वंसप्तमेपदे।पराशरमाधवीयेदेवलः।पि।गांधर्वादिविवाहेषुपुनर्वैवाहिकोविधिः।क
र्तव्यस्त्रिभिर्वर्णैःसमर्थेनाग्निसाक्षिकं।तत्रैवपरिशिष्टे।गांधर्वासुरपैशाचाविवाहाराक्षसश्चयः।पूर्वंपरिणयस्तेषांपश्चा
द्धोमोविधीयते।अतोहोमादावकृतेभार्यात्वाभावाद्वरांतरायदद्यात्।तथाचतत्रैववसिष्ठबौधायनौ।बलादपहृताकन्यामंत्रै
र्यदिनसंस्कृता।अन्यस्मैविधिवद्देयायथाकन्यातथैवसेतिमदनपारिजातेनारदः।पाणिग्रहणिकामंत्रानियतंदारलक्षणं।तेषां

निशाचविज्ञेयाविद्वद्भिः सप्तमेपदे। स्मृतिमंद्रिकायामपरार्के चैवं। आशौचेतुयत्तवल्क्यः। दत्ते विवाहयते चसंग्रामेदेशविप्लवे। अर्थयापि
चकष्टायांसद्यःशौचंविधीयते। केचामित्यपेक्षिते ब्रह्मपुराणेउक्तं। दातुः प्रतिग्रहीतुश्च कन्यादानेचनेप्सवेत। विवाहयिष्योः कन्यायाओ
जाहोमादिकमणितिति। व्रतयत्तविवाहेषु श्राद्धे होमेर्चनेजपे। आरब्धेसूतकंनस्यादनारब्धेतुसूतकमितिविष्णुवचनोच। प्रारंभश्च
नैवोक्तः। प्रारंभोवरणंयज्ञे संकल्पोव्रतसत्रयोः। नांदीमुखंविवाहादौ श्राद्धेपाकपरिक्रियेति। वरणमितिमधुपर्कपरं।
गृहीतमधुपर्कोयजमानाद्ब्रह्मवितः। पश्चादाशौचेपतितेनभवेदितिनिश्चयः। इतिप्राच्योक्तेः। मधुपर्कात्पूर्वंतुभवत्येवाशौ
चमितिशुद्धिविवेकः। रामांडारस्तापिएवं। नांदीमुखावधिश्चस्मृत्यंतरे। एकविंशत्यहर्यज्ञेविवाहेदशवासराः। त्रिषट्चौलोपन
यनेनांदीश्राद्धंविधीयते। आरंभाभावेपिलग्नांतराभावेगृह्यविद्भिः। नदेवप्रतिष्ठाविवाहयोः पूर्वसंचितयोरपिनि। अत्रप्रायश्चित्त
माहमदनपारिजातेविष्णुः। अनारब्धविशुद्ध्यर्थंकूष्मांडैर्जुहुयाद्घृतं। गांदद्यात्पंचगव्याशीततःशुध्यतिसूतकी। संग्रहेपि। संकटेसमनुप्रा
तं प्तेसूतकेसमुपागते। कूष्मांडीभिर्घृतंहुत्वागांचदद्यात्पयस्विनीं। चूडोपनयनोद्वाहप्रतिष्ठादिकमाचरेत्। परेवस्तुतकप्राप्तिस्तदेयमृ
दयक्रिया। अत्रादिषुविशेषः षट्त्रिंशन्मते। विवाहोत्सवयज्ञेषुअंतरामृतसूतके। परेरन्नंप्रदातव्यंभोक्तव्यंचद्विजोत्तमैः।
परेरसगोत्रैः। भुंजानेषुतुविप्रेषुअंतरामृतसूतके। अन्यगेहादकोचायांताः सर्वेतेशुचयस्मृताः। एतदाशौचपूर्वमस्थ

कृतांतविषयं। तत्रप्रेषमंतव्याज्यमिस्यर्थः। कृष्णभट्टतेनुच्यहस्यतिराह। विवाहोत्सवयज्ञेषुअंतरामृतसूतके। पूर्वसंकल्पितान्नेषु नदोषः परिकीर्ति
तइति। धर्मार्थविवाहकरणेफलमुक्तंमहाभारते। दत्वाचवित्तसामर्थ्यादिकंचोद्वाहयेद्द्विजं। तेनप्राप्नोतिलस्थानंशिवभक्तो
नरोध्रुवं। अपरार्केदेवलः। मातापितृविहीनंतुसंस्कारोद्वाहनादिभिः। यः स्थापयतितस्येहपुण्यसंख्यानविद्यते। मदनरत्नेभविष्ये
विवाहादिक्रियाकालेकन्यांक्रेपासिद्धिकारयेत्। यः प्रयच्छतिधर्मार्थंसोश्वमेधफलंलभेत्। कन्याशुल्कग्रहणेतुनिषेधो पितृत्रैव।
अप्रजायांतुकन्यायांनभुंजीतकदाचन। दौहित्रस्यमुखंदृष्ट्वा किमर्थमनुशोचति। अपरार्के आदिपुराणे। विक्रीणातितुयःकन्यां तस्य कौ
पंनकाप्यते। अप्रजायांतुकन्यायांनाश्नीयात्तस्यवैगृहे। बृहस्पतियानवैकन्यांदत्वाश्रीमालकेदाचन। अश्वसंज्ञांतिमोहात्तेतस्यारौरव
केवसेत्। तत्रैवकश्यपः। अहंतंयंत्रनिर्मुक्तंवासःप्रोक्तंस्वयंभुवा। शस्तनमांगलिकेषुतावत्कालंनसर्वदा। यंत्रनिर्मुक्तंनूतनं विवा
हमध्येस्त्रियासहभोजनेपिनदोषइत्याह। हेमाद्रौप्रायश्चित्तकांडेगालवः। विवाहकालेयात्रायांपथिचौरसमाकुले। अस्पृ
यो भवेदि द्विप्रस्तदाकार्यंद्विजन्मभिः। एकयानसमारोहएकपात्रेचभोजनं। विवाहेपथियात्रायांकृत्वाविप्रोनदोषभाक्। अ
न्यथादोषमाप्नोतिपश्चाच्चांद्रायणंचरेत्। मिताक्षरायामप्येवं। रत्नमालायां। मूलेमैत्रमघारोहिण्यांकरेपौष्णमारुतम
घोत्तराभिर्विते। भौमसौरिरविवारे। रजितेपाणिपीडनविधिर्विधीयते। अत्र। निष्टनक्षत्रादोद्दानमृगशिरोयोतिषे। विप
तारेयुउरन्नाद्विधनेवालिकां। चनं। प्रस्परेलव्यांरघो। च्चागंदद्यात्रिजन्मसु। चंद्रेत्वशंरवंलेखणं चतारेतिथौविरुद्धेतुयतंड

नि॰ ३

लांश्च। धान्यं तस्या ग्रहणे चवारियोगे विरुद्धे कनकं प्रदेयं। विवाहे मंडपमाह वसिष्ठः। षोडशारत्निकं कुर्यां च्चतुर्द्वारोपशोभितं
मंडपं तोरणैर्युक्तं तत्र वेदिं प्रकल्पयेत्। अष्टहस्तं तु रुच्चयेन मंडपं वा हि षट्करं। दैवज्ञमनोहरः। चित्रा विशाखा शततारकौ
श्विनी ज्येष्ठा सिरण्ये ज्येष्ठाभिरण्येश्री वषा मस्तुष्यं। हित्वा प्रश्रास्तफलदे तेन लवेदिकाप्रदानकं कंडनं मंडपादिकं। हेमाद्रौ व्यासः।
कंडनदलनस्वारकमंडपन्दे द्विर्णकाद्यसिद्धं। ततां बंधिगतागतमक्ष्रौ वैवाहिके कुर्यात्। यन्नारकचिकसा शनिप्र
सिद्धं। वैवाहिकं तु दिवसं शुभे वाथ तिथौ शुभे चतुर्थिकं प्रकुर्वीत विधिदृष्टेन कर्मणा। वेदीमाह नारदः। हस्तोच्छ्रितां चतुर्ह
स्तैश्चतुरस्रां समंततः। स्तंभैश्चतुर्भिः सुश्लक्ष्णां वामभागे तु सद्मनि। समां तथा चतुर्दिक्षु सोपानैरतिशोभितां। प्रागुद
क्प्रवणां रंभास्तंभ हंसशुकादिभिः। एवंविधामारुरुक्षेन्मिथुनस्य निवर्तयेत् दिक्कामिति। सप्तर्षिमते मंगलेषु च सर्व
षु मंडपो गृहमानतः। कौर्यं षोडशहस्तो वा द्वादशहस्तो दशावधिः। समं चतुर्भिश्चैवात्र वेदीमध्ये प्रतिष्ठिता। हस्तोच्च
श्राः। सोपानं पश्चिमतः उपरिभागे तु कपरिमाणा। ज्ञेनं। अथ मन्दाहरणं। ज्योतिर्निबंधे नारदः। कर्तव्यं मंगलके
ष्वादौ मंगलकार्यांकुरार्पणं नवमे सप्तमे वापि पंचमे दिवसे पि वा। तृतीये बीजनक्षत्रे शुभवारे शुभोदये। सम्यग्गृहा
लंकृते सावित्रीतान्यध्वजतोरणैः। सहवादित्रनृत्ताद्यैः गत्वा प्रागुत्तरां दिशं। तत्र मृत्सिकतां श्लक्ष्णां गृहीत्वा पुनरा
गतः। मन्मये वा थवा वैणवे शुभपात्रे पुष्पोन्नये तु। अंकनेक बीजसंयुक्तां तोयपुष्पोपशोभितां। शौनकः। धौ आनंग

र्भसंस्कारं जातकर्म च नाम च। हित्वान्यत्र विधातव्यं मंगले कुरवापनं। बृहस्पतिः। आत्यंतिकेषु कार्येषु कार्यं सद्योंकुरार्प
णं। अत्रैव चाध्दान हरिद्रावंदनं च कार्यं। ज्योतिः प्रकाशे। चतुर्थो मंडपः श्रेष्ठः सप्तमः पंचमस्तथा। नवमैकादशः
श्रेष्ठो निषेधः षष्ठ तृतीयकौ। विवाहमेस्यो देयेवाक न्यावरणमाचरेत्। वरस्यापि वरणमाह चंडेश्वरः। उपवीतं फलं पुष्पं वासां
सि विविधानि च। देयं वराय वरणे कन्याभ्रात्रा द्विजेन वेति। वाग्दानोत्तरं वरमरणे उपराके स्मृतिचंद्रिकायां च वसिष्ठः। अद्भि
र्वाचा च दत्तायां म्रियेत पूर्वो वरो यदि। न च मंत्रोपनीता स्यात्कुमारी पितुरेव सा। यत्तु नारदः। उद्वाहिता पि सा कन्या नप्राप्तमैथु
ना। पुनः संस्कारमर्हति यथा कन्या तथैव सेति। यच्च कात्यायनः। वरोयत्यान्यजातीयः पतितः क्लीब एव वा। विकर्मस्थः सगो
त्रो वा दासो दीर्घामयो पि वा। ऊढापि देया सान्यस्मै सप्रावरणभूषणेति। इदं कलौ निषिद्धं। देवरेण सुतोत्पत्तिर्दत्ता कन्या
न दीयते। इत्यादि पुराणे कलौ निषेधात्। दत्तशब्दस्तूढापरः। उढायाः पुनरुद्वाह मिति हेमाद्रावुक्तेः। देशांतरगमने तु का
त्यायनः। वरयित्वा तु यः कश्चित्प्रणश्येत्पुरुषो यदा। ऋतुागमांस्त्रीनतीत्य कन्यान्यं वरयेद्वरं। अपरार्के नारदोपि।
प्रतिगृह्य तु यः कन्यां वरो देशांतरं व्रजेत्। त्रीनृतून्समतिक्रम्य कन्यान्यं वरयेद्वरं। शुल्कदाने तु यन्नवासिष्ठो
कन्यायां दत्तशुल्कायां म्रियेत यदि शुल्कदः। देवराय प्रदातव्या यदि कन्यानुमन्यते। चंद्रिकायां कात्यायनः।
प्रदाय शुल्कं गच्छेद्यः कन्यायाः स्त्रीधनं तथा। धार्या सा वर्षमेकं तु देयान्यस्मै विधानतः। अनेकेभ्यो हि द

तायामनूढायां तु तत्रैव पूर्वागतश्च सर्वेषां लभेत । धवरस्तु तां । पश्चाद्वरेण यद्दत्तं तस्मै प्रतिलभेत सः । अथागच्छेन्न वोढा या
दत्तं पूर्ववरो हरेत । याज्ञवल्क्यः । दत्तामपि हरेत्पूर्वं श्रेयांश्चेद्वर आव्रजेत् । पूर्वस्य दोषसत्वे इदमिति विज्ञानेश्वरः । संबंधत
त्वे वसिष्ठः । कुलशीलविहीनस्य पण्ड्वादिपतितस्य च । अपस्मारिविधर्मस्य रोगिणां वेषधारिणां । दत्तामपि हरे
त्कन्यां सगोत्रोढां तथैव च । मनुः । षंढो धवद्दारादीनां विवाहोस्ति कथं उचितं । विवाहसंभवे तेषां कनिष्ठो विवहेत
दा । पितृव्यपुत्रसापत्ने परदारसुतेषु च । विवाहदानयज्ञादौ परिवेत्तुर्न दूषणं । अन्यदप्यत्र विस्तरभीतेर्नोच्यते इति दिक् ।
अत्र नांदीश्राद्धे विशेषं तदधिकारिविशेषं चाग्रे वक्ष्यामः । इदं च प्रथमविवाहे पिता कुर्यात् । द्वितीयादौ वर एव नांदीश्रा
द्धं पिता कुर्याद्द्वितीयपाणिग्रहे पुनः अध्वर्ध्वं प्रकुर्वीत स्वयमेव तु नांदीकमिति स्मृतेः । त्रिकांडमंडनोपि । द्वितीयस्य कृती
वतः कुर्यात्पुनः पाणिग्रहं यदा । पितुर्नांदीमुखं श्राद्धं नोक्तं तस्य मनीषिभिरिति । रेणुककारिका । उक्ते काले विवाहं तु
कुर्यान्नांदीमुखं पिता । देशांतरे विवाहश्चेत्तत्र गत्वा भवेदिदं । लग्नघटीस्थापनमाह । नारदः । षडंगुलमितोत्सेधद्वा
दशांगुलमायतं । कुर्यात्पात्रं ताम्रपात्रं तद्दशभिः पलैः । ताम्रपात्रे जलैः पूर्णे मृत्पात्रे वाथ वाम्भसि । मंडले
धौतं वीक्ष्य रवेस्तत्र विनिक्षिपेत् । तत्र मंत्रः । मुख्यं त्वमसि यंत्राणां ब्रह्मणा निर्मितं पुरा । भावाभावाय दंपत्योः काल
साधनकारणमिति । वरस्य मधुपर्कमाह याज्ञवल्क्यः । प्रतिसंवत्सरं त्वर्घ्याः स्नातकाचार्यपार्थिवाः । प्रियो वि

वाह्यश्च तथा यज्ञं प्रत्यृत्विजः पुनः । अत्र विशेषोन्यत्र परिशिष्टे । वरस्य प्राग्भवेच्छाखा तच्छाखाया यद्दनुचोदितः । मधुपर्कः प्रश
स्तो वा अन्यशाखापि दातरि । अत्र वरदातृशब्दौ ऋत्विगाद्युपलक्षणं । तदाहुः । अर्घ्यशाखया मधुपर्क इति । अ
र्घस्य यच्छाखीयं कर्म तच्छाखया मधुपर्क इति याज्ञिकाः । जयंतस्तु वरस्य यजमानस्य वा शाखया मधुपर्कद
त्याह । तत्तु नाद्रियंते वृद्धाः । अत्र पंचधा नानाभेदा [illegible] तदर्थे तु विष्टरद्वयं [illegible] परिशिष्टे विष्टरलक्षणं मधुपर्का
दिविधिश्च स्वगृह्यात् ज्ञेयः । कन्यादाने प्रपितामहपूर्वकत्वमुक्तं स्मृत्यर्थसारे । नांदीमुखे विवाहे च प्रपितामह
पूर्वकं । नामसंकीर्तयेद्विद्वानन्यत्र पितृपूर्वकं । नांदीमुखेति बह्वृचव्यतिरिक्तविषयं । परिशिष्टे पित्राद्यानुलो
म्यान्नात्र । व्यासः । भुक्त्वा समुद्वहेत्कन्यां सावित्रीग्रहणं तथा । उपोषितः समो स्यादविवेकि ह्यायतु । भुक्त्वेमधुप
र्कविधभोजनपरं । गृह्यपरिशिष्टे । कन्यां वरयमाणानामेषधर्मो विधीयते । प्रत्यङ्मुखाय वरय तिष्ठन्दद्यात्प्राङ्मुखः ।
मदनरत्ने संग्रहः । वरगोत्रं समुच्चार्य प्रपितामहपूर्वकं । नामसंकीर्तयेद्विद्वान्कन्यायाश्चैवमेव हि । तिष्ठन्पूर्वो
मुखो दाता वरः प्रत्यङ्मुखो भवेत् । मधुपर्कार्चितायैनां तस्मै दद्यात्सदक्षिणां । इदमानंतरं तस्मन्त्रेणानेन दापयेत् ।
गौरीकन्यामिमां विप्र यथाशक्ति विभूषितां । गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रय । भूमिं गाश्चैव दासींश्च वासांसि सि न
स्वशक्तितः । महिषीं वाजिनश्चैव दद्यात्स्वर्णमणीनपि । ततः स्वगृह्यविधिना होमाद्यं कर्म कारयेत् । यथाचारं विधे

यानि मंगल्यकुतुकानि च । एतत्कन्याद्वानात्रिः कार्यमिति शौनकः । गृहप्रवेशनीयहोमे विशेषमाहाश्वलायनः । अथ्मरे
त्र्यतीते तु परस्तु प्रातरेव हि गृहप्रवेशनीयः स्यादिति यज्ञविदो विदुरिति । औपासनहोमे विशेषमाह शौनकः । यदि रा
त्रौ विवाहाग्निरुत्पन्नः स्यात्तथा सति । उपक्रम्य परस्याह्नः सायं परिचरेदमुं । यदि रात्रौ नाडीमध्ये तूत्पत्तिस्तदा त
दैव होमारंभः । तदुत्तरं चेत्तरसंगे सायमारंभ इति सुदर्शनभाष्ये उक्तं । अथ देवकोत्थापनं । समे च दिवसे कुर्याद्देवकोत्था
पनं बुधः । षष्ठे च विषमे नेष्टं मुक्त्वा पंचमसप्तमौ । निर्णयदीपे गार्ग्यः । नांदीश्राद्धे कृते पश्चाद्यावन्मातृविसर्जनं । दर्श
श्राद्धं क्षयश्राद्धं स्नानं शीतोदकेन च । अपसव्यं स्वधाकारं नित्यश्राद्धं तथैव च । ब्रह्मयज्ञं चाध्ययनं नदीसीमातिलं
घनं । उपवासव्रतं चैव श्राद्धभोजनमेव च । नैव कुर्युः सपिंडाश्च मंडपोद्वासनावधि । बृहस्पतिः । तीर्थे विवाहे यात्रा
यां संग्रामे देशविप्लवे । नगरग्रामदाहे च स्पृष्टास्पृष्टिर्न दुष्यति । योगयाज्ञवल्क्यः । न स्नायादुत्सवेऽतीते मंगलं वि
निवर्त्य च । अनुव्रज्य सुहृद्बंधूनर्चयित्वेष्टदेवताः । ज्योतिषे । स्नानं सचैलं तिलमिश्रकर्म प्रेतानुयानं कलशप्रदानं । अपू
र्वतीर्थामरदर्शनं च विवर्जयेन्मंगलतोऽब्दमेकं । मासषट्कं विवाहस्योव्रतप्रारंभणेन च । जीर्णभांडादिनत्यागं गृहसंमार्ज
नं तथा । पुत्रविवाहद्दुत्रस्य तथा च व्रतबंधनात् । आत्मनो मुंडनं नैव वर्षं वर्षार्द्धमेव च । अभ्यंगेऽस्तु च कचैव विवाहित
त्र जन्मनि । मांगल्यपुच्चसर्वेषु न धार्यं गोपिचंदनं । ज्योतिर्निबंधे । उद्वाहात्प्रथमे शुचौ यदि वसेद्भर्तुर्गृहे कन्यका

हन्यात्तज्जननीं क्षये निजतनुं ज्येष्ठे पतिज्येष्ठकं । पौषे च श्वशुरं पतिं च मलिने चैत्रे स्वपित्रालये तिष्ठंती पितरं निहंति न भयं तेषा
मभावे भवेत् । विवाहात्प्रथमे पौषे आषाढे चाधिमासके । न सा भर्तृगृहे तिष्ठेच्चैत्रे पितृगृहे तथा । हेमाद्रौ स्मृत्यंतरे । विवाहव्रतचूडा
सु वर्षमर्द्धं तदर्द्धकं । पिंडदानं मृदा स्नानं न कुर्यात्तिलतर्पणं । अथ वधूप्रवेशः । येन लग्ने गो । मार्गशीर्षे तथा माघे माधवे ज्येष्ठसंज्ञ
के । फाल्गुने भवेद्वधूप्रवेशो न वर्षे पितौ । नारदः । आरभ्योद्वाहदिवसात्षोडशे वाप्यथ समे दिने । वधूप्रवेशः संपत्त्यै दशमेऽथ सम
मे दिने । संग्रहे । विवाहमारभ्य वधूप्रवेशो युग्मे तिथौ षोडशवासरांतात् । ऊर्ध्वं ततो वत्सरपंचमांतात्ततः परस्तान्नियमो न चास्ति ।
नारदः । समे वर्षे समे मासे यदि नारी गृहं व्रजेत् । आयुष्यं हरते भर्तुः सा नारी मरणं व्रजेत् । प्रयोगरत्ने तु । वधूप्रवेशः प्रथमे
तृतीये शुभप्रदः पंचमके च वा द्वितीयके वा च चतुर्थके च षष्ठे वियोगामयदुःखदः स्यात् । इत्युक्तं तत्र मूलं चिंत्यं । बृ
हस्पतिरपि । षोडशे नवा दशमे दिने वा विवाहमारभ्य वधूप्रवेशः । पंचमं सप्तमं हि दिनं विनापि विधावसेञ्जो वर्षांगे पस्सूर्यः
लक्ष्यः । स्वभवनपुरप्रवेशो देशानां विप्लवे तथोद्वाहे । नववध्वा गृहगमने प्रतिशुक्रविचारणा नास्ति ॥ मांडव्यः । नित्ययाने गृ
हे जीर्णे प्राशनांतेषु सप्तसु । वधूप्रवेशमांगल्ये न मौढ्यं गुरुशुक्रयोः । ज्योतिर्निबंधे । वामे भृगौ नवोढायाः स्वगेहान्निष्क्रमे द
क्षिणे । धनं धान्यं च पत्रं च सर्वनाशः प्रसज्यते । नवोढायाः स्त्रिया वैधव्यं यदुक्तं संमुखे भृगौ । दैते च विबुधैर्ज्ञेयं केवलं तु द्विरा

गमे। पूर्वतो भ्युदितेथ शुक्रे प्रययाद्दक्षिणापरे। पश्चादभ्युदिते चैव याया तु पूर्वोत्तरे दिशौ। व्यवहारतत्वे। पौष्ण्या कभा श्रवणाच
पुष्पे हस्तत्रये मृकमघोत्तरासु। पुष्ये च मैत्रेन वधूप्रवेशो रिक्ते तरे व्यर्ककुजे च रास्तः। गर्गः। व्यतीपाते च संक्रान्तौ ग्रहणे वैधृ
तावपि। आद्यं विना शुभं नैव प्राप्तकाके पि मानवः। तथा। स्मास्संक्रांदि विषदोषात्तकाके पि नाचरेदिति। अथ द्विरागमनं। ज्यो
चये। माघफाल्गुन वैशाखे शुक्लपक्षे शुभे दिने। कुगुर्वादित्यविश्वहरे स्याग्नित्यं पत्नी द्विरागमः। बादरायणः। नीहारांशुदिनो
त्तरादितिगुरुब्रह्मानुराधाश्विनी शाक्रे भास्करवायुविल्लु वरुणत्वाष्ट्रे प्रशस्ते शिवे। कुं भौमार्कि गसेरवौ शुभकरे प्राशोदये भार्ग
वेजीव ज्ञास्फुजितां दिने नववधूवेश्मप्रवेशः शुभः। अथ पुनर्विवाहः। श्रीधरीये। पुनर्विवाहं वक्ष्यामि दंपत्योः शुभदं हि तं। लग्नं तु लग्न
येत्स्त्रीषि गमकृतारादिसंभवे। अन्येष्वशुभकाके षु दुष्टयोगादिसंभवे। विवाहे वापि दंपत्योराशौ चंद्रसमुद्भवे। तस्य दोषस्य शांत्यर्थं पुन
र्वैवाह्यमिष्यते। याज्ञवल्क्यः। सुरापी व्याधिता धूर्ता वंध्यार्थघ्न्यप्रियंवदा। स्त्री प्रसूश्चाधिवेत्तव्या पुरुषद्वेषिणी तथा। मनुः।
वंध्याष्टमेधिवेत्तव्या दशमे तु मृतप्रजा। एकादशे स्त्री जननी सद्यस्त्वप्रियवादिनी। संग्रहे तु। अप्रजां दशमे वर्षे स्त्रीप्रजां द्वाद
शे त्यजेत्। मृतप्रजां पंचदशे सद्यस्त्वप्रियवादिनीं। एकामुत्क्रम्य कामार्थमन्यां लब्धुं य इच्छति। समर्थस्तोषयित्वार्थैः पूर्वोढा
मपरां वहेत्। याज्ञवल्क्यः। आज्ञासंपादिनीं दक्षां वीरसूं प्रियवादिनीं। त्यजन्दाप्यस्तृतीयांशमद्रव्यो भरणं स्त्रियाः। मनुः।
अधिविन्ना तु या नारी निर्गच्छेद्रोषिता गृहात्। सा सद्यः संनिरोद्धव्या त्याज्या वा कुलसंनिधाविति। हेमाद्रौ कात्यायनः।

अग्नि शिष्य शिशुश्रूषां बहुभार्यः सवर्णया। कारयेत्तद्बहुत्वं चेत् ज्येष्ठया गर्हिता न चेदिति। याज्ञवल्क्यः। सत्यमन्यां सवर्णायां धर्मका
र्यं न कारयेत्। सवर्णासु विधौ धर्म्ये ज्येष्ठया न विनेतरा। द्वितीयविवाहहोमेग्निमाह कात्यायनः। सदारोन्यान्पुनर्दारानुद्वोढुं का
रणांतरात्। यदि चेच्छेदग्निमान्कर्तुं क्व होमोस्य विधीयते। स्वेग्नावेव भवेद्धोमो लौकिके न कदाचन। त्रिकांडमंडनीये। आद्यायां
विद्यमानायां द्वितीयामुद्वहेद्यदि। तदा वैवाहिकं कर्म कुर्यादावसथेग्निमान्। सुदर्शनभाष्ये तु द्वितीयविवाहे लौकिके एव न
पूर्वोपासनेत्युक्तं। इदं चासंभवे। तत्र च। अथाग्न्योर्गृह्ययोर्योगं सपत्नीमिदकात्ययोः। सहाधिकारसिद्ध्यर्थमहं वक्ष्यामि शौनक
उक्तः। संसर्गविधिः कार्यः। द्वितीयादि विवाहे काल उक्तः संग्रहे। प्रमदामृतिवासरादितः पुनरुद्वाहविधिर्वरस्य च। विषमेषु
च वत्सरेषु भाद्युगके चापि मतिप्रदो भवेत्। तृतीयादि विवाहनिषेधो माल्ये उद्वहेदिति सिध्यर्थे तृतीयां न कदाचन। मोहाद
ज्ञानतो वापि यदि गच्छेतु मानुषी। नश्यत्येव न संदेहो गर्गस्य वचनं यथेति। संग्रहे। तृतीयां यदि चोद्वहेत्तर्हि सा विधवा भवेत्। चतुर्था
दि विवाहार्थं तृतीये र्कं समुद्वहेत्। तद्विधिस्तु रविशन्यार्कहस्ते वा। वरः संकल्प्य स्वस्ति वाचनं नांदीश्राद्धं कृत्वा चार्यं वृत्वा आकृष्णे
नेति छायायुतं सूर्यमर्कं तु संकल्प्य पूजयेद्गुडौदनं दत्वा वस्त्रेण तंतुभिरावेष्ट्य त्रिलोकवासिन्सप्ताश्व छायया सहितो रवे। तृ
तीयोद्वाहजं दोषं निवारय सुखं कुर्विति संप्रार्थ्य अर्के नवग्रहं सिंचेत्। मम प्रीतिकरा येयं मया सृष्टा पुरातनी। अर्कजा ब्रह्मणा
सृष्टा अस्माकं प्रतिरक्षतु। नमस्ते मंगले देवि नमः सवितुरात्मजे। त्राहि मां कृपया देवि पत्नीत्वमेवमागता। अर्क त्वं ब्रह्मणा सृ

कः सर्वप्राप्ताद्वितायन्व। ऋक्षाणामादिमतस्तव्वंदेयांगांप्री तिवर्धनः। कृतीयेप्रहनेपात्पंमत्युचात्रुविनाश्येति। ततआचार्यः काश्य पगोत्रामादित्यप्रपौत्रींसवितुः पौत्रीं ममपुत्रीं कर्मकन्याममुकगोत्रायवरायप्रदास्येइतिवाग्दानं कृत्वावरस्यमधुपर्कं कृत्वांगाः परं कृत्वास्य स्तिनइतिसूक्तं जस्वा पूर्ववत्कन्यां दत्वा कन्यामिमामित्युक्त्वा नकन्यादानमंत्रमुक्त्वा दक्षिणांदद्यात्। ततोयोक्त्र्याविष्टितस्त्रेणार हस्तामेतिमंत्रेण कंकणं बध्वा कस्यचतुर्दिक्षु कुंभेषु विष्णुसंपूज्याग्निप्रतिष्ठाप्य। प्रारंतसंगोमिरितिरहस्यतयेमस्मेत्वाकाम कामायेत्कृचायेव्यस्त्वसमस्तत्वा। इतिभिराज्यं कृत्वाचार्यायगोयुगंदत्वा मयाकृतमिदं कर्मस्वावरेपुनरायुषा। अर्कापि त्यानिवोदेहि त्वन्नवर्क्षितुमर्हसीतिनमेदितिदिक्।। ।। इतिनिर्णयसिंधौविवाहः।। ।। अथाधानं। रत्नमालायां। प्राजाप त्येपूष्णसाद्विदैवपुष्येत्वाष्ट्रास्विंदवे कृत्तिकासु। अग्न्याधानंमुत्तराणांत्रयेपित्रिमित्रादित्येकीर्तितंभार्गवमुख्यैः। आश्वलायनः। आग्न्याधेयंकृत्तिकासुरोहिण्यांमृगशिरसिफल्गुनीषुविशाखयोरुत्तरयोः प्रोष्ठपदयोरेतेषांकस्मिंश्चिदसंतेपर्वणिश्रा द्धेयाआदधीतग्रीष्मवर्षाशरत्सुक्षत्रियवैश्योपकृष्टायस्मिन्कस्मिंश्चिद्दत्वावादधीतसोमेनयक्ष्यमाणोनर्तुनक्षत्रं नक्ष त्रं सोमाधानेऋत्वाधनालोचनमात्रेपरं। सोमेनयक्ष्यमाणोनर्तुनक्षत्रं नक्षत्रं लरेतदातस्याग्निविबंकोवाभक्षामुकस्यभवतीति बोधायनोक्तेरितिमदनरत्ने। दृगायः। पुष्यागमे यस्युत्तरादिसपौष्णज्येष्ठाचित्राकद्विदैवं तुभेषु। कुर्युर्वह्न्याधानमादंवसंत ग्रीष्मोषांतेषवविप्रादिवर्णाः। कालं दर्शे। अग्निहोत्रं दर्शपूर्णमासावप्युत्तरायणे। उपक्रम्ययथाकालमुपासीरन्द्विजाव

तयः। सोमेचमनुवंधं चसर्वं श्रविकेतीरपि। सौम्यापुनेयथाकालंविरत्युर्गृहमेधिनः। अत्रविशेषः पूर्वमुक्तः। अग्निहो त्रकालउक्तश्छंदोगपतिशिष्टे। उदितेनुदिते चैवसमयाध्युषितेतथा। सर्वथावर्ततेयज्ञ इतियंवैदिकीश्रुतिः। एषां स्वरूपंनगेव। रात्रेस्तुषोडशे भागेग्रहनक्षत्रभूषिते। कालं त्वनुदितंज्ञात्वाहोमंकुर्याद्विचक्षणः। तथाप्रभातसमयनष्टेनक्षत्रमंडले। रविर्यावन्नदृश्येतसमया ध्युषितंतु तत्। रेखामात्रं प्रदृश्येतरश्मिभिश्चसमन्वितः। उदितंतद्विजानीयात्रहोमंप्रकल्पयेत्। आश्वलायनः। उद्योपरंप्र त्वाउदितेषा। संयंतुसएव। अस्तमितेमइतिसएव। प्रदोषांतोहोमकालः संगवांतः प्रातरिति। छंदोगपरिशिष्टे। यावसम्यङ् नभाव्यंतेनभस्यृक्षाणिसर्वतः। नवलोहितिमायेतिवाचसायंतुहूयते। औपासनेप्ययं। तस्याग्निहोत्रेणप्रादुष्करणहोमकालौव्या ख्यातौ इति आश्वलायनोक्तेः। अथावसथ्याधानं। पारस्करः। आवसथ्याधानंदारकालेदायाद्यकालएकेषामिति। दायाद्यकाले विभागकाले। मदनरत्नेप्यासः। अग्निर्वैराद्यिकेत्येनगृहीतः प्रमादिना। पत्न्युपरतेतेनगृहीतव्यः प्रयत्नतः। योगी हीतविवाहा ग्निर्गृहस्थ इतिमन्यते। अन्नंतस्यनभोक्तव्यं वृथापाको हि सः स्मृतः। ज्येष्ठभ्रातर्यविभक्तवासगृनोकनिष्ठस्यपुत्रस्यवाग्न्यभाति नदोषः। तदाहात्रेवर्गाग्न्यः। पितृपाकोपजीवीवाभ्रातृपाकोपजीवकः। ज्ञानाध्ययननिष्ठोवानदुष्येताग्निनाविना। होमार्थस्वसाप्य ध्यायमाहसत्यव्रतः। अनधीत्यद्विजोवेदंस्तालोष्ठ्यपियथातथा। अधीतेव्रतस्त्रयेवर्णसांगवेदंगृहस्थेसे। इदंचाधानंत्ये

ज्येष्ठे कृताधानेन कार्यं। दाराग्निहोत्रसंयोगे कुरुते योग्रजे स्थिते। परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वज इति मनुशातातपोक्तेः। स्मार्ते त्वे
वं। सोदर्ये तिष्ठति ज्येष्ठे न कुर्याद्दारसंग्रहं। आवसथ्यं तथाधानं पतितस्तु तथा भवेदिति तत्रैव गार्ग्योक्तेः। आम्नाय तद्दोष
माह। सुमंतुः। ज्येष्ठो भ्राता यदा तिष्ठेदाधानं नैव चाश्रयेत्। अनुज्ञातस्तु कुर्वीत शंखस्य वचनं यथा। शंखवसिष्ठः। अग्न्यतोस्त
यदा नाग्निराद्ध्यात्स्वनुज्ञः कथं। अग्रजानुमतः कुर्यादग्निहोत्रं यथाविधि। पुरा इति। सौदर्याणां तु सर्वेषां परिवेत्ता कथं भवेत्।
दारैस्तु परिविद्यंते नाग्निहोत्रेण नेज्यया। अधिकारिणोपि भ्रातुरनुज्ञया कुर्यादिति मदनपारिजातः। विवाहस्त्वनुज्ञयापि
नेत्यर्थः। सोदरोक्तेरसोदराणां न दोषः। तदाह हेमाद्रौ वसिष्ठः। पितृव्यपुत्रान्सापत्नान्परनारीसुतांस्तथा। दाराग्निहोत्रसंयो
गे न दोषः परिवेदने। परस्त्रीरीसुता दत्तकादयः। देशांतरे विशेषमाह। स एव। अपेक्षेद्द्वादशवर्षाणि ज्येष्ठं भ्रातरमनिवि
ष्टमप्रतीक्षमाणः प्रायश्चित्ती भवतीति। क्लीबादावदोषमाह कात्यायनः। देशांतरस्थक्लीबैकवृषणानसहोदरान्। वे
श्याभिसक्तपतितशूद्रतुल्यातिरोगिणः। जडमूकांधबधिरकुब्जवामनखंजकान्। अतिवृद्धानभार्यांश्च कृषिसक्तान्नृ
पस्य वा। धनवृद्धिप्रसक्तांश्च कामतोकारिणस्तथा। कुटिलोन्मत्तचौरांश्च परिविंदन्न दुष्यति। एवं ज्येष्ठे स्थिते हस्तादावपि ने
परिवेत्तृत्वं। तदाह त्रिकांडमंडनः। दर्शेष्टिसोमाधानाग्निसंग्रहं। अग्निहोत्रं विवाहं च प्रयोगे प्रथमे स्थितं। न कुर्याद्दुर्वृत्तेके ज्ये

ष्ठे सोदरे वाप्यकुर्वति। क्षेत्रजादावन्यजाते विद्यमानेपि सोदरे। नाधिकारविघातोस्तीति भिन्नोदर्येपि सोदरे। पंग्वंधमूकबधिरपतितो
न्मादरूषणे। संन्यस्ते छिन्नहस्तादौ यद्वा पंढादिदूषणे। अन्यके सोदरे ज्येष्ठे कुर्याद्देवेतरः क्रियामिति। आरोहस्तं दशांतरादौ करीममे साधा
नेमंत्रैर्वर्णनं च। शाकटीरंगुलीः। तंत्ररत्नेप्युक्तं। अंगवैकल्यात्सर्वमाहिताग्नित्वे धिक्रियेनैवानिरोध। आधानं तु न कुर्यात्तस्यानैमित्तिक
त्वादिति। एवं चतुरंगुल्कोपि। षड्गुणकाण विकर्णादेस्त्वस्त्येवाधिकारः। एकांगशातु दशांतर्गतेः। शारीरकाचर्यर्या वा। विप्रतिविकृतिमति
हिरण्यकेशिसूत्रे कर्माशक्तिहेतोर्वैरूपवैकल्यस्य निषेधात्। अतएवान्नाह्यायनसूत्रे यात्यश्च प्रथमे स्थिर्निर्गुणे रितिन्यू
नांगस्याप्यधिकारउक्तः। अपरार्के उशनाः। पितापितामहोयस्य अग्रजो वाथ कस्यचित्। तपोग्निहोत्रमंत्रेषु न दोषः परिवेदने।
विधुरजायामप्यदोषमाह। मदनरत्ने सुमंतुः। पित्रा यस्य तु नाध्यातं कथं पुत्रस्त्वादधीत कदाचनेति त्रस्तु कारयेत्। अग्निहोत्रेपि
कारोस्त्विति शंखस्य वचनं यथेति। नाध्यातं नाधानं कृतमित्यर्थः। एतच्च जायायामेवेति हेमाद्रिः। यत्तु पितृव्यतुल्यस्याप्यनुज्ञाने
नानधिकृतवचने तिलत्स्याधिकारे ज्ञेयं। शूद्रस्य संस्काराः। यमः। शूद्रोप्येवंविधः कार्यो विनामंत्रेण संस्कृतः। न केनचित्स
मसृजच्छूद्रं स्तामंत्रप्रजापतिः। छंदसामंत्रेण। व्यासोपि। गर्भाधानं पुंसवनं सीमंतोन्नयो जातकर्म च। नामक्रियानिष्क्रमोन्नप्राशनं
वपनक्रिया। कर्णवेधो व्रतादेशो वेदारंभक्रियाविधिः। केशांतः स्नानमुद्वाहो विवाहाग्निपरिग्रहः। त्रेताग्निसंग्रहश्चैव संस्का

गःषोडश समाख्याताः स्मृताः। नैवैताः कर्णवेधांता मंत्रवर्जं क्रियाः स्त्रियाः॥ विवाहो मंत्रतस्तस्याः शूद्रस्यामंत्रतो दशेति। मदनरत्ने
हिरण्यगर्भदाने तु। गर्भाधानं पुंसवनं सीमंतोन्नयनं तथा। कुर्याद्धिरण्यगर्भस्य ततस्ते द्विजपुंगवाः इत्युक्तेर्जातकर्मादिका कुर्यादिति
माः षोडश चापराइत्यत्र ह्रियाः जातकर्मनामकरणनिष्क्रमणान्नप्राशनचूडाविवाहाः शूद्राणां तु षडेते पंचमहायज्ञाश्चेत्येकादश
शूद्रस्य। सूपनारायणहरिहरभाष्ययोरेवोशांकधरस्तु द्विजानां षोडशैवस्युः शूद्राणां द्वादशैव हि। पंचैव मिश्रजातीनां संस्काराः कुलध
र्मतः। देवव्रतोपनयनं महानाम्नी महाव्रतं। विना द्वादश शूद्राणां संस्काराणीममंत्रतस्त्वाह। अपरार्के तु गर्भाधानमृतौ पुंसः इत्युक्त्वाह।
एतच्चातुर्वर्ण्यपरं न द्विजातिमात्रपरं। तथा च सत्युपनयनं विधाय यथा भस्या इति। तेन तत्समंत्रकं भवति। अन्ये तु विवाहमात्रं संस्कारं शूद्रे
तोरणस्रग्वितानैः स्त्रीभिस्त्रग्वीगीतवाद्यैर्विशेच्च । व्यवहारतत्त्वे । सौम्यायने श्रावणमार्गपौषे जन्मर्क्षे
लग्नोपचयोदयाढ्ये । वामं गते के गृहवास्तुपूजां कृत्वा विशेद्ध्रुवमृदुक्षिप्रभेषु । वास्तुशास्त्रे
लग्नान्नागादितो दिक्षु दोषो रक्षोनिमेज यत् । एकमेव न्यसेत्कोणं सूर्यवामं विधितयेत् । वसिष्ठः ।
चेद्गृहापतितिः सत्सु तुर्यो केन्द्रतमहार्थलाभदा । सूर्यसुतदिवसे । स्थिरप्रदा किलु वारस्तयमत्र
निर्दिशेत् । रत्नकोशे । पुष्ये धनिष्ठेन्दुवारुणेषु स्वपर्वैष्णवध्रुवेषु चोत्तरासु । आक्षीणचन्द्रमसदि
न्यस्यतिथौ विरिक्ते च गृहप्रवेशः । नारदः । प्रवेशो मध्यमो ज्ञेयः सौम्यकार्तिकमासयोः । माघफा

ल्गुनवैशाखज्येष्ठमासेषु शोभनः । अर्कपाठमन [illegible] नमस्कारबलिभोजनं । गृहं न प्रविशेद्धीमानापदामाकरोति
तत् । प्रवेशात्तु वास्तुपूजा कृत्वा कार्यः । जीर्णगृहे तु पाद्मोक्तेन तथा गृहनिवेशने । नवप्रासादभवने प्रासादपरिवर्तने । द्वा
राभिवर्तने तद्वत्प्रासादेषु गृहेषु च । वास्तुपशमनं कुर्यात्पूर्वमेव विचक्षणः इति मत्स्योक्तेः । तत्रैव । कृत्वाग्रतो द्विज
वरानथ पूर्णकुंभं दध्यक्षताम्रदलपुष्पफलोपशोभं । दत्वा हिरण्यवसनानि तथा द्विजेभ्यो मांगल्यशांति
निलयं स्वगृहं विशेत्तु । गृह्योक्तहोमविधिना बलिकर्मकृत्वा संतर्पयेद्द्विजवरानथ भक्ष्यभोज्यैः श [illegible] ब्रह्म स्वस्तयनमवि
शांतस्वत्रप । अथ कलिवर्ज्यानि । बृहन्नारदीये । समुद्रयातुः स्वीकारः कमंडलुविधारणं । द्विजानामसवर्णासु कन्यासूपयमस्तथा ।
दत्तायाश्चैव कन्यायाः पुनर्दानं परस्य च । दीर्घकालं ब्रह्मचर्यं नरमेधाश्वमेधकौ । महाप्रस्थानगमनं गोमेधश्च तथा मखः । इमान्
धर्मान्कलियुगे वर्ज्यानाहुर्मनीषिणः । कमंडलुः सोदकं चर्मकमंडलुमित्युक्तेः । स्वयं मृतो वा [illegible] पुनरुद्धार्यं इति
ऋष्यांशे गोवधस्तथा नराश्वमेधौ मद्यं च कलौ वर्ज्या द्विजातिभिः । गोत्रात्तु जायाः । पितृ [illegible] कोपनेन क्वचित्तन्नात्तु जायाक
मंडलमिति स्मार्ताद्वचनात् । पुरा पुरुषमेधयागान् तदयातिके च नत्याभिर्विवाहः [illegible] हेमाद्रौ [illegible] । गोत्रान्मातुः सापि
ण्डा विवाहगोवधस्तथा + ३ यत्कः । मातृसपिण्डान्मातुलकन्यायां विवाहः कलौ न कार्यः तेनयानिनद्विधायक

कानि तानि युगांतरविषयाणि। तथा व्यासः। तृतीयां मातृतः कन्यां तृतीयां पितृतस्तथा। शूद्रेण नोद्वहिष्यंति
विप्राः पापविमोहिताः। इति कर्कादिनामह। मातृतस्तृतीयां तु कन्यामित्यर्थः। उक्तं चैतत् प्राक्। मत्स्याक्षीप्य स-
मासमित्यादिना। विहितमपि वर्ज्यं हेमाद्रावादित्यपुराणे। विधवायां प्रजोत्पत्तौ देवरस्य नियोजनं। बालायाक्षतयोन्या-
श्च वरेणान्येन संस्कृतिः। कन्यानामसवर्णानां विवाहश्च द्विजन्मभिः। आततायिद्विजाग्र्याणां धर्मयुद्धेन हिंसनं।
द्विजस्याब्धौ तु नौयातुः शोधितस्यापि संग्रहः। सत्रदीक्षा च सर्वेषां कमंडलुविधारणं। महाप्रस्थानगमनं गो-
संज्ञप्तिश्च गोसवे। सौत्रामण्यामपि सुराग्रहणस्य च संग्रहः। अग्निहोत्रहवण्याश्च लेहो लीढापरिग्रहः।
वृत्तस्वाध्यायसापेक्षमघसंकोचनं तथा। प्रायश्चित्तविधानं च विप्राणां मरणांतिकं। संसर्गदोषः स्तेयाद्यमहापातक-
निष्कृतिः। वरातिथिपितृभ्यश्च पशूपाकरणक्रिया। दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रहः। सवर्णान्यांगनादुष्टैः सं-
सर्गः शोधितैरपि। अयोनौ संग्रहे वृत्ते परित्यागो गुरुस्त्रियाः। परोद्देशात्मसंत्यागः उच्छिष्टस्यापि वर्जनं। प्रतिमा-
भ्यर्चनार्थाय संकल्पश्च सधर्मकः। अस्थिसंचयनादूर्ध्वमंगस्पर्शनमेव च। शामित्रं चैव विप्राणां

सोमविक्रयणं तथा। षड्भक्तानशनेनान्नहरणं हीनकर्मणः। माधवीये स्थितं चंद्रोदये च।
शूद्रेषु दासगोपालकुलमित्रार्धसीरिणां। भोज्यान्नता गृहस्थस्य तीर्थसेवातिदूरतः। शिष्यस्य गुरुदारेषु
गुरुवद्वृत्तता कृता। आपद्वृत्तिर्द्विजाग्र्याणामश्वस्तनिकता तथा। प्रजार्थं तु द्विजाग्र्याणां प्रजारणिपरिग्रहः।
ब्राह्मणानां प्रवासित्वं मुखाग्निधमनक्रिया। बलात्कारादिदुष्टस्त्रीसंग्रहो विधिनोदितः। यतेश्च सर्व-
वर्णेषु भिक्षाचर्याविधानतः। नवोदके दशाहं च दक्षिणा गुरुचोदिता। ब्राह्मणादिषु शूद्रस्य पचनादि-
क्रियापि च। भृग्वग्निपतनैश्चैव वृद्धादिमरणं तथा। गोतृप्तिशिष्टपयसि शिष्टैराचमनक्रिया। पितापु-
त्रविरोधेषु साक्षिणां दंडकल्पनं। यतेः सायंगृहत्वं च सूरिभिस्तत्त्वदर्शिभिः। एतानि लोकगुप्त्यर्थं कले-
रादौ महात्मभिः। निवर्तितानि कर्माणि व्यवस्थापूर्वकं बुधैः। स्करणग्रहणास्य तत्कुंडसंग्रहो व्यवहारः।
न च मध्ये पतितासमन्योति समन्यनानि पितृस्यानेनोपसंहार इति वाच्यं। निषेधस्य निवर्तिता अ-
फलत्वेन विशेषाभावात्। न हिंस्यादित्यस्य नाग्नीषोमीयं हिंस्यादित्यनेनोपसंहारे हिंसारतस्य प्रादोषत्वापत्ते-
श्च। निरूपितमेतन्मया प्राक्। अन्यत्रेत्युपरम्यतामिति तैरग्राहकः ब्राह्मणः शुद्धो घाग्निवेदसमन्वित इत्युक्तः।

नि॰ सिं॰ टी॰ अघस्याशौचस्य संकोचः। न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते इत्युक्तस्य प्रायश्चित्तस्य विधानमुपदेशः। केऽत्र कर्त्तव्यं लिप्यते
इति व्यासोक्तेः। पतितसंसर्गदोषसत्वेऽपि प्रायश्चित्तं नैवेत्यर्थः। अन्यथा संसर्गशोधितेर्यस्मी। त्रिविधा पुनः स्तेयं भीनिन्दता
पापेरहस्यकृप्रायश्चित्तं नेत्यर्थः। सवर्णान्या असवर्णा स्त्रियादिस्त्रथ दुष्टः। अयानि शिष्यादी चेत स्वस्तु परित्याज्य
शिष्यगोगुरुगा स्थ्ये। इत्युक्तस्त्यागः। परोद्देशेन ब्राह्मणाद्यर्थं आत्मनस्त्यागः। यत्परोद्देशेनात्मत्यागो दानं स मनसा।
अनुद्दिश्य त्यक्तेः। उद्दिष्टस्य त्यक्तस्य वर्जनं प्रतिग्रह समर्प्यापीत्युक्तेः। अव्यवेतन ग्रहणान्न पतितमापूंजा। स्वस्य च काकात
विप्रसंस्पर्शनं कृत्रि गागृहस्थः कः स्पर्शः। षडिभिः पोषितस्य गृहस्थित्वा धान्यं ब्राह्मणात् ग्रनादित्युक्तौ। अन्न चौर्य्यमापादि
त्रादिष्यन्तिः। मुखेनैयमेधे दग्निमित्युक्तः धमनं। दत्याहनैव श्रुद्धेनतत्र मिश्रक चनवोदक मित्युक्तो दशाहः। पुरस्वरं दत्वा पुत्र
दक्षिणा। श्रद्धतिसदागोपाताके ति। कं पूप्यक्त स्नेहपर्क यत्र दुग्धेन पाचितं। एतान्यशूद्रान्यभुजो सोऽज्याः ति मतु स्वधीरद्वमु
गर्के समस्तफलं शूद्रस्यपाकक्रिया। पितापुत्रा विवादेतु साक्षिणां ति पणादमः। इत्युक्तिः। सायंप्रातर्गाविभूपस्तनं
मुखात्क इत्युक्ते। पृथ्वी चंद्रप्यतु अर्दातियस्त्व्याविशुद्धः। एषिषोदर्शनापव। अनिकेता हनहानापत्रसार्य
ग्रहास्तु तल्लनिविद्युत्पुण्णाकानि षिद्धः। तेनग्रामीकिं पापातं। हाद्दौ विनियोगो न कोपि। कृत्वा वि

त्यर्थः। एतानि वर्ज्यानीत्यर्थः। निगमः। आग्निहोत्रं गवालंभं संन्यासं पलपैतृकं। देवराच्च सुतोत्पत्तिः कलौ पंच
विवर्जयेत्। अग्निहोत्रं तदर्थमाधानं। एतत्सर्वाधानपरं। अर्धाधानं स्मार्तस्यान्त्याग्न्योः पृथक्करणं। तिः पूर्वं युगमि
श्रिताति लोगाभ्युदयनादि निस्तारितं धिकैयां। एतेन चत्वारि च सहस्राणि चा कर्पदागमिष्यति तदात्रे पस्थि
तः। संन्यासश्च कमन्येथा ब्राह्मणेन न विजानातीति व्यासवचनं व्याख्यातं। सर्वाधाने पि विशेषमाहदेवलः। यावद्वर्णं
विभागोऽस्ति यावद्वेदः प्रवर्त्तते। संन्यासं चाग्निहोत्रं च तावत्कुर्यात्कलौ युगे इति न्यासः। दंडः। इति नि
र्णयसिंधौ तृतीयपरिच्छेदे कलिवर्ज्यानि। नानानिबंधवसमत्यस्ता तात्वित्ता दुध्रीधेया। कमलाकर संततेन के
क्रियते तत्र श्राद्धपरिकीर्तितं। ब्राह्मणस्य काला न चतुर्थं तत्प्राप्नीता पितृ दृष्टा करस्यागः श्रा मित्यर्थः।
त न्ययथा पितॄणमपिंडनार्जना गिप्रधान मितिह्न्यादि। होमश्च पिंडदानं ष्टिवा नैषधो न प्राधान्येन विरुणद्धि। के

च तथा ब्राह्मणभोजनं। श्राद्धशब्दस्य रूपमिदं स्यादेकन्नोपचार चारिकइति। श्री धरश्च। तथापि कर्षादिश्राद्धेशब्दस्यामः
निमित्ततस्सोजनस्थपिंडदानस्यचानिषेधः। नया धवरुणद्र। असोमपा तेना धेनुपयायागवत्। यत्तुशूलपाणिः
नित्यश्राद्धमदेवं स्यादर्घ्यपिंडादिवर्जितं मिति हारीतीयनित्यश्राद्धमयाह पिंडनिषेधोस्ति। नचप्राप्तिं विना
सः। नचातिदेशाद्विप्राप्तिः। तच्चांगत्वेनाविनातिदेशः। प्रधानस्यानातिदेशात्। ममसुकोपेनकल्पनतिदेशा
त्कः। तन्नभोजनं प्रधानं पिंडांगो पिंडदानमात्रविधिश्च गदस्यावश्यकता त्कर्मांतरमेवप्रकरणांतरन्यायादिति। तेनं
जातश्राद्धेनदद्यात्तु पक्वान्नं ब्राह्मणेष्वपि। नपक्वं भोजयेत्किंचिद्धान्येतुङ्गापिकदाचनत्यायुर्जात श्राद्धादौ भोज
नानिषेधनांगतया पिंडोः। ततोपरो करोतीतियडूपडी स्याविरोधनाविचक्ल्याप नेश्वं। तेन श्राद्धशब्दाभि
हृयतेनातत्पसाधो नानिषेधः पर्युदासोवानासामयाडी सन्न्यादितियत्। इतितत्त्वं ध्रुनेश्राद्धेपि। यजुर्वेद
इंदानेतुयद्धुवानादृजार्चनं श्राद्धशब्द मिदयस्याडुभयस्यामवबोधिताः। तच्चापिदृन्यगतायित्यहन्याददघादित्युत्तगप्रयो
गदर्शनाद्यांतदानात्मकं। पितरो देवताह्यतिपूज्यदेश्यकत्वात्कर्यागत्वं। विप्रेष्वप्येव दानत्वमित्यविरुद्धं। एते
ननार्थयागः। देवतोद्देशेनत्यागोयागः। यागोदेशश्चदेवतेत्यन्योन्याश्रयपतिदिगोण्डमपतमपास्तं। वेधश्राद्धविग्र

योद्देश्यत्वस्य तस्येदमितिस्वत्वारोपप्रीतियोगित्वतस्यदेवतात्वात्। तत्रैवस्कमंतुः। श्राद्धमस्तात्परतरं नान्यच्छ्रेयस्करमुदाहृतं।
आदिपुराणे। नसंतिपितरश्चेति कृत्वामनसियोनरः। श्राद्धं नकुरुते तत्र तस्यरक्तं पिबंतिते। तद्भेदानाह विश्वामित्रः। नि
त्यं नैमित्तिकं काम्यं वृद्धिश्राद्धं सपिंडनं। पार्वणंचेति विज्ञेयं गोष्ठ्यं शुद्ध्यर्थमष्टमं। कर्मांगं नवमं प्रोक्तं दैविकं दशमं
स्मृतं। यात्रास्वेकादशं प्रोक्तं पुष्ट्यर्थं द्वादशं स्मृतमिति। तल्लक्षणानि [illegible] विष्ये। अहन्यहनि यच्छ्राद्धं
तन्नित्यमिति कीर्तितं विश्वदेवविहीनं तदशक्तावुदकेन तु। एकोद्दिष्टं तु यच्छ्राद्धं तन्नैमित्तिकमुच्यते तदप्यदैवं क
र्त्तव्यमयुग्मान्भोजयेद्विजान्। कामायाविहितं काम्यमभिप्रेतार्थसिद्धये। पक्षश्राद्धं यत्क्रियते श्राद्धं वृद्धिश्राद्धं तदु
क्तं तेन सपिंडनं। नित्यनैमित्तिकं तुल्यं शेषं यस्यादियत्तच्च पर्वणि यत्तत्पार्वणमिति स्थितिः। अत्र पर्वाणि। कृत्यदेश्यमष्टमी चै
व अमावस्या च पौर्णिमा। पर्वाण्येतानि राजेंद्र रविसंक्रमणं तथेति विष्णुपुराणोक्तसंक्रांत्यादि। गोष्ठ्यां यत्क्रियते
श्राद्धं गोश्राद्धं तदुच्यते। बहूनां विदुषां तुष्ट्यक्ता सर्वपितृतृप्तये। क्रियते शुद्ध्यर्थं ब्राह्मणानां तु भोजनं शुद्ध्य
र्थमिति तत्प्रोक्तं येन तयमनीषिभिः। निषेककालेसोमे च सीमंतोन्नयने तथा। ज्ञेयं पुंसवने चैव श्राद्धं कर्मांगमेव

यच्चाद्येनानुदिश्य श्राद्धं न तु दैवं पिकमुच्यते। गजच्छायांतरं यस्तु श्राद्धं कुर्यात्तु सर्पिषा। यत्रार्घ्यमीतितत्प्रोक्तं प्रसंगाच्चन संश
यः। शरीरोपचयश्राद्धमर्थोपचयएव च। पुत्रार्थं लोमापत्य रपि कमुच्यते। गोष्ठ्यां श्राद्धं कर्तृसमुदाये संभूय सामग्री
संपदानेन युगपत्तीर्थादिप्राप्तौ विद्वांश्राद्धं संपदाक्षरवांथे भिन्नपाकाशक्तौ वा कुपितृ कश्राद्धमेकः कुर्यादि
ति कृत्यतत्त्व शंखवाक्यस्थः। एकाहश्राद्धं प्रायश्चित्तांगमिति मैथिलाः। अथ त्रयाणां पाकादि दृष्ट्वा सपिंडीकरणे। एकं
तु विधमेवमुख्यं। तस्यैवायं प्रपंचः। अथ श्राद्धदेशाः। मनुः। शुचिं देशं विविक्तं तु गोमयेनोपलेपयेत्। पृथि
वीं वृद्धस्य विष्णुधर्मे। दक्षिणाप्रवणो देशस्तीर्थादौ चाटहे पिवा। भूसंस्कारादिसंयुक्ते श्राद्धं कुर्यात्पल्वलः। तत्र
वड्राभसरखंडे। तीर्थादष्टगुणं पुण्यं स्वगृहे तत्त्वतः शृणु भारत। तस्य देशाः कुरुक्षेत्रं गया गंगा सरस्वती।
प्रभासं पुष्करं चेति तेषु श्राद्धं महाफलं। स्कांदे। तुलसीकाननछाया यत्र यत्र स्यात्ककोज्ञा। तत्र श्राद्धं प्रदातव्यं
पितृणां तृप्तिहेतवे। माधवीयश्राद्धोपक्रमे व्यासः। महाहृदे प्रयागे च काश्यां च कुरुजांगले शाषवः। गं
गायमुनयोस्तीरे पयोष्णीमरकंटके। नर्मदाबाहुदातीरे भृगौ लिङ्गे गयमालये। गंगाद्वारप्रयागे च नैमिषे पुष्करे

तथा। संनिहत्यां गयायां च दत्तमक्षय्यतां व्रजेत्। अपि जायेत सोऽस्माकं कुले कश्चिन्नरोत्तमः। गयाशीर्षे वटे
श्राद्धं यो नो दद्यात्समाहितः। एष्टव्या बहवः पुत्रा यद्येकोपि गयां व्रजेत्। यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत्।
आदिपुराणे। पंचक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः। महान्यद्यापश्चिमेन यावद्धर्मेश्वरो गिरिः। उत्तरेणतु पूप
स्य यावद्दक्षिणमानसं। एतद्गयाशिरो नाम त्रिषु लोकेषु विश्रुतमिति। शूलपाणिर्बृहस्पतिः। गयायां धर्म[illegible]
सदसि ब्रह्मणस्तथा। गयाशीर्षे अक्षयवटे पितृणां दत्तमक्षयं। धर्मारण्यं धर्मपृष्ठं धेनुकारण्यमेव च। दृष्ट्वैतानि पितृंश्चार्च्येन
वंशान् विंशतिमुद्धरेत्। ब्रह्मकासतो वायवीये। शमीपत्रप्रमाणेन पिंडं दद्याद्गयाशिरे। उद्धरेत्सप्तगोत्राणि कुलमेकोत्तरं
शतं। सप्तगोत्रकुलमेकोत्तरं शतं। सप्तगोत्राणितु। पिता माता च भार्या च भगिनी दुहिता तथा। पितृमातृष्वसा चैव
सप्तगोत्राणि वै विदुरिति। गोत्राणामेकोत्तरशतं कुलपुरुषा इत्यर्थः। ते चोक्ता गोत्रे च। तत्त्वानि विंशतिं पा
दशैकादशा अष्टपंचादि च गोत्राणां कुलमेकोत्तरं शतं। मता च चतुर्विंशतिः। तथा द्वादश पूर्वा द्वादशापराः। एवमाग्ने
पि। प्रयोगपारिजाते पाद्मे। शाकानाममयी मुद्रा संस्थिता यत्र कुत्रचित्। वाराणस्यां परा ध्येया समंताद्योजनत्र
यं। तत्र यत्किंचित्तैलकं कुर्यात्सपिंडं वा न दर्शितं विष्णुलोकं स गच्छेत्तु कृत्वा ते शाश्वतं पदं। [illegible]वैवाराहे च श्रीकं

स्यात्फलानि ध्येयत्कर्म क्रियते नरैः॥ स्नानं दानं तपः श्राद्धं सर्वमक्षयतां व्रजेत्। अथ निषिद्धदेशाः। पृथ्वीचंद्रोदये स्कांदे। त्रिशं
कोर्वर्जयेद्देशं सर्वं द्वादशयोजनं। उत्तरेण महानद्या दक्षिणेन तु कीकटान्। देशस्त्रैशंकवो नाम श्राद्धकर्मणि वर्जितः। वा
यवीये। वर्णाश्रमधर्माश्च देशा वर्ज्याः प्रयत्नतः। यमः। कृष्णं कृमिहतां म्लेच्छसंकीर्णानि अगाधिकं। देशं त्वनिष्ट
राद्धं च वर्जयेत्तेषु श्राद्धकर्माणि तत्रैव शंखः। गोगजाश्वादिपृष्ठेषु त्रैकुमायां तथा भुवि। न कुर्याच्छ्राद्धमेतेषु पारक्यासु
च भूमिषु। यमः। परकीयप्रदेशेषु पितॄणां निर्वपेत्तु यः। तद्भूमिस्वामिपितृभिः श्राद्धकर्म विहन्यते। अतस्तारतपारविपारकी
यगृह्य स्वस्वामिपितृस्तर्पयेदादि। तद्भूमिस्वामिनस्त्वस्य हरंति पितरो बलात्। अग्रभागं ततस्तेभ्यश्चीयादत्वान्न
व्यं च जीवतां। श्राद्धे हीनमग्रभागं चोत्तानदक्षिणाभ्यां श्राद्धापातु मुख्यमिति केचित्। षोडशपिंडोक्तेर्यच वाध
वानामपिपिंडोक्तेर्यथा ध्रुवध्रुवदेवतादेतर्पणाबाधाय नेष्यः। नमगो त्र पूर्वश्राद्धनिषेधोऽतो न्यत्रातिगो
डः। विप्रास्तु तस्य शूद्रपूर्वश्राद्धनिवेदनान्यत्र। अथ दानं चान्यत्यागोत्स्यर्यैकार्यमिति मैथिलाः। तन्न।
अग्रभागस्य श्राद्धपरत्वमोनाभवत्। मंत्रदाने चानिवेद्यास्वावत्। स्वामित्वपूर्वकरणं नगेनव्यव

धानापत्तेरंगात्वेन चं मानात्तावान्। इदं च स्वाम्यनुज्ञाभावे। तदुक्तं तत्रैव ब्राह्मे। स्वम्मुलिप्तेषु गेहे
षु दत्तं ननुज्ञापितेषु यो यच्छ्राद्धं सर्वं तेषुदातव्यं धर्म्यमेतेषु। ... नोच्यते किरातेषु कलिंगेषु कोंकणेषु खसेषु पि सिंधो
रुत्तरकूलेषु नर्मदायाश्च दक्षिणे। पूर्वे करतोयायाश्च न देयं श्राद्धमुच्यते। इदं काम्यविषयं अन्यथा तत्रत्यानां सर्वश्राद्धाकि
रणापत्तेः। नर्मदादक्षिणपवादस्वादि ब्रह्मस्य चोद्धयोयत्रयत्र गोदावरीनादिशथिया मापिष्ठ ... प्रदेशो तीर्थपा ...
परकीयत्वापवाद आदित्यपुराणे। अटवी पर्वताः पुण्या नदीनी तीर्थानि आयतनानि च। सर्वाण्यस्वामिकान्याहुर्न हि तेषु
परिग्रहः। वनानि गिरयो नद्यस्तीर्थान्यायतनानि च। देवखातास्तडागाश्च नस्वाम्यं तेषु विद्यते। स्मृतिसारे। नैकवारो न च
धृपिनांतरिक्षे कदाचन। श्रुतिस्मृत्युदितं कर्म न कुर्यादातुरः क्वचित्। दिवोदासीये। म्लेच्छदेशे तथा रात्रौ संध्या
यां चाविप्रविवर्जितः। न श्राद्धमाचरेद्विद्वान्नचाकालेऽकथंचन। अथ श्राद्धकालाः। ते च संक्रांतिषु गादि न हा ... पाद्ययः
श्राये पार्वणत्रिष्ठिर्दृष्टये ... एव। केचित्तरसंतो। पृथ्वीचंद्रोदये हेमाद्रौ पराशरः। श्राद्धं वद्धा ... संक्रांतौ।
नचोदकनवोत्सवनवेकं ने तैथा गृहे। न ... पितरः। मत्स्यस्यापि। पितृ ... मघा कृष्ण तिथौ नां तप

नं· र्हिं·त्र

नवोदकनवकूवाप्यादाविति केचित्। वर्षासुक्रमअद्राप्रवेशेद्भुतिगौडाः। नवान्नश्राद्धविशेषोज्योतिषे। ज्येष्ठाशेषाग्धिमृत्युम
गतेत्रानिशात्मके। नवान्नेभोजिनश्राद्धंजन्मचंद्रार्थितौनतु। आश्लेषाकाके काज्येष्ठामूलजपद्कपुच। भृगुभौमदिनेरिक्तेतिथौनाद्यां
नवोदर्ने। तत्रैव। वृश्चिकेरुक्कूपस्तुनवान्नेशस्यतेबुधैः। अतः कृष्णपक्षेनेतिगौडाः। मैथिकास्तु। अकृताग्रयणंचैवधान्यजात
गतेत्रमितिवाराहोक्तेः। प्रतिषान्यंश्राद्धमाह। तत्र। जातपदस्यश्राद्धयोग्यत्वमुपरत्वात्। हेमाद्रौ जातकर्ण्यः। शरभप्राकुरमायास्यांक्षीणचंद्राद्विजोत्तमा
अष्टकासुभविष्यमतन्नदत्तंतयाक्षयं। तत्रैवशरभवः। यदाविर्व्यतीपातोभानुपादस्तथावच्च। पर्वणकेनामतस्मोक्तंमयना[illegible]चतुर्दशी।
याज्ञवल्क्यः। अमानाश्याश्काद्धृद्धिः कृष्णपक्षोयनद्वयं। द्रव्यंब्राह्मणसंपत्तिर्विषुवत्सूर्यसंक्रमः। व्यतीपातोगजच्छाया ग्रहणंचंद्र
सूर्ययोः। श्राद्धंप्रतिरुचिश्चैवश्राद्धकालाःप्रकीर्तिताः। कृष्णपक्षोऽपरपक्षोपिरा[illegible]शाकेनाप्यपरपक्षेनातिक्रमेन्मासिमासिवोसनमितिश्रुते।
ऊर्ध्वंवाचतुर्थ्यायदहःसंपद्यतेकृतेतत्रदर्शीमितिकात्यायनोक्तेः। मासिमासिकार्यमपरपक्षस्यापराह्णःश्रेयानितिआपस्तंबोक्तेःतत्र
इंगवत्यादियदहःसंपत्तिर्वातितत्रपक्षा। यदेकदिनेश्राद्धंतदादर्शएवश्रेयात्रकलैनामावास्यायाःपर्याद्यदर्शात्। एतेनकृष्णपक्षेयदहःसंपद्यते
मावास्यायांतुविशेषेतिगौणातिनिगमोक्तेर्गुणोपरपक्षः। द्रव्यागमावास्येतिशूलपाणिमतमपास्तं। अग्न्याकोदर्शेनापिमा[illegible]श्राद्धविधिरितिनारा
यणवृत्तिः। निरग्नीनांकाम्येश्राद्धविदिते। आहिताग्नेस्तुदर्शेएनच। नदर्शेनविनाश्राद्धमाहिताग्नेर्द्विजन्मनइतिमनुरक्तेः। कृष्णपक्षेमपिन

मद्दालक्ष्मयश्रेष्ठत्वंतत्रोक्तंप्राक्। व्यतीपातेविशेषमाहहेमाद्रौशंखः। फलंतुतस्मकंमुत्पन्नौ। भ्रमणेकोटिरुच्यते। पतनेशतकोट्यस्तुपातेवैदम
स्तयं। अयुतानिःशतानिःशास्त्रे। [illegible]विंशतिस्तथा। स्त्रीत्वमणवैकविंशतिः। तपनेदशनाड्यस्तुपातितेसत्यनाडिकां। हेमाद्रौमार्कंडेयः। पदाचस्रोत्रियो
गृहवेदविदग्निमान्। तदैवकेनापिकर्तव्यंश्राद्धंवाविषुवच्छुभं। दूदंचापिडंकार्यमितिहेमाद्रिः। एतज्जीवत्पितृकोपिकुर्यात्। ऊढाहपुत्रजनने
विश्वेश्वासोमिकेमहद्धि। तीर्थेब्राह्मणआयातेषट्लेतेजीवतःपितुरितिमैत्रायणीयपरिशिष्टोक्तेः। तिथिविशेषेफलविशेषोयाज्ञवल्क्येनोक्तः। क
न्यांकन्यविदितितस्यप्रत्यक्षकृतापिधनंकविंचयाणिज्यांद्विजश्रेष्ठोपिकश्रापांस्तथा। ब्रह्मवर्चस्विनःपुत्रान्स्वर्णरूपेसकुप्यते। ज्ञातिश्रेष्ठ्यंवसुधं
कामानाप्नोतिश्राद्धदःसदा। प्रतिपत्प्रभृतितिथिकांवर्जयित्वाचतुर्दशीमिताः कृष्णपक्षस्याश्रवमहालयेतुफलंहेमाद्रौपृथ्वीचंद्रः।
पौर्णमास्यांहेमाद्रौपितामहः। अमावास्याव्यतिपातश्चपौर्णमास्यष्टकासुच। विद्वान्श्राद्धमकुर्वाणोनरकंप्रतिपद्यते। यत
माघ्यादिपर्वं। प्रौष्ठपद्यांकेचयकतैर्व्युपयपाकेचपार्थिवपौर्णमासीतथामाघीश्रावणीचेत्यपातर्भाद्रपदामतीतायांतयाकृष्ण
त्रयोदशी। एतास्तुश्राद्धकालावैनित्यानाहुःप्रजापतिरितिविष्णुधर्मोक्तेः। मघाप्रौष्ठपद्यांपूर्वकृष्णत्रयोदशी। तिथिधुवचानेमा
घीपौर्णमितिकल्पतरुः। श्रावणपूर्वमपिनपायोगस्तत्रापात्रयोदशीविशेषपरमितिगौडाः। नक्षत्रेविपितहेमाद्रौ। स्वर्गंप्रपत्य
मजाम्यहर्षक्षेत्रंचक्रेतथा। पुत्रान्श्रेष्ठेचत्स्तोभाग्यंसमृताद्भुतंमुख्यताश्भुभां। प्रदत्तंचक्रतांवापिवाणिज्यप्रभृतीनपि। अरोगित्वं

यशो वीतशोकतां परमां गतिं । धनं वेदान् भिषक्सिद्धिं कुप्यं गामप्यजाविकं । अश्वानायुश्च विधिवद्यः श्राद्धं संप्रयच्छति । कृत
कादिभरण्यंतं स कामानाप्नुयादिमान् । एकांतराण्यपि भारत कौमादितेयानि । माधयायै मरीचिः । कुसीदादिदुरितं पुत्राः द्यूत्यकर्मी
रितं । विष्णुभाक्स्यूपयेषु तदेन कृत्तमिश्यतो रहस्पतिः । आरोग्यं चैव सौभाग्यं शत्रूणां च पराजयं । सर्वान्कामान् ... सुपूर्यो क्र
कमस्तथा । दादिनमेषु तत्र श्राद्ध कुलमतपकं । अन्यानि चावसपण्ववतीश्राद्धादिनिप्रायुक्तानि । मार्कंडेयपुराणे श्राद्धे हंदेवसपत्नो तथा
दुःस्वप्नदर्शने । जन्मर्क्षे ग्रहपीडासु श्राद्धं कुर्वीत यैच्छया । अथ श्राद्धादिकरणः । चंद्रिकायां कृ मनुः । पप्फविणुः ... तीतसंस्थि
तस्याउरसः सुतः । पितृणाधिकसंस्कारं मंत्रपूर्वकमंदतः । इतरो वहमाद्यो च शरीरं ॥ पितुः पित्र्याकर्म...ब्याः पिंडदानोदकक्रिया ।
पुत्राभावे तु पत्नी स्यात्तदभावे तु सोदरः । अत्र यद्यपि पुत्रपदं क्षेत्रजादेकादशविधपुत्रपरं । ते च द्वादश पुत्रा याज्ञवल्क्ये
नोक्ताः । औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः । क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा । गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः ।
कानीनः कन्यकाजातो मातामहसुतो मतः । अक्षतायां क्षतायां वा जातः पौनर्भवः सुतः । दद्यान्माता पिता वा यं स पु
त्रो दत्तको भवेत् । क्रीतश्च ताभ्यां विक्रीतः कृत्रिमः स्यात्स्वयंकृतः । दत्तात्मा तु स्वयं दत्तो गर्भे विन्नः सहोढजः । उत्स

सृष्टो गृह्यते यस्तु सोऽपविद्धो भवेत्सुतः । पिंडदोंऽशहरश्चैषां पूर्वाभावे परः पर इति । तथापि इदानीं औरसेतरेषां तु
पुत्रत्वेन परिग्रहे ... इति स्मार्तो वा श्रुतिवाक्यादि तेषां पुत्रत्वनिषेधादौरसदत्तकपरमेव । यद्यपि पिंडदोंऽशहरश्चैषां कथि
वे परः परः इति याज्ञवल्क्योक्तौरसाभावे दत्तकस्य ... पौत्र ... दत्तकादयः
यः पुत्रेण लोकान्जयति पौत्रेणानंत्यमश्नुते । अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपमिति ... हारीत
लिखितोक्तेः । कौत्सामनंत्यं दिव्यप्राप्तिः पुत्रपौत्रप्रपौत्रके इति याज्ञवल्क्योक्तेश्च पुत्रपौत्रप्रपौत्राः तत्पुत्रः पुत्रिकापु
त्रस्तत्पत्नी भ्राता च तत्सुतः पिता माता स्नुषा तथा । असंनिधाने पूर्वेषां उत्तरे पिंडदाः स्मृता इति स्मृति
संग्रहे प्रपौत्रानंतरं पुत्रिकापुत्रोक्तेः ... भगिनी भागिनेयश्च सपिंडः सोदकस्तथा ... समत्वाच्च दत्त
कस्य । यद्यपि रहस्पतिना पौत्रश्च पुत्रिकापुत्रः स्वर्गप्राप्तिकरावुभौ । रिक्थे च पिंडदाने च समौ तौ प
रिकीर्तितौ इति पौत्रसाम्यमुक्तं याज्ञवल्क्येन च औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुत इत्यौर
ससाम्यं । तथापि ... मंत्री ... विन्यते समर्थ ... प्रयोगात् ... मुख्यपो साम्या

र्णि. २८. योगात्वत्सत्वन्यर्थेनतननुसमाकिकल्पद्रुतोत्प्रामितवंपुत्रःपौत्रः प्रपौत्रो वा प्रमातावाप्रातरः संतातिः। सापि
इसंततिर्यापिक्रियार्हानुपआपतेः तेषामभवे सर्वेषां संज्ञा नोदकसंतातिः। मातृपक्षसापिंडेन संबंधेन योज
कनयाः। कन्ययथपिच्चिकन्यस्वामिःकार्यो। कृपान्पः तत्संघाल्यः। तेषामपितदद्रव्यात्कारयेन्नृपाइतिवि
ष्णुपुराणे। अप्रपौत्राभावेदनकायद्र्याते। दाधी चंद्र मदनरत्नका ब्रादर्शो द्रपः। मदनपरिजातेप्येव
यौपरदेवगद्धधनाद्यमक्तपुत्रेषु विद्यमानेषु नान्यं वैकारयेत्स्वधानि। तिस्कमनृकौ पितामहपितुःप्रश्चा
मवर्त्यपदि। आर्ती। पौत्रेणदाहश्राद्धादिकर्तव्यश्राद्धपौत्र शृं। नैतत्पौत्रेणकर्तव्यं पुत्रवान्प्रपितामह
हइति। इदं पारिशेष्ये पुत्रशब्दस्यद्वादशविधत्वतद्यात्वात्स्वभावेपरत्पररत्यस्यानन्यपरत्वाद
दत्तकाद्यभावेपौत्रादीनामधिकारइत्याहुः। अनयावातिषश्राद्धपनीतपौत्र सत्त्वेप्यनुपनीतपुत्रस्यैवाधि
कारः औरसश्चानुपनीतोपि कुर्याद्धि दधीचंद्रोदयेस्कमंतुः। श्राद्धं कुर्यादवश्यं तु प्रमीतपितृको

द्विजः। व्रतस्थोवाव्रतस्थोवायकएवोयमंवेधादिः स्कंदमतुः। कुर्यादनुपनीतोपि श्राद्धमेकोहियः सुतः। पुत्रियज्ञाहुतिं पाणौ
तु कुर्याद्ब्राह्मणसत्तमः। मनुः। नह्यस्मिन्युज्यतेकर्मकिंचिदामौंजिबंधनात्। नाभिव्याहारयेद्ब्रह्म स्वधानिनयनादृते ब्रह्मवेद
समुत्तुरपि। नाभिव्याहारयेद्ब्रह्मयावन्मौंजीनिबध्यते। मंत्रानप्यनुपनीतोपिपठेदेवैक औरसः। अयं मंत्रपाठास्त्रिवर्षकृतचू
डस्यैव। अनुपेतोपिकुर्वीतमंत्रवत्पैतृमेधिकं। यद्यसौकृतचूडः स्याद्यदि स्याच्चत्रिवत्सरइति स्कमंतुरोः। यत्तु पाल्याप्रः
कृतचूडस्तुकुर्वीतउदकंपिंडमेववा। स्वधाकारं प्रयुंजीत वेदोच्चारं न कारयेदिति। यस्मर्तिसंग्रहे। कृतचूडोनुपे
तश्चापितो श्राद्धंसमाचरेत्। उच्चारयेत्स्वधाकारं न तु वेदाक्षराण्यसाविति। न अथ पंचवर्ष चूडाविषयाहमे तिमाधव
मदनरत्नेऽव्यवीक्षाः। त्रिवर्षाद्ध्वमंत्रवत्त्वस्याधिकत्वं इति वृद्धिका। प्रायश्चित्तश्च मदनरत्ने स्कादेः यद्येषु समस्तमपत्नी
कुर्यात्यथान्य पक्षः। तथौर्ध्वदैहिकं कर्म कुर्याच्छाध्यर्मसंस्कृतः। अथ कौतुकात्यायनः सेंअस्तेनपत्न्यापत्य
निदानं तमंत्रकं। कर्त्तव्यामितरैः सर्वैः कारयेदन्यमेवहि। पुनश्चानंतरमनाधिकारिकं जुवंतेतरैरित्याहुः का
कास्मृतिः। दीपिकादाधादिकाद्यादिदंकुपवेत्यमेधिकं। मदनरत्नेस्कमंकरपितृपुत्रश्च श्चोत्याति माभिण

संस्कार्यादित्यभिप्रायः॥ पितरं नाधिकाश्चौलादौ स्वेनैव कर्मणा। एतच्चौरसस्यैव दत्तकादीनां तूपनीतानामेवाधि
कार इति कालादर्शः। एवं चौरसेऽपि संस्कारे पित्रोस्तूपनीतोऽपि विद्ध्यादौरसः कृतः। इत्यौर्ध्वदैहिके मन्त्रेभ्यो तुप
स्कृताः श्राद्धकारिण इति। अन्यत्रापि विस्तरः॥
हीकापाप्ये च नृपनीतस्याप्यधिकारोऽस्त्याभिः वमुक्तः। अपि च भावे तु काद्यः एकादश पुत्राः तदभावे भर्तुः पाल्य
याँतिव्रते स्थिता। पत्नी च दद्यात्पिंडं कृत्स्नमंशं लभेत चेति स्मृत्युक्तेः। भार्या पिंडं पतिर्दद्याद्भर्त्रे भार्या तथैव च। स्व
श्रीरे श्वशुरश्चैव तदभावे सपिंडकाः इति। पुत्राभावे तु पत्नी स्यात्तदभावे तु सोदरः इति च शंखोक्तेः। पृथ्वी
चंद्रोदये कानीनगूढजसहजपुनर्भूनयाश्रयेः। पत्न्यभावाधिकुर्युस्ते अपध्वस्ताः स्मृता इति स्मृतिसंग्रहात्
त्र्यन्याने कानीनादयः स्युः। पत्युरपि सपत्नीपुत्रे सति नाधिकारः। एवं सपत्न्याः सर्वाभावे तदित्युक्तिः इति मंत्रोक्तेः॥ वि
दध्यादौरसः पुत्रो न तु न्याय्यः [illegible] भावे सपत्नीजः क्षेत्रजाद्याः स्वयमाहृता तेषामभावे जातिः तदभावे सपिंडका
इति मदनरत्ने कात्यायनोक्तेश्च। अपरार्के त्वेवं। तेन यत्तु शुद्धिविवेके उक्तं। सत्यापि सपत्नीपुत्रे पत्युरेवाधिकार

ति। तन्निरस्तं। यत्तु तत्रैव कात्यायनेन। न भार्यायाः पतिर्दद्यादपुत्राया अपि क्वचित्। यच्च विष्णुपुराणे कु
र्युर्येऽपि च स्त्रीभिः कार्यान्येतेति। यच्च मार्कंडेयपुराणे। सर्वाभावे स्त्रियः कुर्युः स्वभर्तॄणाममंत्रकमिति तदासुरा
दिविवाहोढाविषयं। धर्म्यविवाहे तु या सा पत्नी परिकीर्तिता। क्रयक्रीता तु या नारी न सा पत्न्यभिधीयते। न सा दैवे
न वा पित्र्ये दासीं तां मुनयो विदुरिति स्मृतावचनोक्तेः। यत्तु शुद्धिरत्नाकरः शूलपाणिश्च। अपुत्रस्य च या पुत्री सा पिंडं प्र
दापयेत्। तस्याः पिंडं दैहिकं वा एकाहे नैव निर्दिशेदिति जाबालोक्तेः। भर्तुर्धनहरा पत्नी तां विना दुहिता स्मृता। अंगादंगात्संभ
वति पुत्रवद्दुहितान्यथामिति। इह स्यात्तीव्रदुहितुर्धनहारित्वोक्तेश्च पुत्राभावे कन्या तदभावे सपत्नीपुत्रः स्यादित्यत्र [illegible] धान्यो तु दुह
नः [illegible] इति दुहितुर्मतेन धनग्राहित्वेन पुत्रस्य तच्छ्राद्धाधिकारापत्तेश्च पेक्षणीयं। केचित्तु भ्रातृपुत्राद्यभा
वविषयं। पत्न्यभावे अविभक्तस्य सोदरः। पूर्वोक्तशंखवचनात्। [illegible] धनहारित्वोक्तेश्च [illegible]। तत्र
[illegible] दुहिता पुत्रवत्कुर्यान्माता पुत्रो वेति संस्कृता। अशौचमुदकं पिंडमेकोद्दिष्टं सदा नयोरिति [illegible]
तदभावे दौहित्रः धनहारित्वात्। मातापित्रोस्तु पश्चाद्या [illegible]। कुर्यान्मातामहस्यापि [illegible] ता इति
चंद्रिकायां स्मृत्युक्तेः। यथाजातस्यापि सुतः। पिनः कुर्यात्क्रियां नृप। [illegible] दौहित्रोऽपि तथार्हति [illegible]

र्णि० व० परार्के त्वावियुक्तेश्च। एतद्धनहारिण आवश्यकं नान्यस्येत्याह नैव स्कंदः। श्राद्धं मातामहानां तु अवश्यं धनहारिणा। दौहि
त्रेणार्थनिष्कृत्यै कर्तव्यं सुसंयुक्तमिति। तेन दौहित्रो पुत्रीकृत प्रतिरूपस्यापि निको क्तिः परास्ता। अत्र पत्नी दौहित्रस्य समवाये श्राद्धं कुर्वात्पत्न्य
कुर्यान्न। दौहित्रमात्रपुत्रस्त्वेविषं कास्यदौहित्रः॥ आपि मातामहादपुत्रः स्यात् तत्पुत्रस्तत्कल्पितं श्राद्धं नैव। ज्येष्ठस्येतत्पु
त्रः कुर्यादिति वृद्धहारीतगार्ग्यौ॥ सारकृत दौ तु। भ्रातुर्ज्येष्ठाता स्वयं चक्रे तत्कार्या विन्नाविधिलातस्यपात्रा तत्कृतं श्वनो
यस्यन। स्तिसहोदरद्रुतिप्रस्नोक्तिः। पत्नी कुर्यात्कृताभवे पत्न्यभावे तु सोदर इति कौर्मे। ज्येष्ठाभ्रातैव कुर्यान्मृतस्य पुत्रः।
त पत्नुनानुजस्यैव्याभ्रज द्वातित तत्कनिष्ठभ्रात्रा सतो च वयं। मध्यमनुः। सर्वेषामेव ज्ञातीनामेकश्चेत्पुत्रवान्भवेत्। सर्वांस्तांस्तेनपु
त्रेणपुत्रिणो मनुरब्रवीत्। तत्सोदराणां नाव विषयामित्युक्तं। मदनरत्ने स्मृतिसंग्रहे। पुत्रः कुर्यात्पितुः श्राद्धं पत्नी च तदसं
निधौ। धनहार्यथ दौहित्रस्तातोमातामहस्य तः। भ्रात्रो सहोदरो भ्राता कुर्यात्सोदादिस्वर्क तम्रतेः भ्रातृपुत्राभावे
क्रमेणापितृमातृस्नुषास्वस्रस्तत्पुत्रादयः। धनहारित्वान्मनुगितानीलकंठत्वं विशेषमाह मदनरत्ने कस्सायनः। अनु
जो अग्रजो वापि भ्रातुः कुर्वीतिसंस्क्रियां। ततस्त्वसोदरात्तद्वत्क्रमेणातनयस्तयोः। अपरार्के कात्यायनिस्मृत्रेपि
यो पवाप त्नीपिता। भ्रातास्तथा गुरुः। स्नेहाद्धनकारी च कुर्यात्पिंडोदकक्रियां। मार्कंडेयपुराणे। पुत्रो

भ्राताचतत्पुत्रः पत्नी माता थ तातपिता। क्षत्रा भ्रावेपरिशिष्यश्च कुर्वीरन्नौर्ध्वदैहिकं। तेन धनहारी स्वतोपि
दृतातिकादर्शः। अत्र पाक्षिको नयी कश्चित। एवं वाक्येषु यत तः स्याद्वादिरुः श्रौतकर्मणोः। अथाग्निकाया अथव
सस्मृतिवत्। वृष्वा चंद्रोदये वृद्धमनुः। सपास्यस्वायतत्पुत्रेण ज्ञातिसंबंधिना धवाः पुत्राभावे तु कुर्वीरन्सापिंड
नयथाविधि। मार्कंडेयपुराणे। पुत्राभ्युसंतनवंधुर्ध्वसरवो विश्वगुरस्य कजामाता स्नेहवान्कुर्यादरविकं पैत
मौधिकं। स्याद्दिकायां च कुर्यात्तातप्रमातुको भगिनी यस्य स्वस्त्रीयो मातुलस्य च। श्वशुरस्य गुरोश्चैव सरव्यु
र्मातामहस्य च। एतेषां चैव भार्याणां स्वस्कर्मातुः पितुस्तथा। श्राद्धमेषां तु कर्तव्यमिति वेदविदो विदुः। श्राद्ध
विवेके गणेशविचंद्रोदये च ब्राह्मे। दत्तानां चाप्यदत्तानां कन्यानां कुरुतेपिता। ऊर्ध्वं तु देहनितालेषु कुर्वीरन्सु समा
हिताः। दत्ता वाग्दत्ता मातामहानां दौहित्राः कुर्युश्च यह निचत्वरे। तेपितृपक्षे कुर्वन्ति दुहितायेहतसिवदा।
जो मातुः स्वकुराश्च कुस्तेषां तेपि च संयता। मित्रापां तदपरत्वान्न। श्राद्धे परवातां उरस्तेथा। भागिनेयस्त
तानां च सर्वेषां त्वपरस्मिनिः। राज्ञो स्ता तेपिंडं तु। नेत्र पत्न्येपुरोहितः मौत्रेपातदथा चं तु पुरस्त्तीलोकस्तेनि
सः। अत्रद्धतीया हादौ श्राद्धं। येधानसस्यैसंचयपरं। काकादयोर्दहादिमंत्रवत्सेत्रा। वेदव्यादौस्त

स्तःकृता ॥ तदभावे तु पौत्रप्रपौत्रः पुत्रिकासुतादौहित्राद्यो धनहारी भ्राता तत्पुत्रश्च च । पिता माता तत्स्नु
षा वैवस्वस्वा तत्पुत्रश्च च । सपिण्डः सोदको मातुः सपिण्डश्च सहोदकः स्त्री च शिष्यऋत्विगाचार्यो जामाता च स
खा पितृव्य । उक्तानन्तरं बंधोरिक्थेन कारयेद्धनी पतिः । गौतमः अपुत्राभावे सापिण्ड्यमातृसपिण्डाः शिष्या
श्च तदभावे ऋत्विगाचार्यौ । पत्नी चंद्रिकायां ... भ्राता तत्पुत्राः । प्रीत्या श्राद्धं प्रकर्तव्यं सर्वेषां वर्णलि
ङ्गिनामिति । तत्सवर्णविषयं ब्राह्मणस्त्वन्यवर्णानां न कुर्यात्कर्म किंचन कामात्क्रोधाद्भयान्मोहात्कृत्वा
तज्जातितां व्रजेदिति ब्रह्मोक्तेः । न ब्राह्मणेन कर्तव्यं शूद्रस्यौर्ध्वदेहिकं । शूद्रेण वा ब्राह्मणस्य विना पारसवत्व
मिति पारस्करोक्तेश्च । पारसवत्वं शूद्राप्रपुत्रः । अत्रेदं तत्त्वं सर्वत्र पुत्रादेः पूर्वस्याभावे परस्याधिका
र उक्तः । तत्राभावो नास्तित्वं अनिधनत्वं चोच्यते । अत्र एव पूर्वस्यासांनिध्ये पूर्वस्यानित्युक्ते । तदा सांनिध्ये पत्न्यादेः
सर्वत्राधिकारिणः पत्न्यादेः सपिण्डादावधिकारः । सांनिध्ये तु पूर्वमेव चौर्ध्वं अतो नाधिकारिणस्तत्र ऋ
दिना सुत ... पौत्रवित्तावसिते पुत्रीकादाविति चेदपि एकादशाद्योक्तमशौच्येष्वस्यावाधिवाक्यपाः
ण्येनैव तु पत्न्यादिमिकेनैव पुनस्तर्पणीयः । आदेशान्तरेऽपवादात्पुत्रेणापि मेवेति पुनरावर्तनीयमासिकम्

षोपावर्तनीयः । एकादशाहमासिकानि नावर्तते । तस्त्रायसापिकर्तव्यं सापिण्ड्यकरणं पुनरितिव
दायुक्तेः धायामादाविति केचित् । तन्न । अस्य निर्मूलत्वात् । अतः सदापि कनिष्ठकृतमावर्तते ।
दृष्टिश्राद्धे पिण्डपितृयज्ञार्थं कृतं न तर्पणैस्तेनासापिण्ड्यं ... भ्रान्त्युक्तेः । पितृव्यभ्रातृसमाचरेत् । न पार्वणं नाभ्युदय
कुर्वीत ... ... इति निषेधनादिश्रुतिः । भ्राता वा भ्रातृपुत्रो वा सपिण्डः शिष्य एव वेत्युक्तेर
श्चापत्यापत्यादेश्चर्योक्षेषुः कनिष्ठादेरप्याधिकारात् । यथा ... तथा पुत्रकर्तृके तत्सा
पिवाधः । सापिण्ड्ये तु ... निर्णयं वक्ष्यामः । अधिकारविशेषे पात्रे ... व्यवस्थोक्ता । विष्णुपुरा
णे । पूर्वाः क्रिया मध्यमाश्च तथा चैवोत्तराः क्रियाः । त्रिप्रकाराः क्रियास्तेतासां भेदान्शृणुष्व मे । अदा
हाद्द्वादशाहाच्च मध्ये याः स्युः क्रियास्तु ताः । पूर्वा मध्यमा मासि मासि एकोद्दिष्टसंज्ञिताः प्रेते पितृत्वमापन्ने स
पिण्डीकरणादनु । क्रियन्ते याः क्रियाः पुत्रैः प्रोच्यन्ते ता उत्तराः । पितृमातृसपिण्डैश्च समानसलिलैस्त
था । तत्संघातगतैश्चैव राज्ञा वा धनहारिणा । पूर्वा मध्याश्च कर्तव्याः पुत्राद्यैरेव चोत्तराः ॥ दौहित्रैर्वा नर
श्रेष्ठ कार्यास्तत्तनयैस्तथा । मृताहनि तु कर्तव्याः स्त्रीणामप्युत्तराः क्रियाः । दौहित्रतत्पुत्रयोर्धनहारिणोरिदं

नि॰र्ण॰

७०

एवमन्यस्यधनहर्तुः पश्चाद्धर्महरः सपिंडदायीत्यापस्तंबोक्तेः। प्रेतस्य प्रेतकार्याणि अकृत्वा धनहारकः। वर्णानां यद्वधे प्रोक्तं तद्व्रतं प्रयतश्चरे
दितिपृथ्वीचंद्रोदये व्याघ्रपादोक्तेः। मदनरत्ने स्कांदेपि। मलमेतन्मनुष्याणां। द्रविणं यत्प्रकीर्तितं। भिसुत्त्वा ऋषिभिस्तस्यानिर्दिष्टानि ष्कृतिः पाव
नीपरा॥ अदेहपतनात्तस्य कुर्यात्पिंडोदकक्रियामित्युक्तं॥ क्रियानिबंधे कात्यायनः। नचेन्माता न च पिता कुर्यात्पुत्रस्य पैतृकं॰ नायजः भ्रातृयात्रा
तां भ्रातृणां तु कनीयसां। पृथ्वीचंद्रोदये बौधायनः। अपित्र्यं श्राद्धं न कर्तव्यं पुत्राणां तु कदाचन। भ्रात्रा चैव न कर्तव्यं भ्रातॄणां च कनीयसां॥ यदि स्ने
हेन कुर्यात्तां सपिंडीकरणं विना॥ गयायां तु विशेषेण ज्यायानपि समाचरेत्॥ अन्याभावे पित्रादिरपि कुर्यात्। उत्तमबोधे प्रेतं पिता भ्राता यवी
यजः। जननी वापि संस्कुर्यान्महद्दैनोन्यथा भवेत्॥ इति स्मृत्यंतरे। ब्रह्मचारिणां तु पृथ्वीचंद्रोदये कश्यपः पृथ्वीचंद्रोदये च श्राद्धे॥ असमाप्तव्रतस्यापि
कर्तव्यं ब्रह्मचारिणा॥ श्राद्धं तु मातापितृभ्यां न तु तेषां करोति सः। श्राद्धं मासिकाद्येकादि सर्वकार्यमित्यर्थः॥ न बालातिक्रमे प्राधान्य सतं॰ पृथु
ब्रह्मपरिग्रहे॥ नत्वग्नौक्रं तकेकर्म ब्रह्मचारी स्वयं कार्यित। न रीक्षणामरयत्नेन त्केच्छ्रादत्त पृथगरन्। पितर्यपि मृते न पादोषा भवति कर्हिचि
त्॥ आशौचकर्मणा तस्या अदत्त्वा ब्रह्मचारिणा॥ पश्चायाज्ञवल्क्यः॥ न ब्रह्मचारिणः कुर्युरुदकं पतिताश्च तथा इति॰ तदन्यसतं॰ अन्या
भावे तु ब्रह्मचारिणापि कार्यं॰ पूर्वोक्तरद्वमनुवचनात्॥ आचार्यपित्र्युपाध्यायान्निर्हृत्यापि व्रती व्रती॥ सकटान्नं च नाश्नीत न च तैः सहसं
वसेदिति नैवोक्तेः॥ ब्रह्मचारिणः शवकर्मणि व्रतान्निवृत्तिरन्यत्र मातापित्रोरिति वसिष्ठोक्तेः॥ अत्राशौचमकृत्वा वक्ष्यामः॥ प्रागुपनयना
त्पुत्रस्तस्य पंचवर्षोत्तरं सपिंडीकरणवर्जं षोडशश्राद्धादि सर्वं कार्यमित्युक्तं देवजानीये। असंस्कृतानां त्रसोपि उद्ध्वसंस्कृताना कुर्या

द्वितिप्रचेतोवचनाच्च॰ एतच्चाग्रे वक्ष्यामः। अविभक्तानां विशेषमाह पृथ्वीचंद्रोदये मरीचिः। बहवः स्युर्यदा पुत्राः पितुरेक
त्रवासिनः। सर्वेषां तु मतं कृत्वा ज्येष्ठेनैव तु यत्कृतं। द्रव्येणाविभक्तेन सर्वैरेव कृतं भवेत्। ज्येष्ठस्य कृत्वापि स्वैकैकभागिन
इति सर्वः। तेनैवैत्र ब्रह्मचर्यपरान् वर्ज्य नादृष्यः। कार्ये संस्कारास्ते सर्वेषां भवंतीति सिद्धं। संसृष्टिनामप्येवं॰ तदुक्त्वा
विभक्तानां च यथाहायनाः। नवश्राद्धं सापिंड्यत्वं श्राद्धानापि षोडश। एकेनैव तु कार्याणि संविभक्तधनेष्व
पि। रूपद्वारितः। सापिंडीकरणांतानि यानि श्राद्धानि षोडश॰ पृथङ्नैव सुताः कुर्युः पृथग्द्रव्या अपि क्वचित्। ऊर्ध्वमपि
कार्याः सर्वैः कुर्युः पृथक्पृथक्॰ मदनरत्ने॰ विभक्ताः पृथक्कुर्युः प्रतिसंवत्सरादिकं॰ एकेनैवाविभक्तेषु कृतं सर्वैः कृतं
तत्कृतं तेनाहिकादि चाविभक्तानामानि यमुद्दीतिपदन्नुश्च कपाषाः। परास्तु। इत्येतत्कजनकस्य पुत्राद्यभावे
दत्तानं तत्कृते भ्रीगोत्र जनकपितृन भगद्रवेपः स्यात्। गोत्रिणिचानुगाचव्येतद्दत्तः सम्बंधिमदनरत्ने।
द्वौ जनकस्य विषये॰ एतच्च प्रवरमंजर्यां कात्यायनमपुनर्लौगाक्षिर्यश्चोक्तेः। अपुत्रे ह्वृत्रिकं सकृत्रिमपुत्राः प
राषारमहणानां तथा तेषामुभाभ्यां दत्ताः। यथा शौंगशैशिरयिः। यानि च्यानान्येव समुत्पन्नानि तत्कुला
भवंतीत्यादिना च्यायोपि श्रोः प्रवरोनुवर्तते। अथ च्यवनस्य वात्स्यौ भार्यास्तत्र पपत्यं न स्यात्तस्य रिक्थं हरेयुः पिंडं चै
च्या स्त्रिपुरुषं कुर्यादुभयोनस्य ओभाभ्यामेव दद्यात्करकारिश्राद्धं पृथग्उद्दिश्यैकपिंडान्वनुकीर्तयेत्पायिपहि

निर्ण० त०

तास्वोत्पादयीतारं चरत्तृतीयात्पुरुषाद्धितेहेमाद्रौकात्यायनः स्यायंतः पितरयर्गास्य स्त्रावद्धि
तकादयः प्रेतानां योजनं कुर्युः स्वकोवै । पत्नी तेः सह द्वाभ्यां सहापतत्स्युत्रापौत्रा । तत्र च तनतमं चतु
र्थपुरुषो हरेत्तस्याहत्वान्न पुरुषी सा चरेणषुकालेषु विशेषो नास्ति वर्ण्यता । अत्यायेमाह हेमाद्रिः । दत्तको
दयः जनकपालकयोः कुले प्रेतानां स्वर्गाय्यैः सापिंडनं कुर्युः । दत्तकानां पुत्रास्तु पितृदत्तकस्य पित्रा ध्यां जनकपालकस्य
स्वपितामहाभ्यां सपिंडनं कुर्युः तेषां पौत्राः स्वपितरं दत्तकेन पितामहेन च सपिंडयेयुः चतुर्थो पितृस्कुलस्यैव । तेषां प्रपौत्रास्तु दत्तकस्य प्रपितामहस्य पालक
कुलस्य चतुर्थेयो जयन्नवा । द्व्यामुष्यायणस्य मदनपारिजातादौ तु पित्रोर्द्वयोः पितामहयोः प्रपितामहयोर्वा श्राद्धं देयं तत्र द्वयोः पित्रायोः पृथक् पिंडदानं द्वयोरेकोद्दिष्टेनैको
वेति अत्र केचित् आवयोरयमिति परिभाष्य यो दत्तस्तस्येदं द्वयोः पित्रोः श्राद्धं यस्त्वपरिभाष्य दत्तः स यद्यीतु रिव सपालकायैव दद्यादित्याहुः अत्र
मूलं तु एव प्रष्टव्याः वस्तुतस्तु जनकस्य पुत्रपत्न्याद्यभावे दत्तको द्वयोर्दद्यादन्यथा पालकायैव प्रागुक्तकात्यायनवचनात् मानवीयमप्यत द्विषयमे
व । गोत्रं तु श्राद्धे पालकस्यैव विवाहादौ तूभयोरित्यादि मत्कृतप्रवरदर्पणे ज्ञेयं यस्त्र भर्त्यक्रीतायां परस्मात्तायां दास्यां चोत्पन्नः सर्वाजिनस्
वदद्यात् मत्स्यं विना स्वयमुपनतायां तु क्षेत्रिण एव तदुक्तं पृथ्वीचंद्रोदये कौर्मे अनियोगात्कृतो यस्तु शुल्केन जायते सिद्धः प्रदद्याद्बी
जिने पिंडं क्षेत्रिणे तु ततोन्यथेति क्षेत्रजादि विशेषस्तु कलौ तदभावान्नोच्यत इति दिक् । जारजानां विशेषमाह अपरा
र्के नारदः जायंते त्वनियुक्तायां मे केन बहुभिस्तथा अरिक्थभाजस्ते सर्वे बीजिनामेव ते सुताः दद्युस्ते बी
जिने पिंडं माता चेच्छुल्कतो हृता अशुल्कोपहृतायां तु पिंडदा वोढुरेव ते धर्मार्थे श्राद्धकरणे फलमाह चंद्रिकायां शातातपः प्रीत्या श्राद्धं तु

कर्त्तव्यं सर्वेषां वर्णलिंगिनां एवं कुर्वन्नरः सम्यक् महतीं श्रियमाप्नुयात् गयायामपि तत्रैव ब्रह्मकैवर्ते आत्मजो वाथवान्योपि गयाशीर्षे यदा
तदा यन्नाम्ना पातयेत्पिंडं तं नयेद्ब्रह्म शाश्वतं एतच्च यदा फलं भूमार्थिना द्विस्त्रिर्वा क्रियते तदा प्रेतशिलाश्राद्धवर्जं कुर्यात् तस्य प्रेतत्ववि
मोक्षार्थत्वात्तस्य च जातत्वादिति केचित् वस्तुतस्तु सन्यासिश्राद्धवदत्रापि कार्यं सर्वं सांगेधिकारादिति युक्तं प्रतीमः सन्यस्तपित्रादि
स्तु पितुः पुत्रादिभ्यः सर्वश्राद्धेषु दद्यादित्युक्तं प्राक् वक्ष्यते च जीवत्पितृश्राद्धं अत्र स्त्रीशूद्राणां श्राद्धं मंत्रवर्जितं स्त्रीभवति स्त्रीणाममं
त्रकं श्राद्धं तथा शूद्रास्तु तस्य च श्राग्निजाश्व व्रतादेशा तेन च कुर्युस्तथैव तदिति हेमाद्रौ मरीचिवचनात् अयमेव विधिः प्रोक्तः शूद्राणां मंत्रव
र्जितः अमंत्रस्य तु शूद्रस्य विप्रो मंत्रेण गृह्यते इति ब्राह्मोक्तेः आगृह्यते संबध्यते अस्य श्राद्धप्रकरणपाठेपि परिभाषात्वान्न प्रकरणेन सं
कोचो युक्तः तेन शूद्रस्य स्नानदानादावपि विप्रेण मंत्रपाठः कार्यः अमंत्रस्येति विशेषणात् स्त्रिया अपीति शूलपाणिः यत्तु तेनोक्तं मं
त्रजन्य नियमादृष्टसिद्धिस्तु नमस्कारेण अनुमतास्य नमस्कारो मंत्र इति गौतमोक्तेरिति तन्न दृष्टद्वारेव तत्प्राप्तिर्न स्वातंत्र्येण अन्य
थानवाप्तेप्यवघातजन्यादृष्टार्थं सोपि क्रियत इति यत्किंचिदेतत् तेन पितॄणां नामगोत्रतइत्यादौ यत्र द्विजानामपि नाममंत्र उक्तः
तत्र प्रतिप्रसवमात्रार्थं गौतमीयं युक्तं नतिलावपनादावपि अत्र केचित् वैदिकमंत्रो विप्रस्य पौराणस्तु शूद्रे पठनीयः नहि वेदेष्व
धिकारः कश्चिच्छूद्रस्य विद्यते पुराणेष्वधिकारो दर्शितो ब्राह्मणैरिहेति तत्रैव पाद्मोक्तेरित्याहुः तन्न नाध्येतव्यमिदं शास्त्रं वृषलस्य
तु सन्निधाविति कौर्मे पुराणनिषेधेन वेदस्य दूरापास्तत्वात् अध्येतव्यं ब्राह्मणेन क्षत्रियेण विशापि च श्रोतव्यमेव शूद्रेण ना

नि॰सिं॰टी॰

ध्येतव्यं कदाचन॥ श्रौतं स्मार्त्तं च वै धर्मं प्रोक्तमस्मिन्नृपोत्तम तस्माद्वेदं विना विप्रं न श्रोतव्यं कदाचन तत्रैव पुराणाधिकारे भविष्योक्तेश्च प
तेन नाध्येतव्यमिति निषेधः मंत्रेतरपुराणपर इति श्रीदत्तादिमतमपास्तं तेन पौराणमंत्राणामेव विप्रेण पाठनं वैदिकानामिति सिद्धं द्विजस्त्रि
यस्तु संकल्पमात्रं स्वयं कृत्वा वैदिकमंत्रयुक्तं सर्वं ब्राह्मणद्वारा कारयेयुरिति प्रयोगपारिजातः अत एव स्त्रीणां नित्यकृते विवाहे स्त्रीपरमि
ति हेमाद्रिराह अनुपनीतस्य वैदिकमंत्रयुक्तं सर्वं स्वयमेव कुर्यादित्युक्तं प्राक् यत्तु प्रागद्विजाश्च व्रतादेशादिति तद्दशाक्तविषयमनु
उ विषयं वेति दिक्॰ शूद्रस्य तु सदाऽमश्राद्धमेव सदा चैव तु शूद्राणामामश्राद्धं विधीयत इति स्मृतेः पृथ्वीचंद्रोदये मात्स्येपि एवं
शूद्रोपि सामान्यं वृद्धिश्राद्धं च सर्वदा नमस्कारेण मंत्रेण कुर्यादामान्नवत्सदा। तत्रैव वृद्धपराशरः॰ आमान्नेनान्नतु शूद्रस्य तु छिन्नतु द्विजप
जन॰ तत्तच्छ्राद्धं तु निर्वाप्य सजातीनाशयेद्वथ॰ अत एव॰ आमं शूद्रस्य पक्वान्नं पक्वमुच्छिष्टमुच्यते हेमाद्रौ भविष्ये॰ धर्मेप्सवस्तु धर्मज्ञा
यदि शूद्राः प्रकुर्वते अग्नौकरणमंत्रश्च न मस्कारो विधीयते॰ आवाहनादिकं त्तत्र यथा शूद्रेण तच्छृणु देवानां देवनाम्ना तु पितॄणां ना
म गोत्रतः पिंडादीन्निर्वपेद्धीरनामतो गोत्रतस्तथा शूद्राणां गोत्राभावे पि काश्यपं ज्ञेयं गोत्रं॰ तस्मादाहुः सर्वाः प्रजाः काश्यप्य इ
ति श्रुतेः गोत्रनाशे तु काश्यप इति व्याघ्रपादोक्तेश्चेति हेमाद्रिः एवमन्यत्र गोत्राज्ञाने एवं तर्पणादिषु ज्ञेयं तत्रैव भविष्ये शूद्रस्तु राम॰
गृहपाकेन तत्पिंडान्निर्वपेत्तथा सक्तुमूलफलं तद्वा पायसं वा भवेत्स्मृत दैवताभ्यः पितृभ्यश्च स्वयं नमस्कारमंत्र इति केचित् विज्ञा
नेश्वरोप्येवमाह हेमाद्रिस्तु शूद्रोप्यमंत्रं कुर्यादनेन विधिना बुध इति मात्स्ये मंत्रनिषेधान्नाममंत्रेणेत्याहुः पृथ्वीचंद्रोदयेप्ये

दे राजकार्ये नियुक्तस्य बंधनिग्रहवर्तिनः व्यसनेषु च सर्वेषु श्राद्धं विप्रेण कारयेत् यत्तु भारते राजधर्मेषु यवनाः किराताः गांधाराश्चीनाः शब
रबर्बराः शकास्तुषाराः कंकाश्च पह्लवाश्चांध्रमद्रकाः इत्युक्त्वा ब्रह्मक्षत्रप्रसूताश्च वैश्याः शूद्राश्च मानवाः कथं धर्माश्चरिष्यंति सर्वे विषयवा
सिन इति वोक्त्वा॰ वेदधर्मक्रियाश्चैव तेषां धर्मो विधीयते पितृयज्ञास्तथा कूपाः प्रपाश्च शयनानि च दानानि च यथाकालं द्विजेभ्यो विसृजे
त्सदा तथा दक्षिणा सर्वयज्ञानां दातव्या भूतिमिच्छता॰ पाकयज्ञा महार्हाश्च कर्तव्याः सर्वदस्युभिरिति म्लेच्छादीनां श्राद्धविधानं तदपि
नी सजातीयभोजनद्रव्यदानादिपरं न तु श्राद्धपरमिति इति निर्णयसिंधावधिकारिनिर्णयः अथ पितरः हेमाद्रौ मात्स्ये देवलो॰
नामगोत्रं पितॄणां तु प्रापकं हव्यकव्ययोः अग्निष्वात्तादयस्तेषामाधिपत्ये व्यवस्थिताः नाममंत्रास्तदादेशा भवांतरगतानपि प्राणिनः प्री
णयंते वत् तदाहारत्वमागतान् देवो यदि पिता जातः शुभकर्मानुयोगतः तस्यान्नममृतं भूत्वा देवत्वेप्यनुगच्छति गांधर्वे भोगरूपेण प
शुत्वे च तृणं भवेत्॰ श्राद्धान्नं वायुरूपेण नागत्वेप्युपतिष्ठति पानं भवति यक्षत्वे राक्षसत्वे तथामिषं दनुजत्वे तथा मद्यं प्रेतत्वे रुधिरोदकं मनु
ष्यत्वेन्नपानादि नानाभोगकरं भवेत् अत्र पित्रादिशब्दैर्जनकादीनामेव देवतात्वमुच्यते न वस्वादीनां॰ असावेतत्त इति यजमानस्य पित्रे
इति शतपथश्रुतेः यस्य पिता प्रेतः स्यात्स पिंडं निधायेति विष्ण्वादिस्मृतेश्च॰ यत्तु मनुदेवलौ वसवः पितरो ज्ञेया रुद्रा ज्ञेयाः पितामहाः प्र
पितामहास्तथाऽऽदित्याः श्रुतिरेषा सनातनी याज्ञवल्क्यः वसुरुद्रादितिसुताः पितरः श्राद्धदेवता इति तदपि ध्यानार्थं॰
यानि तु हेमाद्रौ नंदिपुराणे विष्णुः पितास्य जगतो दिव्यो यज्ञः स एव च ब्रह्मा पितामहो ज्ञेयो ह्यहं च प्रपितामह इति यच्च भविष्ये॰ अ
अनिरुद्धः स्वयं ज्ञेयः प्रद्युम्नश्च पितामहः संकर्षणस्तु जनको वासुदेवस्तु तत्पिता स्वयं कर्तेति यच्च तत्रैव॰ प्रथमो वरुणो ज्ञेयः

निर्णे०त्०

प्राजापत्यस्तथापरः तृतीयोग्निःस्मृतैः पिंडेष्वेषपिंडविधिः स्मृतः यच्चादित्यपुराणे मासाश्चपितरो ज्ञेयाः सतवश्चपितामहाः संवत्स
राःप्रजानांच्चस्क्रमेकः प्रपितामहः यच्चनंदिपुराणे अग्निष्वात्ताब्राह्मणानां पितरःपरिकीर्तिताः राज्ञांबर्हिषदोनामविशांका
व्याःप्रकीर्तिताः स्तकालिनस्तु शूद्राणां व्यामास्त्वेछ्यात्यजातिषु इति अत्रावाहनादिषुपित्रादयः समुच्चयेनविकल्पेनवाच्यवात्वा
रंततद्देवतारूपेणवाच्याइतिहेमाद्र्यादयः हेमाद्रौब्राह्मे पार्वणंकुरुतेयस्तु केवलंपितृहेतुकं मातामहंनकुरुते पितृहासप्र
जायते धौम्यःपितरोयत्रपूज्यंतेतत्रमाहाध्रुवं अविशेषेणकर्तव्यंविशेषान्नरकंव्रजेत् अस्यापवादमाहकात्यायनः कर्षूसम
न्वितंमुक्त्वातथाद्यंश्राद्धषोडशं प्रत्याब्दिकंचशेषेषु पिंडाःस्युःषडितिस्थितिः दर्शादौसपत्नीकानामेवदेवतात्वं सूत्रेपत्नीसमंश्राद्धमाता
पुत्रकेस्वधासमं पितामहीचस्वेनैवतथैवप्रपितामहीतितत्रैवोक्तेः चंद्रिकायांचतुर्विंशतिमते क्षयाहंवर्जयित्वैकं स्त्रीणांनास्तिपृथक्
क्रिया केचिदिच्छंतिनारीणांपृथक्श्राद्धंमहर्षयः अन्वष्टकास्वष्टौगयायांचक्षयेहनि अत्रमातुःपृथक्श्राद्धमन्यत्रपतिनासह
तिकात्यायनोक्तेश्च अस्यानिर्मूलतांवदंतोगौडास्त्वज्ञाएव अत्रसागरसंध्याहारः अन्यथासपतिकायेमात्रेइतिप्रयोगापत्तेः
अत्रमातृशब्दोजनन्यामेवमुख्यः तेनसपत्नमातुर्भ्योनदद्यात् एवंपितामह्यादिशब्दैःपितृजनन्यादयएववाच्यंतेइतितत्सपत्नी
भ्योनदेयमितिहेमाद्रिः कारुण्येनतुमहालयादौदेयमितिसएव अथविश्वेदेवाः हेमाद्रौशंखबृहस्पती इष्टिश्राद्धेक्रतुर्दक्षोस
सोनांदीमुखेवसू नैमित्तिकेकामकालौ काम्येचधुरिलोचनौ पुरूरवआर्द्रवश्चपार्वणेसमुदाहृतौ तत्रैव उत्पत्तिनामचैतेषां
नविदुर्येद्विजातयः अयमुच्चारणीयस्तैःश्लोकःश्रद्धासमन्वितैः आगच्छंतुमहाभागाविश्वेदेवामहाबलाः येअत्रविहिताःश्रा

राम·

द्धेसावधानाभवंतुते इति इष्टिश्राद्धंश्राद्धंक्रतुरुचिभ्यांयुक्तमितिकल्पतरुः आधानादिकर्मांगमित्यन्ये नैमित्तिकमेकोद्दिष्टं एकोद्दि
ष्टंतुयच्छ्राद्धंतन्नैमित्तिकमुच्यते इतिविष्णूक्तेः यद्यपिएकोद्दिष्टंदेवहीनमितितत्रविश्वेदेवनिषेधस्तथापिनवश्राद्धेद्वादशमासि
केचकामकालोज्ञेयो नवश्राद्धंदशाहानिनवमिश्रंतुषड्ऋतून् अतःपरंपुराणंवैत्रिविधंश्राद्धमुच्यते यस्मिन्नेवपुराणंवाविश्वेदेवान
लेभिरे आस्तरंतद्धवेश्राद्धं दृषलंमंत्रवर्जितमितिबह्वृचपरिशिष्टात् एतच्चबह्वृचानामेवतेषामेवोक्तेः अन्येषांतुनात्रविश्वेदेवाइतिकात्या
यनोक्तेस्तन्निषेधएवेतिपृथ्वीचंद्रादयः अन्यत्तुनैमित्तिकंसपिंडीकमाहुः भविष्ये यद्यप्येकोद्दिष्टंतच्छब्देनोक्तंतथापितद्दैवंकर्तव्यमयुग्मा
न्भोजयेद्द्विजान् इतितत्रैववैश्वदेवनिषेधात् यद्यपिसपिंडीकरणं एतएकोद्दिष्टं तथापिसपिंडीकरणेश्राद्धेदैवपूर्वंनियोजयेत् इ
तिवचनात्तत्परत्वं हेमाद्र्यादित्यपुराणे विश्वेदेवौक्रतुर्दक्षः सर्वास्विष्टिषुकीर्तितौ नित्यंनांदीमुखेश्राद्धे वसुसत्यौचपैतृके नवान्न
लंभनेदेवौकामकालौसदैवहि अपिकन्यागतेसूर्ये काम्येचधुरिलोचनौ पुरूरवार्द्रवौचैवविश्वेदेवौतुपार्वणे केचिद्विश्वेदेवापवादमाह हेमा
द्रौशातातपः नित्यश्राद्धमदैवंस्यादेकोद्दिष्टंतथैवच मातृश्राद्धंचयुग्मैःस्यादैवंप्राङ्मुखैःपृथक् योजयेद्दैवपूर्वाणिश्राद्धान्यन्यानियत्नतः
नांदीश्राद्धेभिन्नप्रयोगपक्षेमातृश्राद्धमदैवमितिहेमाद्रिः अथविप्राः तेचोत्तममध्यमाधमभेदेनत्रिविधाः तत्राद्याः अत्रमदीयाःश्लोकाः
त्रिणाचिकेतस्त्रिमधुश्चबह्वृचोप्याथर्वणो याज्ञुरुषसामगोच्च षडंगवित्त्रिसुपर्णवेत्ताप्यथर्वशीर्षोध्ययनेरतश्च शतायुर्वेदार्थविदो

निर्ण० ९

प्रवक्तास्याद्ब्रह्मचारी चतथाग्निविद्ब्र सीदद्वृत्तिः सत्यवाक्पुरुषैः स्वमातापित्रोः पंचभिः ख्यातवंशः पत्नीयुक्तो ज्येष्ठसामा पुराणवक्ता पुत्रीचेतिह
सभ्रभिदः योगी भिक्षुः सामगो ब्रह्मवेत्ता पंचाग्निश्च श्रोत्रियस्तस्य सूनुर्वा शंभुध्यायी शीर्षपादौ नु सर्वे पांथश्चेते तूत्तमाः संप्रदिष्टाः भिक्षुर्यो
गी पांथ एते खलो व्या भाग्याल्लभ्याश्चेत्तदा भोजनीयाः श्राद्धविप्रेषु पविष्टेषु पश्चात्संप्राप्ताः श्राद्धे पंक्तौ तु भोज्याः अत्र मूलं हेमाद्रौ ज्ञेयं तत्रैव नारदः
यो वैश्यतीन नाद्यस भोजयेदितरान्द्विजान् विज्ञानान्नवसतो ग्रामैकव्यं तथा तिराक्षसान् दीपकालिकायां दक्षः विना मांसेन मधुना विना दक्षि
णया शिष्टा परिपूर्णे सर्वश्राद्धे यतिषु श्राद्धभोजिषु एतच्च ज्ञातिविषयं त्रिणाचिकेतत्रिसुपर्णे यजुर्वेदे कठश्रोदेशो तद्व्रतेन देते ध्यायिनो यस्य
सप्त पूर्वे सोमपाः सत्रिसुपर्ण इति बोपदेवः त्रिमधुर्ऋग्वेदैकदेशस्तदध्यायी कश्चिन्नाचिकेतवयनं त्रिः कृतवानित्यथमादुरुक्तं हेमाद्रिविरु
द्धं हेमाद्रौ गोतमः युवभ्यो दानं प्रथमं पितृवयसद्भ्य एके मात्स्यमनन्यश्च व्याकुरुते वाचं पश्च मीमांसते ध्वरं सामस्वरविधिज्ञश्च पंक्तिपावन
पावनाः कौर्मे असमानप्रवरकाः सगोत्रस्तथैव च असंबंधी च विज्ञेया ब्राह्मणाः श्राद्धसिद्धये गारुडे श्राद्धेषु विनियोज्यास्ते ब्राह्मणा ब्रह्म
वित्तमाः ये यानि गोत्रमंत्रा तवासिसंबंधवर्जिताः मनुः न मित्रं भोजयेच्छ्राद्धे धनैः कार्योस्य संग्रहः नारिं न मित्रं यं विंद्यात्तं तु श्राद्धे निमंत्रयेत्
अत्रद्वयां गोत्रे श्राद्धभोजननिषिद्धं पितृपुत्रो भ्रातरो ह्या निरग्निर्गुर्वणी पति सगोत्रप्रवरस्यैव श्राद्धेषु परिवर्जयेत् इति श्राद्धदीपकलिकायां
जातुकर्ण्योक्तेः अथ मध्यमाः हेमाद्रौ कामे गार्ग्यो नैकगोत्र द्वि विद्वांस्यथा कन्यातथा द्वैः अभावे त्वन्यगोत्राणां मैकगोत्रास्तु भो
जयेत् अत्र केचित्स्वशाखीयान्मुख्यानाहुः पठंति च निमंत्रयीत पूर्वेद्युः स्वशाखीयान्द्विजोत्तमान् स्वशाखीयद्विजाभावे द्विजानन्या

राम

न्निमंत्रयेत् इति एतत्तु निर्मूलं बाद्व हेमाद्रिणा दूषितत्वात् पेक्ष्यं अत्र मामकः श्लोकः मातामहो मातुलभागिनेयदौहित्रजामातृगुरुस्वशिष्याः सत्विक्यान्यश्च गु
रोस्वबंधुश्यालागुणाढ्यास्त्वनुकल्पिताः बंधवा मातृष्वसृपितृष्वसृमातुलपुत्रा इति बोपदेवः अत्र मूलं हेमाद्रौ ज्ञेयं सगुणस्वस्त्रीया घातिक्रमे दोषएव सप्त
पूर्वान्सपरान्पुरुषानात्मनासह अतिक्रम्य द्विजानतान्नरकं पातयेत्स्वकं संबंधिनस्तथा सर्वान्दौहित्रं विड्पतिं तथा भागिनेयं विशेषेण तथा बंधुं खगाधिपे
तिमदनरत्ने भविष्योक्तेः अपरार्के अत्रिः षड्भ्यस्तु पुरुषेभ्यो वा गश्राद्धे यास्तु गोत्रिणः षड्भ्यस्तु परतो भोज्याः श्राद्धेषु गोत्रजा अपि एतच्च ब्राह्मणालाभे
अपिशब्दात् असंसवहेमाद्रौ गोतमः शिष्यांश्चैक सगोत्रांश्च भोजयेदूर्ध्वं त्रिभ्यो गुणवतः आपस्तंबः ब्राह्मणान्भोजयेद्योनिमंत्रांते वास्य संबंधा
न्गुणहान्यां तु परेषां समुदितः सोदर्योपि भोजयितव्यः एतनांतेवासिनो व्याख्याता इति अत्र विशेषमाह त्रिः पितापितामहो भ्राता पुत्रो वाथ सपिंड
कः न परस्परमर्च्याः स्युर्न श्राद्धे सत्विजस्तथा सत्विक्पुत्रादयोप्येते सकुल्या ब्राह्मणाः स्मृताः वैश्वदेवे नियोक्तव्या यद्येते गुणवत्तराः सगोत्रान नियो
क्तश्चात्र यश्चैव विशेषतः अथ वर्ज्याः अत्र मामकाः श्लोकाः वर्ज्यान्प्रवक्ष्ये स्वपरागियैरिहीनाधिकांगान्नकितवान्कृतघ्नान् नक्षत्रशस्त्रेण वजीवमा
नान् भेषज्यवृत्ति पिवराजभृत्यान् संगीतकाययुक्त कुसीदवृत्यावेदक्रयेणापि कवित्ववृत्या देवालयेनापिच जीवमानान् स्वाध्यायदाराग्निसुतोज्झ
कानां दुर्वालखल्वाटकुनख्यधर्मि नटोऽश्वपानसवकुंडदत्तान् अगारदाही गरदः समुद्रयायी च कुंडगोलकूटकारी बालांश्च यो ध्यापयेत्
स्वपुत्रादवाप्तविद्यः स्वयकुंडगोलौ अग्रेदिधिष्वापतिरस्त्रकर्ता सोमक्रयी तैलिककैकिराक्षौ युद्धाचार्यः पक्षिणोपोषकश्च स्तेनोतो सेत्तारक्षस
रोपकश्च मेषाणांवा महिषाणां पुष्या स्त्रीयस्त्रीषु प्रवृत्तेर्यश्च जारः जीवसुध्येतुश्च दत्तानुयोगा द्रव्यप्राप्त्यै वेदमुद्वालयंतः ग्रामयाजिप्रपके
शविक्रयिस्तेनशिल्पिपितृवादकारकान् अर्थकामरतश्रुद्रयाजकश्मश्रुहीनजटिमुंडिनिषेणान् यस्य चैव गृहे हिणी रजस्वलास्वार्थपाक

नि॰ तृ॰ द्॰ रजशापदायकान् क्लीबकुष्ठिविलोहितेक्षणान् कुब्जवामनमृषाभिशापितः पुत्रहीनमथकूटसाक्षिणं प्रातिहारिकमयाज्ययाजकं
स्वाल्पदातृपरिवेत्तृयाजकस्तेनहिंस्रकमुखान्विवर्जयेत् अत्रमूलं हेमाद्रौ पृथ्वीचंद्रोदयेचज्ञेयं भारतेदानधर्मेषु श्राद्धवर्ज्यविप्राधिकारे
कितव[illegible]ब्रह्मणहायक्ष्मीपशुपालो निराकृतिः ग्रामप्रेष्योवार्द्धुषिको गायकः सर्वविक्रयी सामुद्रिकोराजभृत्यस्तैलिकः कूटकारकः पित्रा
विवदमानश्चयस्यचोपपतिर्गृहे अभिशस्तस्तथास्तेनः शिल्पैर्यश्चोपजीवति पर्वकारश्चसूचीच मित्रध्रुक्पारदारिकः अव्रतानां
मुपाध्यायः कांडपृष्ठस्तथैवच श्वभिश्चयः परिक्रामेद्यः शुनादष्टएवच परिवित्तिस्तथास्तेनो दुश्चर्मा गुरुतल्पगः कुशीलवो देवलको नक्ष
त्रैर्यश्चजीवति ईदृशाब्राह्मणाज्ञेया अपांक्तेयायुधिष्ठिर तथा सणकर्त्तोचयोराजन्यश्चवार्द्धुषिकोनरः अन्योपिहेमाद्रौ मात्स्ये त्रिशंकून्
बर्बरानंध्रान् चीनद्रविडकोंकणान् कर्णाटकांस्तथाभीरान् कलिंगांश्चविवर्जयेत् तत्रैवसौर पुराणे अंगवंगकलिंगांश्च सौराष्ट्रान् गुर्ज
रांस्तथा आभीरान्कोंकणांश्चैव द्राविडान्दक्षिणायनान् आवंत्यान्मागधांश्चैवब्राह्मणांस्तुविवर्जयेत् चंद्रिकायांयमः काणाः कुब्जा
श्चषंढाश्चकृतघ्नागुरुतल्पगाः मानकूटास्तुलाकूटाशिल्पिनो ग्रामयाजकाः राजभृत्यांधबधिरमूकखल्वाटपंगवः वणिजोमधुहर्त्ता रो
गिणोदारकदाहकाः समयानांचभेत्तारो[illegible]प्रदानेयेनिवारकाः प्रव्रज्योपनिवृत्ताश्च वृथाप्रव्रजिताश्चये यश्चप्रव्रजिताज्जातः प्रव्रज्यावसितश्चयः
अवकीर्णीचवीरघ्नो गुरुघ्नः पितृदूषकः श्राद्धकाशिकायां कात्यायनः द्विर्नग्नः कीलदुश्चर्माशुक्लोतिकपिलः स्तथा छिन्नोष्ठश्छिन्नलिंगश्चनैव
केतनमर्हति द्विर्नग्नः पित्रोर्वंशे त्रिपुरुषविच्छिन्नवेदाग्निः हेमाद्रौमरीचिः अविद्धकर्णः [illegible]श्चलंबकर्णस्तथैवच वर्जनीयाः प्रयत्नेनब्राह्मणाः

श्राद्धकर्मणि ब्राह्मे मर्कटीपूतिनासश्चछिन्नांगुश्चाधिकांगुलिः गलरोगीगडुमान् स्फुटितांगश्चसज्वरः षंढतृपरमंदांश्च श्राद्धेष्वेतान्विवर्जयेत्
लंबकर्णस्याह तत्रैवगोभिलः हनुमूलादधः कर्णौ लंबौतुपरिकीर्त्तितौ द्व्यंगुलोत्र्यंगुलौ शस्तावितिशातातपोब्रवीत् चंद्रिकायांयमः द्व्यं
गुलातीतकर्णस्य भुंजतेपितरोनतु षंढश्चात्र चंद्रिकोक्तः सप्तविधोग्राह्यः यथा षंढकोवातजः षंढः पंडःक्लीबोनपुंसकः कीलकश्चेतिसप्तै
वक्लीबभेदाः प्रकीर्त्तिताः पराशरमाधवीयेतुचतुर्दशविधउक्तः तेषांस्वरूपाणितत्रैवज्ञेयानि चंद्रिकायांशातातपः अग्निष्टोमादिभिर्यज्ञै
र्येयजंत्यल्पदक्षिणैः तेषामन्नं न भोक्तव्यमपांक्तास्तेप्रकीर्त्तिताः एतच्चशक्तौसत्यां अपरार्के भारते अव्रतीकितवस्तेनः प्राणिविक्रयको
पिवा पश्चाद्वैसीतवान्सोमं सोपिकेतनमर्हति श्राद्धदीपकलिकायांयमः अपत्नीकश्चवर्ज्यःस्यात् अपत्नीकोप्यनग्निकः तत्रैवाश्व
लायनः प्रतिमाविक्रयंयोवैकरोतिपतितस्तुसः जीवनार्थं परात्स्त्रीनिधन[illegible]तीर्थश्याति[illegible] मातृपित्रोर्विनासोपि पतितः परिकी
र्त्तितः तत्रैवजातूकर्ण्यः यत्रमातुलजोद्वाहो यत्र[illegible]पातिः श्राद्धं नगच्छेत्तद्विप्राः कृतं यच्चनिरामिषं पितृपुत्रेभ्रातरोद्वौ निरग्निर्गुर्विणी
पतिः सगोत्रप्रवरंचैवश्राद्धेषुपरिवर्जयेत् वृद्धनारदीये शंखचक्रेमृदायस्तु कुर्यात्तप्तायसेनवा सशूद्रवद्बहिःकार्यः सर्वस्माद्द्विजक
र्मणः शंखचक्राद्यंकनंच गीतनृत्यादिकंतथा एकजातेरयंधर्मो नजातुस्याद्द्विजन्मनः तेनयत्तप्तमुद्रादि विधयस्तेशूद्रविषया इतिपृथ्वीचं
द्रोदयः शिवकेशवयोरंकान् शूलचक्रादिकान् द्विजः नधारयेत्मतिमान्वैदिकेवर्त्मनिस्थितः आश्वलायनोक्तेश्च [illegible]चोदराघर्ष्यं निषि
द्धमितिश्रीधरस्वामी अन्येपिनिषिद्धानिबंधेषुज्ञेया इतिदिक् अत्रनिप्राणंग्राह्यलात्यैव तद्धर्ज्यानांनिषेधसिद्धेः पुनर्वर्ज्यपरि

निर्णय. तृ.

गणनं निषिद्धवर्जं निर्गुणप्राप्त्यर्थमिति विज्ञानेश्वरः कुष्ठिकाणादेरपवादो हेमाद्रौ वसिष्ठः अपि चेन्मंत्रविद्युक्तः शारीरैः पंक्तिदूषणैः अ
दूष्यं तं यमः प्राह पंक्तिपावन एव सः कश्चिद्विप्राणां जातिमात्रेण यग्घ्युतमुक्तं चंद्रिकायामाग्नेये यदि पुत्रो गयां गच्छेत् कदाचित्कालपर्ययात् ता
नेव भोजयेद्विप्रान्ब्राह्मणा ये प्रकल्पिताः ब्रह्मणा कृतसंस्थाना विप्रा ब्रह्मसमाः स्मृताः अमानुषगयाविप्रा ब्रह्मणा ये प्रकल्पिताः तेषु तुष्टे
षु संतुष्टाः पितृभिः सह देवताः तत्रैव। न विचार्यं कुलं शीलं विद्या च तप एव च पूजितैस्तैस्तु संतुष्टा देवाः सपितृगुह्यकाः गयायां निर्गुणा
अपि त एव भोज्या इति हेमाद्रिः अक्षयवटश्राद्ध एव तन्नियमो नान्यत्रेति त्रिस्थलीसेतौ पितामहचरणाः पृथ्वीचंद्रोदयेपि पाद्मे तीर्थेषु
ब्राह्मणं नैव परीक्षेत कदाचन अन्नार्थिनमनुप्राप्तं भोज्यं तं मनुरब्रवीत् स्कांदेपि ब्राह्मणान्न परीक्षेत तीर्थे क्षेत्रनिवासिनः मनुः न ब्राह्मणं परी
क्षेत दैवे कर्मणि धर्मवित् पित्र्ये कर्मणि तु प्राप्ते परीक्षेत प्रयत्नतः असंभवपरमेतदिति मेधातिथिः हेमाद्रौ व्यासः गायत्रीसारमात्रो
पि वरं विप्रः सुयंत्रितः नायंत्रितश्चतुर्वेदी सर्वाशी सर्वविक्रयी काणाः कूटाश्च कुब्जाश्च दरिद्रा व्याधितास्तथा सर्वे श्राद्धे नियोक्तव्या मि
श्रिता वेदपारगैः अथ विप्रनिमंत्रणं चंद्रिकायां वाराहे वस्त्रशौचादि कर्तव्यं श्वः कर्तास्मीति जानता स्नानोपलेपनं कृत्वा ततो विप्रा
न्निमंत्रयेत् दंतकाष्ठं च विसृजेद्ब्रह्मचारी शुचिर्भवेत् तत्रैव प्रचेताः दक्षिणं चरणं विप्रः सव्यं वै क्षत्रियस्तथा पादावादाय वैश्ये ये द्वौ शूद्रः राम
प्रणतिपूर्वकं बृहस्पतिः उपवीती ततो भूत्वा देवार्थं तु द्विजोत्तमान् अपसव्येन पित्र्यर्थं स्वयं शिष्योऽथवा स्कृतः प्रचेताः सवर्णं प्रेषये
दाप्तं द्विजानां तु निमंत्रणे पृथ्वीचंद्रोदये स्कांदे राजकार्ये नियुक्तस्य बंधनिग्रहवर्तिनः व्यसनेषु च सर्वेषु श्राद्धं विप्रेण कारयेत्

चंद्रिकायां यमः अभोज्यं ब्राह्मणस्यान्नं वृषलेन निमंत्रितं तथैव वृषलस्यान्नं ब्राह्मणेन निमंत्रितं तत्रैव पैठीनसिः सप्त पंच द्वौ वा श्रोत्रियान्नि
मंत्रयेत् आश्वलायनसूत्रे एकैकमेकैकस्य द्वौ द्वौ त्रींस्त्रीन्वा वृद्धौ फलभूयस्त्वं द्वाविति वृद्धश्राद्धे गौतमः नवावरान्भोजयेदयुजो वा
यथोत्साहं याज्ञवल्क्यः द्वौ दैवे प्राक्त्रयः पित्र्ये उदगेकैकमेव वा मातामहानामप्येवं तंत्रं वा वैश्वदेविकं दीपकलिकायां पराशरः संपत्तावर्घ्यपात्राणामेकै
कस्य त्रयस्त्रयः पित्रादौ ब्राह्मणाः प्रोक्ताश्चत्वारो वैश्वदेविके वृद्धयाज्ञवल्क्यः दशैकं पंच वा विप्रान् पार्वणे विनियोजयेत् अथ वैश्वदेवे द्वौ चतुरो वा पवे
श्य पित्रादीनामेकैकस्य स्थाने एकं त्रीन्पंच सप्त नव वोपवेशयेदिति निष्कृष्टोऽर्थः मनुः द्वौ दैवे पितृकृत्ये त्रीनेकैकमुभयत्र वा भोजयेत्सुसमृद्धोपि न प्रस
ज्जेत विस्तरे सत्क्रियां देशकालौ च शौचं ब्राह्मणसंपदं पंचैतान्विस्तरो हंति तस्मान्नेहेत विस्तरं पृथ्वीचंद्रोदये शातातपः द्वौ दैवेऽथर्वणौ विप्रौ प्राङ्
मुखावुपवेशयेत् पित्र्ये तूदङ्मुखांस्त्रींश्च बह्वृचाध्वर्युसामगान् अत्यशक्तौ हेमाद्रौ देवलः एकेनापि हि विप्रेण षट्पिंडं श्राद्धमाचरेत् षड
र्घ्यान्दापयेत्तत्र षड्भ्यो दद्यात्तथा हविः गोभिलः यद्येकं भोजयेच्छ्राद्धे छंदोगं तत्र भोजयेत् ऋचो यजूंषि सामानि त्रितयं तत्र विद्यते अत्र वैश्वदेववि
शेषमाह तत्रैव वसिष्ठः यद्येकं भोजयेच्छ्राद्धे दैवं तत्र कथं भवेत् अन्नं पात्रे समुद्धृत्य सर्वस्य प्रकृतस्य च देवतायतने कृत्वा ततः श्राद्धं समाचरेत्
प्रास्येदग्नौ तदन्नं तु दद्याद्वा ब्रह्मचारिणे एतच्च सपिंडीकरणवर्जं ज्ञेयं न त्वेवैकं सर्वेषां काममनाद्ये इत्याश्वलायनोक्तेः अस्यार्थ उक्तो नाराय
णवृत्तौ आद्यं सपिंडीकरणं तद्वर्जेषु सर्वश्राद्धेषु कामं त्रयाणामेकं भोजयेत् सपिंडीकरणे तु नियतं त्रिभिर्भवितव्यमिति अनाद्यं पार्वणव
र्जितं वा अन्नाद्येन आमहेमश्राद्धं चान्नाभावे चेति व्याख्यांतरं तत्रैव ज्ञेयं कारिकापि दैवे पित्र्ये च नैकैकः सपिंडीकरणं विनेति अथैकविप्रे

साग्नेर्विशेषमाह पृथ्वीचंद्रोदये प्रचेताः एकस्मिन्ब्राह्मणे दैवे साग्नेरग्निर्भवेत्सदा अनग्नेः कुशमुष्टिः स्याच्छ्राद्धकर्मणि सर्वतः सर्वथावि
प्रालाभे तत्रैव हेमाद्रौ च सत्यव्रतः निधाय दर्भान्विधिवदासनेषु समाहितः प्रैषानुप्रैषसंयुक्तं सर्वं श्राद्धं प्रकल्पयेत् अत्रानंत्यसाभावात्तत्रे
इवसत्विकार्ये यजमानविधौ न दक्षिणेति केचित् तन्न अदृष्टार्थायाः प्राप्तेः सर्वं तन्निजटलुप्यं यच्छ्राद्धमदक्षिणमिति पाद्मात्
विदध्याद्धोत्रमन्यश्चेद्दक्षिणार्धहरो भवेत् स्वयं चेदुभयं कुर्यादन्यस्मै प्रतिपादयेत् इति छंदोगपरिशिष्टाच्च एवं यतिश्राद्धेपि कात्याय
नः यद्वत्रस्तु निमुष्टोच तंबद्दर्भबटोत्तथा दर्भसंख्या न विहिता विष्टरास्तरणेषु च मातृश्राद्धे तु विप्रालाभे स्ववासिन्योपि भोजनीया इ
साह आशार्के वृद्धवसिष्ठः मातृश्राद्धे तु विप्राणामलाभे पूजयेदपि पतिपुत्रान्विताभव्या योषितोष्टौ कुलोद्भवा इति अष्टाविति वृद्धि
श्राद्धविषयं पाद्मे उत्तरखंडे सकृदभ्यर्चितं लिंगं शालिग्रामशिलोच्चयः पीठे संस्थापयित्वा तु श्राद्धं च कुरुते नरः पितरस्तस्य तिष्ठंति कल्प
कोटिशतं दिवि चंद्रिकायां मात्स्ये पठन्निमंत्र्य नियमान्श्रावयेत्पैतृकान्बुधः अक्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः भ
वितव्यं भवद्भिश्च मया च श्राद्धकारिणा यत्तु यमः सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः भवितव्यं भवद्भिर्नः श्वोभूते श्राद्धक
र्मणि इति पूर्वेद्युर्निमंत्रणपरं न तदह्न तत्रैव देवलः असंभवे परेद्युर्वा ब्राह्मणांस्तान्निमंत्रयेत् अज्ञातान्न समानार्षान्न युग्मान्नात्म
शक्तितः कात्यायनः अनिर्घेनामंत्रितो नापक्रमेत् केतनं ग्रहशाक्तः अथ श्राद्धकर्तृभोक्तृनियमाः तत्र निमंत्रितविप्रत्यागेऽपरार्के
यमः केतनं कारयित्वा तु यो तिपातयति द्विजः ब्रह्महत्यामवाप्नोति शूद्रयोनौ च जायते आमंत्र्य ब्राह्मणं यस्तु यथान्यायं न पूजयेत् एम.

अतिथि [illegible] सचौराः स तिर्यग्योनिषु जायते प्रमादस्त्यागे तु हारीतः प्रमादादिस्मृतं ज्ञात्वा प्रसाद्यैनं प्रयत्नतः तर्पयित्वा यथान्यायं सर्वं तत्फ
लमश्नुते प्रमादाभावे तु नारायणः एतस्मिन्नेव विप्रोक्ते ब्राह्मणान्नियतः शुचिः यतिचांद्रायणं कृत्वा तस्मात्पापात्प्रमुच्यते यमः आमंत्रितस्तु
यो विप्रो भोक्तुमन्यत्र गच्छति नरकाणां (नसि) शतं गत्वा चंडालेष्वभिजायते तत्रैव देवलः पूर्वं निमंत्रितोन्येन कुर्यादन्यप्रतिग्रहं भुक्त्वा हारो
पवा भुंक्ते सुकृतं तस्य नश्यति यदि विप्रो विलंबेत तदोक्तं मादित्यपुराणे आमंत्रितश्चिरं नैव कुर्याद्विप्रः कदाचन देवतानां पितॄणां च दातुरन्न
स्य चैव हि चिरकारी भवेद्द्रोही पच्यते नरकाग्निना पृथ्वीचंद्रोदये यमः निमंत्रितस्तु यो विप्रो ह्यध्वानं याति दुर्मतिः भवंति पितरस्तस्य तं मासं
पांसुभोजनाः निमंत्रितस्तु यः श्राद्धे प्रकुर्यात्कलहं द्विजः भवंति पितरस्तस्य तं मासं मलभोजनाः आमंत्रितस्तु यो विप्रो भारमुद्वहते द्विजः पि
तरस्तस्य तं मासं भवंति स्वेदभोजनाः आमंत्रि० हिंसां वै कुरुते द्विजः तं मासं पितरस्तस्य भवंति रुधिराशनाः शंखः निमंत्रितस्तु यः श्राद्धे
मैथुनं सेवते द्विजः श्राद्धं दत्त्वा च भुक्त्वा च युक्तः स्यान्महतैनसा मैथुनं च ऋतावपि निषिद्धं ऋतुकाले नियुक्तो वा नैव गच्छेत्स्त्रियं क्वचित् त
द्गच्छन्नवाप्नोति ह्यनिष्टानि फलानि चेति तत्रैव माधवीये च वृद्धमनूक्तेः श्राद्धं करिष्यन्कृत्वा वा भुक्त्वा वापि निमंत्रितः उपोष्य च तथा
भुक्त्वा नोपयाच्च ऋतावपि भोक्ष्यन्करिष्यन् श्वः श्राद्धं पूर्वरात्रौ प्रयत्नतः व्यवायं भोजनं चापि ऋतावपि विवर्जयेत् इति तत्रैवाश्वलायनो
क्तेश्च विज्ञानेश्वरेणात्तु श्राद्धे सततो गच्छतोपि न दोष इत्युक्तं तत्त्वगतिकत्वेज्ञेयं बृहस्पतिः द्विनिशं ब्रह्मचारी स्याच्छ्राद्धकृद्ब्राह्मणैः सह अन्यथा
वर्तमानौ तु स्यातां निरयगामिनौ पुनर्भोजनमध्वानं भारमायासमैथुनं श्राद्धकृच्छ्राद्धभुक्चैव सर्वमेतद्विवर्जयेत् स्वाध्यायं कलहं चैव दिवा

स्वप्नंतथैवच॰ यत्तु श्राद्धकाशिकायां पुराणसमुच्चये कृत्वातु रुधिरस्रावंन्नविद्वान्श्राद्धमाचरेत् एकंद्वौत्रीणिवाविद्वान्दिनानिपरिवर्जयेत् इति॰ त
न्निर्मूलं पृथ्वीचंद्रोदये यमः पुनर्भोजनमध्वानं भाराध्ययनमैथुनं संध्यां प्रतिग्रहं होमं श्राद्धभोक्ताष्टवर्जयेत् संध्यानिषेधः प्रायश्चित्तासवे
न्दुयत्र यथाहोशनाः दशकृत्वः पिबेदापो गायत्र्याश्राद्धभुग्द्विजः ततः संध्यामुपासीत जपंचजुहुयादपि गोडास्तु सायंसंध्यापरान्नेचछंदेन
चवनस्पतेः अमावास्यांनकुर्वीत रात्रिभोजनमेवच घृतंचकलहंचैव सायंसंध्यांदिवाशयं श्राद्धकर्त्ताचभोक्ता पुनर्भुक्तिंचवर्जयेदिति कामधे
नौवराहाद्युक्तेः कर्त्तुरपिसायंसंध्यानिषेधमाहुः शिष्टास्तुनिर्मूलत्वमाहुः होमनिषेधस्त्वस्वविषयः सूतकेचप्रवासेच अशक्तौ श्राद्धभोज
ने॰ एवमादिनिमित्तेषु हावयेन्नतुहापयेत् इतिछंदोगपरिशिष्टात्॰ तत्रैवादित्यपुराणे निमंत्रितस्तुनश्राद्धं कुर्याद्धार्यं ददिताउनं चंद्रिकायांप्रचेताः
श्राद्धभुक्प्रातरुत्थाय प्रकुर्याद्दंतधावनं श्राद्धकर्त्ता नकुर्वीत दंतानांधावनंबुधः हेमाद्रौ जाबालः दंतधावनतांबूलं तैलाभ्यंगमभोजनं र
त्यौषधिपरान्नंचश्राद्धकृत्सप्तवर्जयेत्॰ विष्णुरहस्ये श्राद्धोपवासदिवसे खादित्वादंतधावनं गायत्र्याशतसंपूतमंबुप्राश्यविशुध्यति पुन
र्भोजनमध्वानंयानमायासमैथुनं दानंप्रतिग्रहोहोमंश्राद्धभुक्त्वष्टवर्जयेत् सोमोंसपत्नौ वनस्पतिगतेसोमे यस्तुहिंस्याद्वनस्पतिं घोरा
यांस॰ ब्रह्महत्यायां युज्यतेनात्रसंशयः एतद्धिंहिंते धमादिव्यतिरेकेण वनस्प॰ नतुहोयस्तुवाहयेत् नाश्नंतिपितरस्तस्यदशवर्षाणिपंचच
वनस्प॰ संधानंयस्तुकारयेत्॰ गावस्तस्यप्रणश्यंति चिरकालमुपस्थिता॰ वनस्पतिगतिंस्वरूपमाह पृथ्वीचंद्रोदये व्यासः त्रिमुहूर्त्तंवसे शिवः
दर्के त्रिमुहूर्त्तंजलेवसेत् त्रिमुहूर्त्तंवसेद्गो[illegible] त्रिमुहूर्त्तंवनस्पतौ कलिकार्यांवृद्धमनुः निमंत्र्यविप्रांस्तद्दहर्वर्जयेन्मैथुनंक्षुरं॰ प्रम

त्तंचस्वाध्यायंक्रोधाशौचेतथान्हतं केचि[illegible]मंत्रणात्सर्वंशुध्यर्थंपूर्वेद्युःक्षौरंकुर्वंति तत्रमूलंमृग्यं मरीचिः षष्ठ्यांपर्वसुपक्षादौ रिक्ता
स्वप्रतिपिष्वपि पातेश्राद्धव्रतेहचक्षौरंवर्ज्य[illegible]सुच यदाकर्त्तुरशक्त्या तत्पुत्रशिष्यादिःश्राद्धंकरोतितदाकर्त्राप्रतिनिधिनाचप्रागुक्तनिय
माः कार्याः नशक्नोतिस्वयंकर्त्तुं यदाह्यनवकाशतः श्राद्धं शिष्येणपुत्रेण तदान्येनापिकारयेत्॰ नियमानाचरेत्सोपिनियतोश्रवसंधरे य
जमानोपितान्सर्वानाचरेत्सुसमाहितः इतिहेमाद्रौ वाराहोक्तेः स्त्रियास्तुपार्श्वे मुक्तकच्छातुया नारीमुक्तकेशीतथैवच हसतेवदतेचैव
निराशाःपितरोगताः आश्वलायनः श्राद्धंहितंजयेद्दास्तेनबालानपियलतः श्राकं पिंडदानादूर्ध्वं धार्येनालंकुर्यात्स्वविग्रहं वास्तोगृहे॰ अ
पश्राद्धवस्तूनि॰ तत्रादौकुशाः पृथ्वीचंद्रोदयेदत्तः समित्पुष्पकुशादीनां द्वितीयःपरिकीर्तितः अष्टधाभक्तेदिने द्वितीयाभागइत्यर्थः तत्रैवयमः
समूलस्तुभवेद्दर्भः पितॄणांश्राद्धकर्मणि मूलेनलोकान्जयतिशक्रस्यसुमहात्मनः व्यासः तर्पणादीनिकार्याणि पितॄणांयानिकानिचित् ता
निस्युर्द्विगुणैर्दर्भैः सप्तपत्रैर्विशेषतः शालंकायनः सपिंडीकरणंयावदृजुदर्भैःपितृक्रिया सपिंडीकरणादूर्ध्वंद्विगुणैर्विधिवद्भवेत् शंखः अ
नंतगर्भिणंसाग्रंकौशंद्विदलमेवच प्रादेशमात्रंविज्ञेयंपवित्रंयत्रकुत्रचित् हारीतः पवित्रंब्राह्मणस्यैवचतुर्भिर्दर्भपिंजुलैः एकैकन्यूनमुद्दि
ष्टंवर्णेवर्णेयथाक्रमं स्मृत्यर्थसारे सर्वेषांवातद्द्वाभ्यांपवित्रंग्रंथितंनवं रत्नावल्यां द्वयोस्तुपर्वणोर्मध्येपवित्रंधारयेद्बुधः हेमाद्रौ स्कांदे
अनामिकाधृतादर्भाह्येकानामिकयापिवा द्वाभ्यामनामिकाभ्यांतुधार्येदर्भपवित्रके पवित्रमाबंतत्रैवस्तु मनुः समूलाग्रौविगर्भौतु
कुशौद्वौदक्षिणेकरे सव्येचैवतथात्रीन्वैबिभृयात्सर्वकर्मसु बौधायनः हस्तयोरुभयोर्द्वौद्वौ वासनेपितथैवच दर्भग्रहणेमंत्रमाहशंखः
विरिंचिनासहोत्पन्नपरमेष्ठिनिसर्गज नुदपापानिसर्वाणि दर्भस्वस्तिकरोभव स्मृत्यर्थसारे कुपटुकारणमंत्रेण सकृच्छित्वासमुद्धरे

भरद्वाजः प्रेतक्रियार्थपित्र्यर्थमभिचारार्थमेव च दक्षिणाभिमुखः कुर्यात्प्राचीनावीतिको द्विजः कुशाभावेऽपरार्के सुमंतुः कुशाः काशाः
शरा गुंद्रो यवा दूर्वाथ बिल्वजाः गोकेशमुंजकुंदाश्च पूर्वाभावे परः परः काशादि विशेषमाह स एव काशहस्तस्तु नाचामेत्कदाचिद्विधिशं
कया प्रायश्चित्तेन युज्येत दूर्वाहस्तस्तथैव च पृथ्वीचंद्रोदये यमः मासि मास्युद्धृता दर्भा मासि मास्येव चोदिताः षड्त्रिंशन्मते मासेन स्यादमा
वास्या दर्भो ग्राह्यो नवः स्मृतः गृह्यपरिशिष्टे येच पिंडाश्रिता दर्भा यैः कृतं पितृतर्पणं अमेध्याशुचिलिप्ता ये तेषां त्यागो विधीयते लघुहारीतः
पथि दर्भाश्चितौ दर्भा ये दर्भा यज्ञभूमिषु स्तरणासनपिंडेषु षट्कुशान्परिवर्जयेत् ब्रह्मयज्ञे च ये दर्भा ये दर्भाः पितृतर्पणे हता मूत्रपुरीषा
भ्यां तेषां त्यागो विधीयते हेमाद्रौ अन्यान्यपि पवित्राणि कुशदूर्वात्मकानि च हेमात्मकपवित्रस्याप्येकां नार्हंति वै कलां अथ हविः हेमाद्रौ प्रचे
ताः कृष्णमाषास्तिलाश्चैव श्रेष्ठाः स्युर्यवशालयः महायवा व्रीहियवास्तथैव च मधूलिकाः कृष्णाः श्वेताश्च लोहाश्च ग्राह्याः स्युः श्राद्धकर्मणि
मधूलिका यावनाला इति हेमाद्रिः कल्पतरुश्च भारते वर्धमानतिलं श्राद्धमक्षय्यं मनुरब्रवीत् सर्वकामैः स यजते यस्तिलैर्यजते पितॄन् चंद्रि
कायां देवलः दृष्टपूर्तेर्मृतोद्दिष्टे दर्शे च ष्वष्टकासु च पात्रेष्वस्त्वेषु कालेषु देयं नैव कुभोजनं सायणीये अगोधूमं च यच्छ्राद्धं माषमुद्गविवर्जितं
तैलपक्वेन रहितं कृतमप्यकृतं भवेत् हेमाद्रावत्रिः अगोधूमं च यच्छ्राद्धं कृतमप्यकृतं भवेत् तत्रैव ब्राह्मे यवैर्व्रीहितिलैर्माषैर्गोधूमैश्चणकैस्त
था संतर्पयेत्पितॄन्मुद्गैः श्यामाकैः सर्षपद्रवैः नीवारैर्हस्तिश्यामाकैः प्रियंगुभिरथार्चयेत् हेमाद्रौ कार्ष्णाजिनिः यदिष्टं जीवतश्चासीत्तद्द
द्यात्तस्य भक्तितः सत्कृतो दुर्लभं मार्गं ततो [illegible]ति न संशयः कालिकायामाश्वलायनः कदल्यादिफलैः शस्तैर्मूलैरार्द्रादिकैरपि गोरसैर्म शिवः
धुनाज्येन श्राद्धे संतर्पयेत्पितॄन् कदल्या[illegible]फलादीनि श्राद्धे संपादयेत्सुधीः हेमाद्रौ पृथ्वीचंद्रोदये च मार्कंडेयः गोधूमैरिक्षुभिर्मुद्गैः

सतीनैश्चणकैरपि श्राद्धेषु दत्तैः प्रीयंते मासमेकं पितामहाः विदार्या च भरुंडैश्च तिलैः शृंगाटकैस्तथा कंचुकैश्च तथा कंदैः कर्कंधुबदरैरपि
पालेवतैरारुकैश्चाप्यक्षोटैः पनसैस्तथा काकोल्या क्षीरकाकोल्या तथा पिंडालकैः शुभैः लाजाभिश्च सधानाभिस्त्रपुसैर्वारुचिर्भटैः
सर्षपा राजशाकाभ्यामिंगुदै राजजंबुभिः प्रियालामलकैर्मुख्यैः फल्गुभिश्च तिलंटकैः वेत्रांकुरैस्तालकंदैश्चक्रिकाक्षीरिकावचैः लो
चैः समोचैर्लकुचैस्तथा च बीजपूरकैः मुंजातकैः पद्मफलैर्भक्ष्यभोज्यैश्च संस्कृतैः रागखाडवचोष्यैश्च त्रिजातकसमन्वितैः दत्तैस्तु
मासं प्रीयंते श्राद्धेषु पितरो नृणां एषां कोशहेमाद्र्यादिव्याख्या वैद्यकाद्यनुसारेण मध्यदेशभाषया नामान्युच्यंते सतीनैः कलायैः कला
यस्तु सतीनक इत्यमरः बटुरी इति प्रसिद्धः विदार्यानत्कंदेन भरुंडं जलजं मखाणा इति श्राद्धमंजर्यां भक्कुंभाड इत्यन्ये शृंगाटकं सिंगाडा
कंचुकः कचनारः कंदः सूरणः अर्शोघ्नः सूरणः कंद इत्यमरः कर्कंधुर्वन्यबदरं पालेवतं कौशातकी आरुकं मरुई अक्षोटं खरवोटी का
कोली क्षीरकाकोल्यौ गौडेषु प्रसिद्धे पिंडालकं स्कंधयनी त्रपुसादयस्त्रयः कर्कटीभेदाः सर्षपेति दीर्घछंदसः प्रियालं चिरौंजीफलं
उदुंबरं तिलंटकं पले तालकंदः कंदविशेषः चक्रिका तिंतिणी विंबी वा क्षीरिका खिरिणी मोचं कदलीफलं लकुचं बडहरं मुंजातं गौडदेशे प
द्मफलं गट्टा रागखाडवः पानविशेषः त्रिजातं लवंगैलापत्रकाणि मदनरत्ने कौर्मे कालशाकं च वारुकं मूलकं कृष्णनालिका प्रशस्ता
नीतिशेषः हेमाद्रौ पृथ्वीचंद्रोदये च वायुपुराणे कालशाकं महाशाकं द्रोणशाकं तथार्द्रकं बिल्वामलकमृद्वीकापनसाम्रातदाडिमं चव्यं पा
लिवताक्षोटखर्जूरं च कसेरुकं कोविदारश्च कंदश्च पटोलं बृहतीफलं पिप्पली मरिचं चैव एला शुंठीच सैंधवं शर्करा गुडकर्पूरं बदरी द्रो
णपुत्रकं तथा मधुकं रामठं चैव कर्पूरं गुडमेव च श्राद्धकर्मणि शस्तानि सैंधवं त्रपुसं तथा रामठं हिंगुः कसेरुः कोविदार

श्चतालकंदस्तथा बिसं तमालं शतकंदश्च तथा वैशीतकंदकं कालेयं कालशाकं च सुनिषण्णं सुवर्चलं मांसं शाकं दधिक्षीरं वा बुवेरं कु
रस्तथा कटूफलं कोंकणीद्राक्षालकुचं मोचमेव च अलाबु ग्रीवकं चारं कर्कंधु मधुसाह्वयं वैकंकतं नारिकेलं शृंगाटकपरूषकं पिप्पलीमरि
चं चैव पडोलं बृहतीफलं एवमादीनि चान्यानि स्वादूनि मधुराणि च नागरं चात्र वै कृष्णदेयं दीर्घ मूलकमेव चेति द्रोणशाकं गूंमइति प्रसि
द्धं मृद्धिका द्राक्षा आम्रातमा बाडइति प्रसिद्धो वृक्षः पालिवतं जंबीरं कसेरु जलेजः कंदः कोविदारः कंचनासदृशः तालकंदः तालमूली बि
संभसीडं शतकंदः शतावरी शीतकंदः शालूकं सेरुकीति प्रसिद्धं कालेय करालसंज्ञः शाकः दारुहरिद्रा वेति पृथ्वीचंद्रः सुनिषण्णं कर्कटी
सदृशं सुवर्चलं शाकविशेषः कटूफलं श्रीपर्णी वृक्षफलं कोंकणी आम्लरसा द्राक्षा तिंदुकं डिंडिसमिति देशे देवः तिंदुफलं वा ग्री
वकं फलविशेषः वारं क्षुद्रतालफलं मधुसाह्वयं मधूकपुष्पं फलं वा परूषपरुसमिति प्रसिद्धं नागरं शुंठी पृथ्वीचंद्रोदये ब्राह्मे नागरं कं
खर्जूरं द्राक्षा नीलकपित्थकं एतानि फलजातानि श्राद्धे देयानि यत्नतः याज्ञवल्क्यः हविष्यान्नेन वै मासं पायसेन तु वत्सरं मात्स्यहारि
णकौरभ्रशाकुनच्छागपार्षतैः ऐणरौरववाराहशाशैर्मांसैर्यथाक्रमं मासवृध्याभितृप्यंति दत्तैरिह पितामहाः खड्गामिषं महाशल्कं
मधु मुन्यन्नमेव च लोहामिषं कालशाकं मांसं वाध्रीणसस्य च श्राद्धे दत्तस्य मांसस्याभक्षणे दोषमाह मनुः नियुक्तस्तु यथान्यायं यो
मांसं नात्ति मानवः स प्रेत्य पशुतां याति संभवानेकविंशति अत्र बहुवचनेषु श्राद्धे मांसमधुनोः प्राशस्त्योक्तेः विना मांसेन यच्छ्राद्धं
कृतमप्यकृतं भवेदिति हेमाद्रौ देवलोक्तेः श्राद्धं मधुना हीनं द्रसैः सकलैरपि मिष्टान्नैरपि संयुक्तं पितॄणां नैव तृप्तये अणुमात्रमपि
श्राद्धे यदि न स्यान्माक्षिकं नाम पिकीर्तनीयं स्यात् पितॄणां प्रीतये तत्र दत्तिहेमाद्रौ ब्राह्मोक्तेश्च मांसमधुनोः श्राद्धे नियतत्वं गम्य

शिवः

तेगौडनिबंधे गास्यमक्रे मधुवलभेगुडोदयः क्षीरं [illegible] तथादधि न लभ्यते घृतं यत्र कुर्याद् घृतवतीं जपं श्राद्धकलिकायां नागरखंडे कथं वेद्यादिविप्रेभ्यो न दत्तं
भोजनं मधु पिंडास्तु नैव दातव्याः कदाचिन्मधुना विना बृहस्पराशरस्तु मांसं निषेधति यस्तु प्राणिवधं कृत्वा मांसेस्तर्पयते पितॄन् स विद्वांश्चंदनं दग्ध्वा कु
र्यादंगारविक्रयं क्षिप्त्वा कूपे यथा किंचित् बालआदातु मिच्छति पतत्यज्ञानतः सोपि मांसेन श्राद्धकृत्तथा सएव सर्वथालं यदानस्यात्तदेवामिषमाश्रयेत्
ब्राह्मणश्च स्वयं नाद्यात्तच्च श्वादिहृतं यदि भागवतेपि न दद्यादामिषं श्राद्धे न चाद्याद्धर्मतत्त्ववित् मुन्यन्नैः स्यात्परा प्रीतिर्यथा न खलु हिंसया तथा विशेषः
अत्र केचित् मुन्यन्नं ब्राह्मणस्योक्तं मांसं क्षत्रियवैश्ययोः मधुप्रधानं शूद्रस्य सर्वेषां चाविरोधि यत् इति हेमाद्रौ पुलस्त्योक्त्या व्यवस्थामाहुः पृ
थ्वीचंद्रोदयस्तु अक्षतागोपशुश्चैव श्राद्धे मांसं तथा मधु देवराच्च सुतोत्पत्तिः कलौ पंच विवर्जयेत् इति निगमोक्तेः वरातिथिपितृभ्यश्च पशूपाकरण
क्रियेति कलिवर्ज्येषु हेमाद्रौवादिपुराणात् मांसदानं तथा श्राद्धे वामप्रस्थाश्रमस्तमस्तथैव तु इमान्धर्मान्कलियुगे वर्ज्यानाहुर्मनीषिणः इति
बृहन्नारदीयेभिधानाच्च मांसविधिः कलिव्यतिरिक्तविषयः कलौ मांसनिषेधानां च देशाचारात् व्यवस्था तथा च बृहन्नारदीये श्राद्धप्रकरणे य
थाचारं प्रदेयं तु मधुमांसादिकं तथा देशाचाराः परिग्राह्यास्तत्तद्देशीयजैर्नरैः अन्यथा पतितो ज्ञेयः सर्वधर्मबहिष्कृत इति यस्मिन्देशे पुरे ग्रामे त्रैवि
द्येनगरेपि वा यो यत्र विहितो धर्मस्तं धर्मं न विचारयेदिति भृगूक्तेश्चेत्याहुः तन्न होलाकाधिकरणन्यायेन देशविशेषव्यवस्थापकपदकल्पना
योगात् निरूपितं चैतत्सितामहत्वरणो मैथीमासायामितिदिक् मनुः संवत्सरं तु गव्येन पयसा पायसेन च वाध्रीणसस्य मांसेन तृप्तिर्द्वादशवा
र्षिकी त्रिपिबं त्विंद्रियक्षीणं श्वेतं वृद्धमजापतिं वाध्रीणसं तु तं प्राहुर्याज्ञिकाः श्राद्धकर्मणि क्षीरादौ विशेषमाह हेमाद्रौ सुमंतुः पयोदधि

घृतंचैवगवांश्राद्धेषुपावनं महिषीणांघृतंप्राहुः श्रेष्ठंनतुपयःक्वचित् याज्ञवल्क्यः संधिन्यनिर्दशावत्सागोपयःपरिवर्जयेत् औष्ट्रमेकशफंस्त्रै
णमारण्यकमथाविकं हेमाद्रौहारीतः नवसूतायाःसप्तरात्रादर्वाक् दशरात्रादित्यपरे मासेनेत्यपरे पयःशुद्धंभवतीतिधर्मविदः एतद्गोभावपरं देवलः
अजाविमहिषीणांतुपयःश्राद्धेषुवर्जयेत् विकारान्पयसश्चैव माहिषंतुघृतंहितं तत्रैवब्राह्मे माहिषंचामरंमार्गं आविकैकशफोद्भवं स्त्रैणमाद्रंया
चितंच दधिक्षीरंसर्जेद्धृतं सगुडंमरिचाक्तंतु तथापर्युषितंदधि दीर्घोतक्रमपेतंचनष्टस्वादंचफेनवत् माहिषापवादोऽपरार्के ब्राह्मे आरण्यमाहिषी
क्षीरंशर्करायांशुंठिसंयुतं मध्वक्तंतुहितंचैवदध्याद्युदश्वितंयतः यद्यपियाज्ञवल्क्येन अन्नंपर्युषितंभोज्यंस्नेहाक्तंचिरसंस्थितं अस्नेहाअपिगोध
मयवगोरसविक्रियाइति पर्युषितंदध्यादिभोज्यमुक्तं तथापि गुडमरीचाक्तस्य पर्युषितदोषोऽत्रोच्यते इतिहेमाद्रिः तत्रैवब्राह्मे कालकौशांतंदु
लीयंवास्तूकं तंमूलकंतथा शाकमारण्यकंचैवदद्याच्छ्राद्धेषुनित्यशः तंदुलीयंसूक्ष्मपत्रमितिहेमाद्रिः महाराष्ट्रभाषायांमाठइतिप्रसिद्धं आरण्यकं फां
जीकूंचादि तत्रैव दाडिमंमागधींचैवनागरार्द्रकतिंतिणी आम्रातकंजीरकंच कुंबरंचैवयोजयेत् मागधीपिप्पली कुंवरंधाणिमाइतिप्रसिद्धं या
यवीये अगस्त्यस्यशिखास्ताम्राः कषायाःसर्वएवच शिखानवपल्लवाः प्रभासखंडे आरामस्यतुसीमंताःकलायाःसर्वएवच सीमंतानवपल्लवाः
कौर्मे तमालंशतकंदंचमध्वालुंशीतकंदली मध्वालुःमोहलकंदः शीतकंदलीरताळूइतिप्रसिद्धं अथवर्ज्यं मार्कंडेयपुराणे यत्नोत्कोचादि
नाप्राप्तंपतिताद्यदुपार्जितं अन्यायकन्याशुल्कार्थं द्रव्यंचात्रविगर्हितं पित्र्यकर्मेप्रयच्छस्वैस्तुत्कायच्चाप्युपाहृतं चंद्रोदयेशंखः भूतृणंसुरसाशि
ग्रुपालंक्यामृदुकंतथा कूष्मांडालाबुवार्[illegible]कोविदारांश्चवर्जयेत् पिप्पलीमरिचंचैवतथावैपिंडमूलकं कृतंचलवणंसर्वंवंशाग्रंचविव
र्जयेत् राजमाषान्मसूरांश्च कोद्रवान्कोर[illegible]कान् लोहितान्वृक्षनिर्यासान्श्राद्धकर्मणिवर्जयेत् भूस्तृणंकाश्मीरेप्रसिद्धं सुरसानिर्गुंडी

तिमाधवः तुलसीपृथ्वीचंद्रः मकुकंडलजः[illegible] सस्कंकमितिपाठे खदिरशाकइतिहेमाद्रिः मरीचान्यार्द्राणीतिहेमाद्रिः कोरदूषकंवनकोद्र
वः चंद्रिकायांशंखः पिंडालकंचतुंडीरंकरमर्दंचनालिकं कूष्मांडवल्कुबीजानिश्राद्धेदत्वाव्रजत्यधः पिंडालकंपेंढरमितिप्रसिद्धं तुंडीरंबिंबीफलमि
तिकेचित् करमर्दं करवंदं तत्रैव बिडालोच्छिष्टमाघ्रातंश्राद्धेयत्नेनवर्जयेत् कूष्मांडंमहिषीक्षीरंमाढक्योराजसर्षपाः चणकाःराजमाषाश्चघ्नं
तिश्राद्धंनसंशयः वृद्धपराशरः करीरफलपुष्पाणि विडंगमरिचानिच जंभारिकासजंबीरास्रूपकंबीजपूरकं जंबलाबूनिपिप्पल्यःपटो
लंपिंडमूलकं मसूरंजनपुष्पंचश्राद्धेदत्वापतत्यधः जंबुसूक्ष्मांगाधवीयेचतुर्विंशतिमते यावनालान्कुलित्थांश्च वर्जयंतिविपश्चितः अ
त्रयानित्वणकादीनि विहितानिनिषिद्धानितेषांविकल्पः अन्यथश्यामाकैश्चणकैःशाकैर्नीवारैश्चप्रियंगुभिः गोधूमैश्चतिलैर्मुद्गैर्मासंप्रीण
यतेपितॄन्इति गोधूमैरिक्षुभिर्मुद्गैःसतीनैश्चणकैरपि इतिहेमाद्रौकौर्मे विष्णुधर्मादिविरोधःस्यात् पिप्पलीमरीचादेस्तुद्रव्यस्यनिषे
धोनत्वन्यद्रव्यमिश्रस्य सौवीरतिक्तैर्लवणादिभिस्तुपाकस्यसिद्धिर्महतीहियैस्तु तद्बीजपूरान्नमरीचादियोगात्सिद्धंप्रदेयंनदुतुंष्यतीहेति
पृथ्वीचंद्रोदये वृद्धपराशरोक्तेः तत्रैव दातुश्चयस्मिन्मनसोभिलाषःश्रद्धाप्रवेद्यत्रचदीयमाने श्राद्धेषुदेयंविधिवत्तदेवतद्दत्तमक्षय्यमिति
ब्रुवंति एतन्निषिद्धेतरविषयं चंद्रिकायां कृष्णधान्यानिसर्वाणि वर्जयेच्छ्राद्धकर्मणि नवर्जयेत्तिलांश्चैव मुद्गमाषांस्तथैवच मात्स्ये म
सूरशणनिष्पावराजमाषकुसुंभिकाः पद्मबिल्वार्कधुत्तूरपारिभद्राटरूषकाः नदेयाःपितृकार्येषुपयश्चाजाविकंतथा कोद्रवोद्दारवरक
कपित्थमधुकातसी एतान्यपिनदेयानिपितृभ्यःश्राद्धमिच्छता निष्पावाः वल्लाः बिल्वंचरक्तंनिषिद्धं जंबीरंरक्तबिल्वंचशालस्यापिफलं

निर्ण. त.

संजेदितिब्राह्मणोक्तेः पारिभद्रो निंबतरुरिस्समरः रक्तमंदारइतिहेमाद्रिः आढरूषोवासंतीपुष्पं उद्दारः कंचनारः मधुकंज्येष्ठीमध्विति चंद्रिका
चरकाबनमुद्गः हेमाद्रौब्रह्मांडे आसनारूढमलाद्यंपादोपहतमेवच अमेध्येजंगमैःस्पृष्टं शुष्कं पर्युषितंचयत् द्विःस्विन्नंपरिदग्धंचतथैवा
ग्रावलेहितं शर्कराकीटपाषाणैःकेशैर्यच्चाप्युपद्रुतं पिण्याकंमथितंचैवतथातिलवणंचयत् सिद्धाःकृताश्चयेभक्ष्याःप्रत्यक्षलवणीकृताः वा
ससाचावधूतानिवर्ज्यानिश्राद्धकर्मणि द्विःस्विन्नंयत्सकृत्पाकेनपक्कमपिहिंगुजीरकादिसंस्कारार्थं पुनःपच्यतेतद्वर्ज्यं यत्तु तिक्तरसाकाम्ल
विकारादिद्विःपाकेनैवभक्षणार्हंतन्ननिषिद्धं अग्रावलेहितंआस्वादितपूर्वं पर्युषितस्यसदानिषेधेपि पुनर्वचनं अपूपाश्चकरंभाश्चधानावट
कसक्तवः शाकंमांसमपूपंचसूपंकृसरमेवच यवागूःपायसंचैवयच्चान्यत्स्नेहसंयुतं सर्वंपर्युषितंभोज्यं शुक्तंचेत्परिवर्जयेत् इतिमाधवीये यमो
क्तवटकादेरपिपर्युषितस्यनिषेधार्थमितिचंद्रिकादयः वर्ज्येषुविश्वामित्रः कपित्थंकुरुबकंचैवनारिकेरंचपेनिकं जंबूफलादिपक्वंच पिण्याकं
तंदुलीयकं हेमाद्रौषट्त्रिंशन्मते वर्ज्यामर्कटकाश्राद्धे राजमाषास्तथैवच मर्कटालंकाःपैठीनसिः रंताकनलिकापोतकुसुंभाश्मंतकानिशा
कानामभक्ष्याइति पोतं पौडं इतिप्रसिद्धं मार्कंडेयः वर्ज्याश्चामिषवानिसं श्वेतपुष्पागवेधुकाः जंबरीकंफलंवर्ज्यं कोविदारश्चनिसराः
अभिषवःसंधानकोमितिपृथ्वीचंद्रः शाट्यायनः मारिषंतालिकाचैवरक्तकायावकलंबिका असुरान्नमिदंसर्वं पितॄणांनोपतिष्ठते मारिषंरा
जगिराइतिप्रसिद्धं कलंबिकावेणावा करितपना तत्रैव गांधारिकापटोलानिश्राद्धकर्मणिविवर्जयेत् गांधारिकाइराकेतिकेदेवः भारते
हिंगुद्रव्येषुशाकेषु अलाबुंलसुनंतथा [illegible]डकान्यलाबूनि कृष्णलवणमेवच पुनरलाबुग्रहणंमुभयाल्लाबु निषेधार्थमितिपृथ्वीचं

शिवः

द्रः ककुंडकंवर्तुलश्चवार्ताकंतथैव कुसुंभबृहंका[illegible]श्यंवर्जयेदमलचेतसः हेमाद्रौ ब्राह्मे वार्ताकंपंचशिंबंचलोमशानिफलानिच कालिंगंरक्तचारंच
पीणाकंधृतचारकं कपालंकालमारीचंकरंजीपिंडमूलकं गंजनंचुक्रिकांचैवगाजरंजीवकंतथा वृंताकंश्वेतं कंदुरंश्वेतरंताकं कुंभांडंच
विवर्जयेत् इतिदेवलोक्तेः तेनकृष्णस्यानिषेधइतिचंद्रिकामाधवौ वस्तुतस्तु सदाश्वेतनिषेधात्पुनःश्राद्धेनिषेधोबर्थः तेनसर्वस्यवृ
ताकस्यापिनिषेधार्थमिदमितिवयं कंदुराकपिकच्छुः कुंभांडंरक्तालाबुः पंचशिंबंवल्लमसूरराजमाषभटकुलुत्थाः लोमशानिकपित्था
नि रक्तचारंलोहितचारफलं वीणाकंदीर्घरुक्षकर्कटी धृतचारकं चिरंछितचारकलं चारोळी कपालंनारिकेलं कर्कचवृक्षफलं
मारीचमार्द्रं गंजनंपलांडुभेदः पश्चिमदिशिप्रसिद्धः नतुगाजरं तस्यपृथगुक्तेः चुक्रियाचिरकालभुक्तपानकं चंद्रिकायांहारीतः नवट
प्लक्षोदुंबरभेलुदधित्थनीपमातुलिंगानिभक्षयेत् भेलुःश्लेष्मातकः दधित्थंकपित्थं स्मृतिसारे क्षीरेतुलवणंदत्वाउच्छिष्टंपिबयद्घृतं स्ना
नेरजकतीर्थेषुताम्रेगव्यंसुरासमं गोतुनिबंधस्मृतिसागरेस्मृतिः नारिकेलोदकंकांस्येताम्रपात्रेस्थितंमधु गव्यंचताम्रपात्रस्थंमद्यतु
ल्यंघृतंविना ताम्रपात्रस्थितंमांसं यच्चगव्यंघृतेनसत् आमिषंतुगवांमांसं दधिमध्यंपयोरजः द्रव्यांतरयुतंमांसंपरस्यसासंयुतंदधि
पयोनुधृतसाक्षंचताम्रपात्रेनदुष्यति अथजलं याज्ञवल्क्यः शुचिगोतृप्तिकृत्तोयंप्रकृतिस्थंमहीगतं वर्ज्यंजलमुक्तं हेमाद्रौब्रह्मां
डे दुर्गंधिकेनिलक्षारंपंकिलंपल्वलोदकं नभवेद्यत्रगोतृप्तिर्नक्तंयच्चाप्युपाहृतं यन्नसर्वार्थमुत्सृष्टं यच्चाभोज्यनिपानजं तद्वर्ज्यंस
लिलंतातसदैवश्राद्धकर्मणि निपानोजलाशयः शुद्धितत्वेशंखः स्नानमाचमनंदानंदेवतापितृतर्पणं शूद्रोदकेनकुर्वीततथामे

निर्ण. ८. धाद्धिनीःस्वेतेः हेमाद्रावादित्यपुराणे चिरपर्युषितं चापि शुद्धस्पृष्टमथापि वा आद्धव्याः स्नानदानादौ पुनासेवनसंशयः कात्यायनः आ
पोनिशिनग्यकुर्यात्कापिवेद्धकदाचन उध्ध्सोग्निमुपर्यग्नेथान्नोधाम्न इतीरयेत् रजोदोषेतुप्रायश्चित्तं नारदीये सजेस्पर्युषितं पुष्पं
त्यजेत्पर्युषितं जलं नत्यजेज्जाह्नवीतोयं तुलसीपत्रबिल्वकं अन्यान्यपिपृथ्वीचंद्रोदयेमत्स्ये मध्याह्नः खड्गपात्रं तथानेपालकं
बलः रौप्यं दर्भास्तिलागावो दौहित्रश्चाष्टमः स्मृतः पापंकुत्सितमित्याकुस्तस्यसंतापकारिणः अष्टावेते यतस्तस्मात्कुतपाइतिविश्रु
ताः श्रासे· यतिस्त्रिदंडः करुणाराजतंपात्रमेवच दौहित्रंकुतुपः कालश्छागः कृष्णाजिनं तथा शास्त्राणीतिशेषः दौहित्रं खड्गपात्रमितिक
ल्पतरुः अपरार्केस्मृत्यंतरे अपहंदुहितुश्चैव खड्गपात्रं तथैव च घृतं च कपिलायागो दौहित्रमिति कीर्तितं अमावास्यागतेसोमे
यातुखादतिगोरश्मिं तस्यागोर्यद्भवेत्क्षीरं तद्दौहित्रमुदाहृतं स्मृतिसंग्रहे उच्छिष्टंशिवनिर्माल्यंवांतंचमृतकर्पटं श्राद्धे सप्तपवित्रा
णि दौहित्रः कुतुपः स्तिलाः उच्छिष्टं वत्सस्य दुग्धमित्यर्थः शिवनिर्माल्यं गंगोदकं वांतं मधु मृतकर्पटं सरीपट्टं तिलेषु आपस्तंबः अट
व्यांयेसमुत्पन्ना अकृष्टफलितास्तथा तेवैश्राद्धे पवित्रास्युस्तिलास्तेनतिलास्तिलाः अभावेग्राम्याः गौराः कृष्णास्तथारण्यास्तथैवत्रि
विधास्तिलाइतिपाद्मोक्तेः अथवर्ज्यानि चंद्रिकायांयमः कुक्कुटोविड्वराहश्च काकश्चाथबिडालकः वृषलीपतिश्चवृषलषंढोवीरा
रजस्वला एतेतुश्राद्धकालेवैवर्जनीयाः [illegible]लतः खंजःकाणः कुणिःश्वित्री दातुःप्रेष्यकरस्तथा न्यूनांगोप्यतिरिक्तांगस्तमप्यपनय शिव.
ततःवायवीये अन्नंपश्येतु पुरेतेतु यातिहव्यकव्ययोः उत्सृष्टव्यं प्रधानार्थं संस्कारस्त्वापदिस्मृतः स्मृतंतु चंडालादिवीक्षित

मन्नमभोज्यमन्यत्तमं कृत्स्नं हिरण्योदकस्पर्शात् [illegible]त्रैव जमदग्निः शुद्धं स्याद्यकुशांबुभिः पावमान्यस्तरत्समाः पूतेन वारिणादर्भै रन्नदोषमपानुदन्
चंद्रोदये पादुकापानहौछत्रं चित्ररक्तांबरं तथा [illegible]पुष्पं च मार्जारं श्राद्धभूमौ विवर्जयेत् निर्णयदीपे घंटानिनादोहयसंनिधानं जंबूकशंखौक
दलीलेख्यच उक्तं मत्तजास्यकं हयारिजातिश्राद्धस्यवैगुण्यकराण्यमूनि हयारिजं महिषीक्षीरादि अथश्राद्धदिनकृत्यं चंद्रोदये उशनाः गोमय
दकैर्भूमिमार्जनं शौचं कुर्यात् पराशरः नि· कांजिकं दधितक्रं च घृतं वाघृतमेववा पूर्वमेव न दातव्यमेकोद्दिष्टे पापार्वणे हेमाद्रौ पराशरः गृहा
ग्निशिशुदेवानां ब्रह्मचारितपस्विनां तावन्नदीयतेकिंचिद्यावत्पिंडान्निर्वपेत् कौर्मेनैवक्षिरेत्तत्र सर्वतो बंधयेद्गृहान् तत्रैव देवलः तत्रैवधात्रि
तौदाता प्रातः स्नात्वासहांबरः आरभेतनवैः पात्रैः रन्नारंभं च बांधवैः अत्रात्मने तिला+ पदात्त्वयमेव वाकुःकार्यः अशक्तो पत्न्या तदभावेबां
धवैः ततस्त्वानिपपाबाभुसीतीजनकनंदिनीतिपाद्मलिंगादितिहेमाद्रिः श्राद्धदीपकलिकायामाश्वलायनः समानप्रवरैर्मित्रैःसपिंडैः
श्रमणान्वितैः कृतोपकारिभिश्चैव पाककार्यं प्रशस्यते व्यासः गृहिणी चैव सुस्नाता पाकं कुर्यात्स्वयत्नतः निष्पन्नेषु पाकेषु पुनःस्नानं समाचरेत् पृथ्वीचंद्रोदयेब्रा
ह्मे· रजस्वलां च पाषंडां पुंश्चलीं पतितां तथा त्यजेच्छूद्रां तथा वंध्यां विधवां चान्यगोत्रजां व्यंगकर्णी चतुर्थेह्नः स्नातामपि रजस्वलां वर्जयेत् श्राद्धपाकार्थं ममातापितृवं
शजां मातृपितृवंशजभिन्नां त्यजेदित्यर्थः नपाकं कारयेत्सुश्रीमन्यां चाप्यन्यगोत्रजां मृतवंध्यां च गर्भघ्नीं गर्भिणीं चैव दुर्मुखीं पाकभांडानितुहेमाद्रौ नागरखंडे
सौवर्णान्यथ रौप्याणि कांस्यताम्रोद्भवानि च मार्तिकान्यपि सर्वाणि नूतनानि दृढानि च तत्रैवादित्यपुराणे पक्वेदन्नानि सुस्नातः पात्रेषु शुद्धेषु स्वयं स्वर्णा
दिधातुजातेषु मृन्मयेष्वपि वाहिजः अच्छिद्रेष्वविलिप्तेषु तथा नुपहतेषु च नायसेषु न भिन्नेषु दूषितेष्वपि कर्हिचित् पर्वकृतोपयोगेषु मृन्मयेषु न तु कर्हिचि
तः वायुपुराणे नकदाचित्पचेदन्नमयस्थालीषु पैतृकं अयसोदर्शनादेव पितरो विद्रवंतिहि कालायसं विशेषेण निंदंति पितृकर्मणि फलानां चैव

शाकानां छेदनार्थानियानितु॰ महानसोपशस्त्राणितेषामेवहिसंनिधिः इष्यतेनेतरस्यात्रशस्त्रमात्रस्यदर्शनं॰ महानसेपि युक्तानामपिकार्येनदर्शनं पचमान
स्तुभांडेषुभक्ष्यातामयेषुच समुद्धरतिवैयोयात्पितृन्दुःस्वमहार्णवात॰ तेनसानमस्तावेतुपिठरेमृन्मयेपिच तदेवशुचौ प्रकुर्वीतपाकंपित्रर्थमादरात॰ त
त्रैवादिपुराणे पक्वान्नस्थापनार्थंतुशस्तंतेदारुजान्यपि दर्व्यादीन्यपिकार्याणि यज्ञियैरपिदारुभिः यमः वियारुअतकार्यंच मातृपित्रोः क्षयेहनि नवसांड
निकुर्वीतयज्ञकालेविशेषतः अथपाकाग्निः हेमाद्रौप्रजापतिः औपासनेनान्नसिद्धिरग्नौकरणमेवच॰ पृथ्वीचंद्रोदयेगिराः शालाग्नौतुपचेदन्नं लौ
किकेवापिनित्यशः यस्मिन्नग्नौपचेदन्नं तस्मिन्होमोविधीयते मनुः वैवाहिकेग्नौकुर्वीतगृह्यंकर्मयथाविधि पंचयज्ञविधानंचपक्तिंचान्वाहिकीं
द्विजः श्राद्धस्यगृह्यसंवोक्तंमपराकेण अत्रविशेषः कर्मप्रदीपे प्रातर्होमंतुनिर्वर्त्यसमुद्धृत्यकृताशनात् शेषंमहानसेकृत्वा तत्रपाकंसमाचरेत् पा
कांतेग्निंतमाहृत्यगृह्याग्नौतुपुनःक्षिपेत् ततोस्मिन्वैश्वदेवादिकर्मकुर्यादतंद्रितः तदभावेलौकिके॰ ततःपश्चेपुरन्नानिर्वापानंतरं राने वैवाहिक
ग्नावन्यत्रलौकिकेचापिसंयतइति कलिकायांसंग्रहोक्तेः पित्रर्थंनिर्वापंकृत्वेमर्थः अतएवहेमाद्रौवायुपुराणे॰ पित्रर्थंनिर्वपेद्धोमोवैवादर्भसंस्कृते
इतितत्रैवपाद्ममात्स्ययोः अग्निमान्निर्वपेत्सैत्रंचरुंवासममुष्टिभिः पितृभ्योनिर्वपामीति सर्वंदक्षिणतोन्यसेत् चरुग्रहणान्नशाकादावपि हेमाद्रिः
पिंडपितृयज्ञार्थपाकविषयोयंनिर्वापइतितुयुक्तं॰ अयंचतरेषामग्निः अश्वलायनानांतु गुरुणाभिमता अन्यतोवापक्षीयमाणा अमावास्यायां
शांतिकर्मकुर्वीत तन्निसादि सूत्रेणपचनाग्नेस्स[illegible]क्ता इहैवायमितरो जातवेदा इस धर्वेनशमीमयाभ्यामरणीभ्यामग्निंमंथेत्सपचनाग्निर्भवतिमे
इतिसूत्रे तत्तोवाक्तं पचनाग्नावेवपाकः बौध[illegible]नेनाप्युक्तं॰ आहृतपचनाग्निमौपासनंवाभिप्रव्रजंतीति॰ स्मार्त्ताग्नौपाकस्त्वन्यत्रा ख्याविषय

इतिकेचित्॰ वस्तुतस्तु पूर्वोक्तस्यसर्वाधानिविषय[illegible]युक्तं॰ शिष्टाचारोपिनपचनोदृश्यते अंडबिलायामपिसर्वाधानपक्षे वैश्वदेवंश्राद्धंचपचने कुर्यादन्यथोपासने
इत्युक्तं अग्नौकरणंतु प्रयोगपारिजातादिभिराब्दिके[illegible]नवश्राद्धेषु पिंडपितृयज्ञव्यतिषंगात्के लौकिकेपचनेवापाके कृतेपि गृह्याग्नावेव पक्वचरुणैवकार्यं इतिप्र
तिभाति मदनरत्नेप्येवं विधुरोच्छिन्नाग्न्यादेस्तुपृष्ठोदकादिविधानेनाग्निसंपादनमित्युक्तं हरिहरभाष्ये॰ इतिपाकाग्निः चंद्रिकायांमार्कंडेयः अद्भिःषड्भिर्मु
हूर्तेषुगतेषुप्रयतान्द्विजान् प्रत्येकंप्रेषयेत्प्रेष्यान्प्रदायामलकोदकं देवलः ततोनिवृत्तेमध्याह्नेकृत्तरोमनखान्द्विजान् अभिगम्ययथान्यायं प्रयच्छेद्दंतधावनं
तैलमभ्यंजनंस्नानं स्नानीयंचपृथग्विधं पात्रैरौदुंबरैर्दद्याद्वैश्वदेविकपूर्वकं औदुंबरैस्ताम्रमयैः अत्रक्षौरामलकस्नानादिनिषिद्धतिथ्यादिव्यतिरिक्तविष
यमितिहेमाद्रिर्माधवश्च॰ यत्तु चंद्रिकायांप्रचेताः तैलमुद्वर्तनंस्नानंदद्यात्सर्वाह्णएवतु॰ श्राद्धभुग्भ्योननुश्मश्रुछेदनंतुनकारयेत् इतितन्निषिद्धतिथ्यादि
विषयं निषिद्धतिथ्यादितुप्रागुक्तं॰ अभ्यंगस्तुकालिकायांकात्यायनः तैलमुद्वर्तनंदेयंब्राह्मणेभ्यःप्रयत्नतः तैरभ्यंगश्चकर्तव्योवर्ज्यकालेनचिंतयेत् अपरार्के
प्रचेताः स्नातोधिकारीभवतिदैवेपित्र्येचकर्मणि श्राद्धकृच्छुक्लवासाःस्यान्मौनीचविजितेंद्रियः हेमाद्रौजाबालः तांबूलदंतकाष्ठंचस्नेहस्नानमभोजनं र
त्योषधपरान्नानिश्राद्धकर्त्ताविवर्जयेत् वस्त्रविशेषमाह तत्रैवभृगुः नग्नःस्यान्मलवद्वासानग्नःकौपीनकेवलः द्विकच्छोनुत्तरीयश्च अकच्छोवस्त्रएवचन
ग्नःकाषायवासाःस्यान्नग्नश्चार्द्रपटःस्मृतः॰ नग्नोद्विगुणवस्त्रःस्यान्नग्नोरक्तपटस्तथा॰ नग्नस्तुस्निग्धवस्त्रःस्यान्नग्नस्यूनपटस्तथा ततःकर्त्ता ऊर्ध्वपुंड्रं
कुर्यात् जपेहोमेतथादानेस्वाध्यायेपितृकर्मणि तत्सर्वंनश्यतिक्षिप्रमूर्ध्वपुंड्रंविनाकृतमिति हेमाद्रावुक्तेः यज्ञोदानंजपोहोमःस्वाध्यायःपितृकर्मच व्य
र्थंभवतिविप्रेंद्रऊर्ध्वपुंड्रंविनाकृतमितिब्रह्मनारदीयात् ऊर्ध्वंचतिलकंकुर्याद्दैवेपित्र्येचकर्मणीतिवृद्धपराशरोक्तेश्च अन्येतु ऊर्ध्वपुंड्रंद्विजातीनामग्नि
होत्रसमोविधिः श्राद्धकालेतुसंप्राप्तेकर्त्ताप्रोक्ताचतत्त्यजेत्॰ वामहस्तेचदर्भाश्चगृहेरंगवलिंतथा ललाटेतिलकंकृत्वानिराशाःपितरोगताइतिसं

नि.सिं.उ. यदोक्तेः ऊर्ध्वपुंड्रं त्रिपुंड्रं वा चंद्राकारमथापि वा श्राद्धकर्त्ता न कुर्वीत यावत्पिंडान्न निर्वपेत् इति विश्वप्रकाशोक्तौ वचनात्तन्न कार्यमित्याहुः अत्राचाराद्व्यवस्था अतएव
बृहन्नारदीये ऊर्ध्वपुंड्रं च तुलसीं श्राद्धे नेच्छंति केचनेति ऊर्ध्वपुंड्रविधिर्विप्रविषयः निषेधः कर्तृपर इति पृथ्वीचंद्रः यत्तु हेमाद्रौ देवलः ललाटे पुंड्रकं दृष्ट्वा
स्कंधे माल्यं तथैव च निराशाः पितरो यांति दृष्ट्वा च वृषलीपतिमिति तद्वृषेन त्रिपुंड्रविषयं प्राक् पिंडदानादूर्ध्वं नैव कुर्यात् स्त्रविषयं हेमाद्र्याश्वलायनोक्तेः
पुंड्रं वर्तुलमिति पराके मदनरत्ने च पृथ्वीचंद्रस्तु पुंड्रं त्रिपुंड्रं ऊर्ध्वं च तिलकं कुर्यान्न कुर्याद्वै त्रिपुंड्रकं ऊर्ध्वं च तिलकं कुर्याद्दैवे पित्र्ये च कर्मणि निराशाः पित
रो यांति दृष्ट्वा चैव त्रिपुंड्रकमिति वृद्धपराशरोक्तेः भोक्तुस्तिर्यग्लेपो भवत्येव वर्जयेत्तिलकं भाले श्राद्धकाले च सर्वदा तिर्यगप्यूर्ध्वपुंड्रं वा धारयेत्तु प्रय
त्नत इति व्यासोक्तेरित्याह पृथ्वीचंद्रोदये ब्राह्मे सदर्भेण तु हस्तेन यः कुर्यात्तिलकं बुधः आचम्य स विशुध्येत तदर्भत्यागेन चैव हि श्राद्धारंभकालमाह
परार्के गौतमः आरभ्य कुतपे श्राद्धं कुर्यादा रौहिणं बुधः विधिज्ञो विधिमास्थाय रौहिणं तु न लंघयेत् यत्तदेकोद्दिष्टविषयं मात्स्ये ऊर्ध्वं मुहूर्तात्
कुतपाद्यन्मुहूर्तचतुष्टयं मुहूर्तपंचकं ह्येतत्स्वधाभवनमिष्यते तथा मध्याह्ने सर्वदा यस्मान्मंदी भवति भास्करः तस्मादनंतफलदस्तत्रारंभो विशिष्यते अथ श्राद्ध
परिभाषा चंद्रिकायां कात्यायनः दक्षिणं पातयेज्जानु देवान्परिचरन्सदा पातयेदितरं जानु पितॄन्परिचरन्सदा बौधायनः प्रदक्षिणं तु देवानां पितॄणामप्रदक्षि
णं देवानामृजवो दर्भाः पितॄणां द्विगुणास्तथा पृथ्वीचंद्रोदये शंखः आवाहनार्घ्यसंकल्पे पिंडदानान्नदानयोः पिंडाभ्यंजनकाले तु तथैवांजनकर्मणि अक्ष
य्यासनयोः पाद्ये गोत्रं नाम प्रकाशयेत् तत्रैव परिशिष्टे क्षणे च पिंडदाने च गंधधूपाक्षयेऽतथा संकल्पे चासने दीपे अंजनाभ्यंजने तथा अन्नार्घ्यदानाद्यंतेषु गोत्रना शिव
मच कीर्तयेत् कालिकायां संग्रहे आसनावाहने पाद्ये [illegible] नदानेतथैव च अक्षय्ये पिंडदाने च षट्सु नामानि कीर्तयेत् मात्स्ये संबंधं प्रथमं ब्रूयाद्गोत्रं नाम तथैव च प

श्राद्धं प्रविजानीयात्क्रम एष सनातनः तत्रैव सकारेणैव वक्तव्यं गोत्रं सर्वत्र धीमता सकारः कुतपो ज्ञेयस्तस्मात्यत्नेन तं वदेत् यथा काश्यपसगोत्रेति पराशरसगो
त्रस्य वत्सस्य तु महात्मनः भिक्षोः पंचशिखस्याहं [illegible] परमधार्मिकः इति मोक्षधर्मेषु प्रयोगाच्च तेन गोत्र सकारो गोत्रयोः पर्यायशब्दः स्वाभेदाद्व्यवस्थेति
स्थलपाठिः हेमाद्रौ बृहस्पतिः गोत्रं स्वरांतं सद्वैस्यं च तत्र गोत्रस्याक्षयकर्मणि गोत्रस्तु तर्पणे प्रोक्तः कर्ता एवं न मुह्यति सर्वत्रैव पितः प्रोक्तं पिता तर्पणाक
र्मणि पितुरक्षय्यकाले तु पित्रे संकल्पने तथा शर्मन्नर्घ्यादिके कार्ये शर्मा तर्पणकर्मणि शर्मणोऽक्षय्यकल्पे तु पितॄणां दत्तमक्षयं स्वरांतं संबुध्यंतमिति हेमाद्रिः
तत्रैव चंद्रिकायां च स्मृत्यंतरे गोत्रस्य त्वपरिज्ञाने काश्यपं गोत्रमुच्यते यस्मादाह श्रुतिः सर्वाः प्रजाः कश्यपसंभवाः यत्तु सत्याषाढः अथानामकृतबंधोः पु
रोहितगोत्रेणाचार्यगोत्रेण वेति तद्द्विजाकपरं नामोच्चारणे विशेषमाह हेमाद्रौ बौधायनः शर्मांतं ब्राह्मणस्योक्तं वर्मांतं क्षत्रियस्य तु गुप्तांतं चैव वैश्यस्य
दासांतं शूद्रजन्मनः पित्रादिनामाज्ञाने तत्रैव पृथिवीषत्सितावान्यस्तासितान्यंतरिक्षसत् अभिधानापरिज्ञाने दिविषत्प्रपितामहः पित्रादीनां नाम यदा पुत्रे
ण ज्ञायते तदा आपस्तंबसूत्रेऽप्येवं एतदन्यशाखापरं आश्वलायनानां तूक्तं तत्सूत्रे यदि नामान्यविद्वान् तत पितामह प्रपितामहेति ब्रूयात् तत्कारिका
पि नामानि चेन्न जानीयात्ततस्यादि वदेत्क्रमात् ततेति संबंधमात्रपरं तेन पितृव्यादावपि तथेति गौडाः स्त्रीणां दांतं नाम ह्येयं दांतं नाम स्त्रीणामिति पृथ्वी
चंद्रोदये गोभिलोक्तेः केचिद्देवी शब्दांतमाहुः अन्ये तु देवि दा इति द्वयोः समुच्चयमाहुः हेमाद्रौ नारायणः विभक्तिभिस्तु यत्किंचिद्दीयते पितृदैवते
तत्सर्वं सफलं ज्ञेयं विपरीतं निरर्थकं चंद्रिकास्मृत्यर्थसारयोः नारदीये च अक्षय्यासनयोः षष्ठी द्वितीयावाहने तथा अन्नदाने चतुर्थी स्याच्छेषाः संबुद्
धयः स्मृताः पक्षव्यासः चतुर्थ्यासने नित्यं संकल्पे च विधीयते प्रथमा तर्पणे प्रोक्ता संबुद्धिसपरे जगुरिति अत्र शाखाभेदाद्व्यवस्थेति हेमाद्रिः
हेमाद्रौ भृगुः अर्घ्यावने जनं पिंडमन्नं प्रसवनेजनं संबुद्धितत्रकुर्वीत शेषे षष्ठी विधीयते हेमाद्रौ प्रभासखंडे यज्ञोपवीतिना कार्यं दैवं कर्म प्र

निर्ण० तृ०

दक्षिणं प्राचीनावीतिना कार्यं पितृकर्म प्रदक्षिणं अनुपनीतस्त्रीशूद्रादेः कण्ठेनोत्तरीयेणैव सव्यापसव्ये ज्ञेये नत्वोपवीतस्थानीयत्वात् अपसव्यं क्रमाद्
[illegible] कृत्वा काश्यपसगोत्र इति ब्राह्मणान् वीति वाचस्पतिः मनुटीकायां तु सदोपवीतिना भाव्यमिति सत्यपुरुषार्थत्वात् प्राचीनावीतकालेप्युपवीतांतरेण तत्कार्यमे
वेति तन्न विशेषणबाधात् अमदृग्विः स्कंदस्तोत्रे जपं सूक्तं पिंडाघ्राणं च दक्षिणा आह्वानं स्वागतं चार्घ्यं विना च परिवेषणं विसर्जनं सौमनस्यमा
शिषां प्रार्थनं तथा विप्रप्रदक्षिणं चैव स्वस्तिवाचनकं विना पितॄनुद्दिश्य कर्तव्यं प्राचीनावीतिना सदा हेमाद्रिसंग्रहे आदौ विप्राङ्घ्रिशौचांते स्पर्शने विकि
रे तथा पिंडदानेप्यावेद्य तान् विसर्ज्य ब्राह्मणांस्तथा आचामेच्छ्राद्धकर्त्ता च स्थानेष्वेतेषु सप्तसु आद्यंतयोर्द्विराचामो मध्ये पंचसु सकृत्सकृत् तत्रैव
श्राद्धारंभेवसाने च पादशौचार्चनांतयोः विकिरे पिंडदाने च षट्स्वाचमनमिष्यते आश्वलायनः दानाध्ययनदेवार्चाजपहोमव्रतादिकान्
न कुर्याच्छ्राद्धदिवसे प्राग्विप्राणां विसर्जनात् एतन्नित्यवर्जमिति बोपदेवः बृहद्विष्णुः भिन्नदेवपरं विष्णुनिवेदितान्नेन यष्टव्यं देवतांतरं पितृभ्य
श्चापि तद्देयं तदानंत्याय कल्पते पितृशेषं तु यो दद्याद्धरये परमात्मने रेतोधाः पितरस्तस्य भवंति क्लेशभागिनः इति स्कांदात् पितरः सर्वमनुष्या
विष्णुनाशितमश्नंतीति श्रुतेः यः श्राद्धकाले हरिभुक्तशेषं ददाति भक्त्या पितृदेवतानां तेनैव पिंडास्तुलसीविमिश्रा आकल्पकोटिं पितरः सुतृ
प्ता इति ब्राह्मोक्तेश्चेति श्रीधरस्वामिनः सिंहपरिचर्यादयश्च एतत्सर्वं निबंधविरोधान्निर्मूलं अत्र विशेषो हेमाद्रौ विष्णुधर्मे श्राद्धं कृत्वा तु समभ्यर्च्येन
वराहं जनार्दनं शिवपुराणे पूजयित्वा शिवं भक्त्या पितृश्राद्धं प्रकल्पयेत् पूर्वनिषेधस्तु विहितभिन्नपरः तथा हेमाद्रौ दर्भाः दक्षिणाग्रादि पादजान्वं शिव०
समर्थेषु शिरोंसतंतुपादेषु वामांगादर्भपेत् [illegible] कलिकायां स्मृत्यंतरे श्राद्धारंभे तु ये दर्भाः पादशौचे विवर्जयेत् अर्चनादौ तु ये दर्भाः उच्छिष्यंते वि

८६

सर्जयेत् मार्जनादौ तु ये दर्भाः पिंडस्थाने विसर्जयेत् उत्थानादौ तु ये दर्भाः दक्षिणांते विसर्जयेत् प्रार्थनादौ तु ये दर्भाः नमस्कारे विसर्जयेत् ऊह
मातृविष्णुः मातामहानामप्येवं श्राद्धं कुर्या[illegible]क्षणः मंत्रोहेन यथान्यायं शेषाणां मंत्रवर्जितं यथान्यायमिति यत्र बहुवचनात् पितृशब्द
स्तत्र सर्वपितृवाचित्वान्नोहः तत्रापि शुंधंतां पितरः इत्यत्रोह एव सर्वपितृवाचित्वे उत्तरमंत्रद्वयवैयर्थ्यात् बहुवचनं तु नाघ्रते प्रकृतावसम
र्थत्वात् साशानितिवत् संगतं चैतन्न ह तस्मादध्वंनोहेदिति निषेधात् एकोद्दिष्टेप्येवं प्रेतैकोद्दिष्टे त्वेकवन्मंत्रान्नूहेनैकोद्दिष्टे इति विष्णूक्तेरूह
अत्र बहुवचनस्याप्यूहावचनात् स्वधादौ तु विशेषं वक्ष्यामः शेषाणामिति पितृव्याद्येकोद्दिष्टे आवाहनादिमंत्रवर्जं कार्यमिति कल्पतरुः ऊह ८
योग्यपितृपदवान्मंत्र एव तत्र न प्रयोज्यः न तूहः नापि पितृपदरहितः प्रयोज्य इति शूलपाणिः अर्थांतरत्वोक्तेः प्राक् बह्वृचकारिकापि अर्घ्यप्र
दानमात्रे तु मात्रादिपदमावपेत् शुंधंतामिति पित्रादौ मात्रादिपदमावपेत् मातृश्राद्धे पिंडदाने ये च स्वामंत्रान्विसृजनोह इति शांतिकृते त
था मातृश्राद्धप्यनूहेन कुर्यात् पिंडानुमंत्रणं स्वादानमुपस्थानं तद्वत्कार्यमिति स्मृतिः प्रवाहणमनूहेनेतद्वत्सारानमिष्यते तथा आर्यंतु नस्तिलोसीति उशंत
स्त्वेति यानि तु अनघः पितरश्चेत्र पितृसामान्यवाचकं आपस्तंबानाहुरस्यते हेमाद्रौ मार्कंडेयः स्नातः स्नातान्समाहूतान् स्वागतेनार्चयेत्पृथक् कलिकायांनार
दीये आयश्चित्तविशुद्धात्मातीयो [illegible] प्रयच्छेत् दद्याद्ब्रह्मदंडार्थं हिरण्यं कुशमेव च तत्रैव संग्रहे तिथिवारादिकं ज्ञात्वा संकल्प्य च यथाविधि प्राचीनावीतिना का
र्यः सर्वः संकल्पनादिकः संबंधं प्रथमं ब्रूयान्नाम गोत्रे तथैव च रूपादिरूपतां वापि स्वपितृणामनुक्रमात् चंद्रोदये नारदीये श्राद्धार्थं समनुप्राप्तान् विप्रान् प्रणिपत्यानि
मंत्रयेत् आपस्तंबस्तु पूर्वेद्युर्निमंत्रणं परेद्युर्द्वितीयतृतीयमामंत्रणमित्याह यूयं मयानिमंत्रणीया इति निवेदनरूपमाद्यं तत्प्रथमाह शौनकः गृहीत्वा मु

कसंज्ञस्यामुकगोत्रस्यवामुके श्राद्धेतुवैश्वदेवार्थेकरणीयःक्षणस्तथा इत्येवंश्राद्धकर्त्ता ब्रूयाद्दीत्तयेत्तिवदेन्नुसः श्राद्धस्यकर्त्तारंसब्रूयात्संप्राप्नोतु(तुसवानिति सवदेत्र
प्रवानीतिइतरस्तंप्रतिद्विजः दैवेपार्वणेपुरूरवार्द्रवौवान्यौ पित्र्यादेरप्यनेनैवरणीतविधिनाद्विजान् ततःकर्त्ताबद्धांचो,नाहिताग्निःपिंडपितृयज्ञपरिस्तर
णादीध्माधानांतंकुर्यात् अर्घाधानिनेग्ध्यवमितिप्रयोगपारिजातेपरिशिष्टेचभाष्यकारमते आन्हिकेप्येवं इतिकाम्मलेनेद हेमाद्रौशांखः संमार्जितोपलि
प्तेतुद्वारिकुर्वीतमंडले उदप्लवमुदीच्यांस्याद्दक्षिणंदक्षिणाप्लवं व्याघ्रः उत्तरे क्षतसंयुक्तान्पूर्वाग्रान्विन्यसेत्कुशान् दक्षिणेदक्षिणाग्रांस्तुसतिलान्
विन्यसेत्कुशान् तत्रैवबौधायनः चतुरस्रंत्रिकोणंचवर्तुलंचार्धचंद्रकं कर्त्तव्यमानुपूर्व्येणब्राह्मणादिषुमंडलं तत्रैवंलौगाक्षिः हस्तद्वयमितंकार्यंवैश्व
देविकमंडलं तद्दक्षिणेचतुर्हस्तंपितृणामंघ्रिशोधने कलिकायांसंग्रहेतु प्रादेशमात्रंदेवानांचतुरस्रंतुमंडलं सत्कापडंगुलंतस्माद्दक्षिणंवर्तुलंतयसुक्तं
यत्तु समसंतरेगर्तेःपंचांगुलाविप्रजानुमात्रोमहीभुजि प्रादेशमात्रोवैश्येस्यसापिकःसतुशूद्रके तिर्यगूर्ध्वप्रमाणेनव्याख्यातोदैवपित्र्ययोः चतुरस्रंव
र्तुलंचकथितंगर्त्तलक्षणं पादप्रक्षालनंप्रोक्तमुपवेश्यासनेद्विजान् तिष्ठंश्चेत्क्षालनंकुर्यान्निराशाःपितरोगताइति तत्समलक्ष्येमंडलाग्रेएथकं ज्ञेयं
तत्रगोमयेहेमाद्रौपृथ्वीचंद्रः अत्यंतजीर्णदेहायानंध्यायाश्चविशेषतः आर्त्तायानवसूतायानगोर्गोमयमाहरेत् मात्स्ये अक्षताभिःसपुष्पाभिस्तदभ्य
र्च्यापसव्यवत् विप्राणांक्षालयेत्पादानभिवंद्यपुनःपुनः प्रसङ्मुखःस्थितःकुर्याद्विप्रपादाभिषेचनं तत्रैवभविष्ये प्रक्षालयेद्विप्रपादान् शंनोदेवीरिति
त्यृचा पृथ्वीचंद्रोदयेषट्त्रिंशन्मते नकुर्यात्पिंडस्यपाद्यंदद्यात्तिलक्षणः कलिकायांसंग्रहे ततःप्रक्षालयेत्पादौभार्यास्त्राविलवारिणा तथा
श्राद्धकालेयदापत्नीवामेनीरंप्रदापयेत् आ[illegible]तिद्भुवेस्थाद्यंपितृणांनोपतिष्ठते तत्रैव नाधःप्रक्षालयेत्पादौकर्त्रीपत्नीपित्रादिकर्मसु पाद्यानंतरमं

र्घ्यमपिदद्यादितिहेमाद्रिः तत्रैवलौगाक्षिः मंडलादुत्तरेदेशेदद्यादाचमनीयकं विधायक्षालनंतेषांद्विराचमनमिष्यते स्वयंचापिद्विराचामेत् विधिवत्श्राद्धयान्वि
तःहेमाद्रौनागरीये यत्राचमवारीणिपादप्रक्षालनानि[illegible] संगछंतेबुधाःश्राद्धमासुरंतत्प्रचक्षते व्यासः सव्येनैवासनंधृत्वादक्षिणेदक्षिणंकरं व्याहृतीभिःसमस्ता
भिरासनेषूपवेशयेत् समाध्वमितिचैवोक्त्वादक्षिणंजानुसंस्पृशन् आस्यतामितितान्ब्रूयादासनंसंस्पृशन्नपि हेमाद्रौशातातपः द्वौदैवेपार्वणेविप्रौप्राङ्
मुखावुपवेशयेत् पित्र्येतदङ्मुखांस्त्रींश्चबह्वृचाध्वर्युसामगान् याज्ञवल्क्यः द्वौदैवेप्राक्त्रयःपित्र्ये उदगेकैकमेवच यत्तु हेमाद्रौहारीतः दक्षिणाग्रदर्भेषुप्रा
ङ्मुखान्ब्राह्मणान्भोजयेदुदङ्मुखान्पित्र्येइति तन्मैत्रायणीयविषयं प्राङ्मुखान्भोजयेद्दुदङ्मुखान्पित्र्येइति तत्सदृशशिष्टात् विकल्प्यइतिहेमाद्रिः मा
धवीयेयमः भिक्षुकोब्रह्मचारीवाभोजनार्थमुपस्थितः उपविष्टेष्वनुप्राप्तः काममत्रभोजयेत् कौर्मे अतिथिर्यस्यनाश्नातिनतच्छ्राद्धंप्रचक्षते विप्र
नियमामाधवीये पवित्रपाणयः सर्वेतेचमौनव्रतान्विताः उच्छिष्टोच्छिष्टसंस्पर्शंवर्जयेयुःपरस्परं तत्रासनानि पृथ्वीचंद्रोदयेयमः आसनंकुतपंदद्यादितर
द्वापवित्रकं हेमाद्रौनरसिंहपुराणे पितृणांचादितैर्हैमंराजतंचापिचासनं येनताम्रमयंदत्तमासनंपितृकर्मणि सर्वेदिव्यासनारूढोनदीप्रव्यवतोदिवः
हेमाद्रौनागरखंडे अयःशंकुमयंपीठंप्रदेयंनोपवेशने कलिकायांसंग्रहे क्षौमंदुकूलंनेपालमाविकंदारुजंतथा तार्णपार्णंवृसीचैवविष्टरादिविन्यसेत्
अग्निदग्धान्यायसानिभग्नानिचविवर्जयेत् हेमाद्रौछागलेयः पश्चाद्भागाग्रपत्रेभ्यस्त्राच्यापंक्तिर्यथाभवेत् दक्षिणासंस्थितास्तावापितृणांश्राद्धकर्मणि पुल
स्त्यः श्रीपर्णीचारुणीक्षीरींजंबूकाम्रकदंबकं सप्तमंवाकुलंपीठंपितृणांदत्तमक्षय्यं संग्रहे शमीचकाश्मरीशल्लुःकदंबोवरणस्तथा पंचासनानिशस्तानिश्रा
द्धेदेवार्चनेतथा कारिका द्वौदैवेप्राङ्मुखौपित्र्येत्रीन्विप्रानुदगाननान् पैठीनसिः कुतपःश्राद्धवेलायांश्रोत्रियोयदिदृश्यते आश्वलायनः नीविंवासो
दशांतेनस्वरसांशप्रबंधयेत् वह्नुपाल्यक्षयःदक्षिणेकटिदेशेतुतिलैःसहकुशत्रयं यत्तु कात्यायनीयं नीवीकार्यादशांगुष्ठतोमकुशोकुशःसहतित

नि॰ त॰ वृद्धिश्राद्धे॰ पितॄणां दक्षिणे पार्श्वे विपरीता तु दैविक इति स्मृत्यंतरात्॰ वामे दक्षिणे वेसा वा वाद्यनरस्थेति मदनपारिजाते आचार्यः॰ प्राणायामत्रयं कृत्वा गायत्रीं स्म
रणं तथा श्राद्धं कर्तास्मीति वदेत् विप्रैर्वाच्यं कुरुष्वेति ब्राह्मे॰ ततस्तिलान् गृहे तस्मिन् विकिरेच्चापदक्षिणं॰ अद्ययापरया युक्तो अपहता इति स्मृत्यर्थसारे अ
पहता इति तिलान् विकीर्य उदीरतामिति तिसृभिश्चाभिप्रोक्षेत् पराशरः॰ तद्विष्णोरिति मंत्रेण गायत्र्या च प्रयत्नतः॰ प्रोक्षयेदन्नजातं तु दृष्ट्यादिशुद्धये॰ हेमा
द्रौ ब्राह्मे॰ श्राद्धभूमौ गयां ध्यात्वा ध्यायेत्॰ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च नमः स्वाहायै स्वधायै नित्यमेव नमो नमः॰ आदिमध्यावसानेषु त्रिरा
वृत्तं जपेद्बुधः॰ पितरः क्षिप्रमायांति राक्षसाः प्रद्रवंति च॰ तिलैर्रक्षांसि सुरान्दर्भै रक्षंति राक्षसान्॰ पंक्तिं वै श्रोत्रियो रक्षेद्दृष्टिमिति॰ सर्वं रक्षते॰ वसिष्ठः॰
रक्षोघ्नीभिः कूष्मांडीभिः पावमानीभिश्च पाकादि प्रोक्षेत्॰ अपदेवार्चा॰ तत्रप्रसुप वाममाद्यंतयोः शेषोपद्यादित्युक्तं स्मृत्यर्थसारे च हेमाद्रौ ब्राह्मे
आसीनेष्वासनं दद्याद्वामे वा दक्षिणेऽपि वा॰ पितृकर्मणि वामे च दैवे दद्यात्तु दक्षिणे प्रचेताः॰ आसनेष्वासनं दद्यान्न तु पाणिना कदाचन॰ धर्मोसीत्यथ
मंत्रेण गृह्णीयुस्ते तु तान्कुशान्॰ धर्मोसि विशिराजा प्रतिष्ठित इति मंत्रः॰ गालवः॰ दक्षिणाद्यहस्ते पात्रे गृहीत्वा दक्षिणे करे देवक्षणः क्रियतामिति
संगुष्ठं करे ततः॰ ॐ तथेति द्विजा ब्रूयुस्ते प्राप्नोतु भवानिति कर्ता ब्रूयात्ततो विप्रः प्राप्नवानीति वै वदेत्॰ पृथ्वीचंद्रोदये वहन्नासदीये ये वै देवाश्च
विश्वेषां देवानामिदमासनं दत्त्वेति स्मृत्योद्याद्दैवे क्षण इति क्षणे तच्च षष्ठ्या चतुर्थ्या वा कार्यमिति सर्वत्र॰ ततोऽर्घ्यं कल्पयेदिति मन्वादयः॰ शौन
कजयंताभ्यामर्घ्यरहितस्य देवार्चनस्योक्तेराश्वलायनानां दैवार्घ्यदानं नेति बोपदेवः॰ तन्न॰ परिशिष्टे प्रयोगपारिजातविरोधात्॰ वृद्धिश्रा शिव॰
द्धे तु देवेष्वर्घ्यं चेद्दद्यात् देवेभ्योऽपि पृथक् दद्या[illegible]र्घ्यं श्रुतिचोदनादिति शौनकोक्तेः॰ अथार्घ्यपात्रं पृथ्वीचंद्रोदये [illegible]यपात्रमये॰ पात्रं वनस्प

तिमयं तथा पर्णमयं पुनः॰ जलजं वापि कुर्वीत तथा सागरसंभवं ब्राह्मे॰ सौवर्णं ताम्रं रौप्यं वा स्फाटिकं शंखशुक्तयः॰ भिन्नान्यपि हि योज्यानि पात्राणि पितृकर्मणि॰ हेमा
द्रौ प्रजापतिः॰ सौवर्णं राजतं ताम्रं खड्गं मणिमयं तथा [illegible]यं चमसं वापि अर्घ्यार्थं पूरयेद्बुधः॰ अत्र विप्रैकत्वे द्विदलं चतुष्वादावप्यर्घ्यपात्रे द्वे एव॰ मानवमते तु द्वे वैश्वदेवि
के त्रीणि पित्र्ये एकैकमुभयत्रेत्युक्तेः॰ तदेकविप्रपरं पात्रालाभपरं वेति हेमाद्रिः॰ मदनरत्ने तु दैवे एकपात्रमुक्तं॰ पृथ्वीचंद्रोदयेऽपि त्रीणि पैतृकपात्राणि द्वे दैवे वैश्वदेविक
इति वृत्तसराबरोक्तेः॰ बहूनां तु दैवे विप्राद्विष्वेवमर्घ्यपात्रमर्घ्यशोदद्यादित्युक्तं परिशिष्टे॰ प्रयोगपारिजाते च कलिकायां हारीतः॰ दत्तमक्षय्यतां याति खड्
गेनार्घ्यं तु यत्कृतं॰ वृद्धमनुः॰ मृन्मयं दारुजं पात्रमयःपात्रं च यद्भवेत्॰ राजतं दैविके कार्ये शिलापात्रं च वर्जयेत्॰ पुराणसमुच्चये॰ मृत्तिकाभवं तथा कांस्यं मारकं जं तु सं
भवं त्रपुसीसलोहभवं दारुपात्रं विवर्जयेत्॰ तत्रैव अष्टांगुलं भवेत्पात्रं पितॄणां राजतं शुभं दशांगुलं तु देवानां सौवर्णं शक्तितः कृतं॰ स्थापयेदर्घ्यपात्रे द्वे न्युब्जे तत्र कुशो
परि द्वे पवित्रे विधिवत् पात्रपार्श्वोपरि क्षिपेत्॰ यद्दृपार्श्वे॰ पवित्रे स्थ इति मंत्रेण पवित्रे छेदयेत्तु ते॰ ओषधीमंतरे कृत्वा अंगुष्ठांगुलिपर्वणोः॰ स्फ्यनकाष्ठे तलेऽन्नमे
नायनरवादिभिः॰ वसिष्ठः॰ कुर्वीत प्राग्दिश्यां समापात्रं कुर्यादूर्ध्वबिलं ततः॰ पूरयेत्पात्रयुग्मं तु कृत्वा परि पवित्रके॰ वृद्धपराशरः॰ पात्रद्वयमथार्घ्यार्थे तैजसं चैकवस्तुतः॰ प्रा
द्गुरवाम्रतीर्थेन अन्नोदव्याद्दर्भं क्षिपेत्॰ यवोऽसीति यवांस्तत्र गंधान् पुष्पाणि चंदनं मानवं सत्रे सुमनसः प्रक्षिप्यो सूयवान् प्रक्षिपेदिति॰ यवोऽसीति मंत्रः पात्र
यवोऽसि धान्यराजोऽसि वारुणो मधुसंयुतः॰ निर्णोदः सर्वपापानां पवित्रमृषिभिः स्मृतं॰ राजो वा वारुणो मधुमिश्रित इति परिशिष्टे पाठः॰ गोभिलेन तु॰ यवोऽसि सो
मदेवत्य इति तिलमंत्रोऽत्र स्वाहा पृथक् उक्तः॰ हेमाद्रौ यमः॰ यवकुसुमोत्तालिन् देवान् विज्ञाप्यावाहनं प्रति॰ आवाहयेदनुज्ञातो विश्वेदेवास इत्यृचा॰ वृद्धपराशरः॰ ततः स
व्यकरं न्यस्य विप्रदक्षिणजानुनि॰ देवानावाहयिष्ये हमिति वाचमुदीरयेत्॰ आवाहयस्वेत्यनुज्ञातो विश्वेदेवास आगत विश्वेदेवाः शृणुतेममिति मंत्रद्वयं पठे
त्॰ श्राद्धविशेषविश्वेदेवानां नामान्याह हेमाद्रौ बृहस्पतिः॰ उत्पत्तिं नाम चैतेषां न विदुर्ये द्विजातयः॰ अयमुच्चारणीयस्तैर्मंत्रः श्रद्धासमन्वितैः॰ आगच्छंतु महा
भागा विश्वेदेवा महाबलाः॰ ये अत्र विहिताः श्राद्धे सावधाना भवंतु ते॰ इदं चावाहनमर्घ्यपात्रासादनात्प्राक् हेमाद्रिणोक्तं॰ तत्र कातीये॰ प्राक् कार्यं तथैवेत

निर्ण॰ तृ॰

तत्रात्‌: अन्येत्तदुत्तरं पृथ्वीचंद्रोदयेशंखः स्वयंपुष्पमादाय चरणादिशिरोंतकं अर्चयेत्स्वयं नंकुर्यादंतरेचोदकं तथा पिब्येत्स्वर्घ्यादिपादांतं पादप्रभृतिमर्घ्यांतं देवेविकेप्र
जनंभवेत्‌ शिरःप्रभृतिपादांतं नमोवइतिपैतृके इतिमदनरत्नेप्रचेतसोक्तेः कलिकायांसंग्रहे तिष्ठन्कृतांजलिर्भूत्वापठेन्मंत्रोसमाहितः विश्वेदेवा शृणुतेमागद्भव
परंतमः हेमाद्रौजातूकर्ण्यः ततोर्घ्यपात्रसंपत्तिंवाचयित्वाद्विजोत्तमान्‌ तदग्रेचार्घ्यपात्रंतु स्वाहार्घ्या इतिविन्यसेत्‌ गार्ग्यः दत्त्वाहस्तेपवित्रंच कृत्वापूजां चपादतः
यादिव्याइतिमंत्रेणहस्तेष्वर्घ्यं विनिक्षिपेत्‌ संग्रहे विश्वेदेवाइदंवोर्घ्यमितिदानंसमादिशेत्‌ तदंते स्वाहानमइतिवाच्यं यादिव्याइतिमंत्रेण स्वाहाकारनमोंत
कमिद्धंति हेमाद्रौनागरखंडात्‌ आथर्वणस्तत्रतुपाद्यमर्घ्यमाचमनीयमितिद्विजकरेनिनयेद्विसृष्टस्येवत्रयमुक्तं गोभिलस्तु: अर्घ्येपिंडप्रदानंच स्वस्वस्यक्षय्यतये
वच गंधपुष्पादिकंसर्वं हस्तेनैवनतुदापयेत्‌ । प्रतिविप्रं यादिव्येत्याचष्टे: बहूनांत्वनेन दत्ताऽर्घ्यानुमंत्रणं ततः पात्रंदक्षिणेदेशे स्थानमसीति [illegible] त्तानं
वाकार्यमितिगारुडेउक्तं एतदापस्तंबानांनियतमन्येषांतु हेमाद्रौविष्णुधर्मे गंधपुष्पैश्चधूपैश्चवस्त्रैश्चाप्यथतर्पणैः अन्नेयद्ब्राह्मणान्शक्त्या श्रद्दधानः
समाहितः पृथ्वीचंद्रोदयेमार्कंडेयः चंदनागुरुकर्पूरकुंकुमानिप्रदापयेत्‌ विष्णुः चंदनकुंकुमकर्पूरागरुपद्मकान्यनुलेपनार्थेति व्यासः अपवित्रकरोगं
धैर्गंधद्वारेतिपूजयेत्‌ कालिकायांस्मृतिः गंधद्वारेति वैगंधमायनेतेचपुष्पकं धूरसीत्यमुनाधूपमुद्दीप्यस्वेतिदीपकं युवंवस्त्राणिमंत्रेण वस्त्रंदद्यात्प्रयत्न
तः आसनेस्वासनंब्रूयादर्घ्येस्वर्घ्योद्विजोत्तमः स्रग्गंधाश्चसुपुष्पाणिसुमाल्यानिसुधूपकः सुज्योतिश्चैवदीपेतुस्वाच्छादनमितिक्रमः विप्राणांगंधेनवर्ज्यं
ळं त्रिपुंड्रंवानकार्यं हेमाद्रौदेवलः ललाटेपुंड्रकंदृष्ट्वास्कंधेमालांतथैवच निराशाः पितरोयांति दृष्ट्वाचवृषलीपतिं पुंड्रंवर्तुलमित्यपरार्के मदनरत्नेच पुंड्रंत्रि
पुंड्रंवर्तुलमर्धचंद्रंवा ऊर्ध्वंचातिलकंकुर्यान्नकुर्याद्वैत्रिपुंड्रकं ऊर्ध्वंचातिलकंकुर्याद्दैवेपित्र्येचकर्मणि निराशाः पितरोयांतिदृष्ट्वाचैवत्रिपुंड्रकं इतिवृद्धपरा
शरोक्तेः तिर्यग्लेपोभवेत्सेव वर्जयेत्तिलकंभाले [illegible]कालेचसर्वदा तिर्यगप्यूर्ध्वपुंड्रंवाधारयेत्तुप्रयत्नतः इतिव्यासोक्तेरितिपृथ्वीचंद्रः यत्तु चंद्रन्याय शिव
दीये ऊर्ध्वपुंड्रंचतुलसींजाद्रुनैव[illegible]तिकेचनेति ॰कर्तृपरं हेमाद्रौब्राह्मे पूतिकंमृगनाभिंचरोचनारक्तचंदनं कालेयकंतुग्रगंधं तुरुष्कंचापिवर्जये

येत्‌ कस्तूर्याविकल्पइतिहेमाद्रिः वृद्धशातातपः पवित्रंतुकरेकृत्वायः समालभतेद्विजान्‌ राक्षसानांभवेछ्राद्धंनिराशैः पितृभिर्गतैः पुष्पंतुब्राह्मे जातींचं
पकंलोध्रंश्चमल्लिकांवाणबर्बरीं चूताशोकाटरूषंचतुलसींशतपत्रकं कुंकुमंतगरंचैव भृंगमारण्यकेतकीं यूथिकामतिमुक्तंचश्राद्धयोग्यानिमाद्विज
कमलंकुमुदंपद्मंपुंडरीकंचपत्नतः इंदीवरंकोकनदंकल्हारंचनिवेदयेत्‌ हेमाद्रौवायुभविष्ययोः सुकुमारैः किसलयैर्यवदूर्वांकुरैरपि संपूजनीयाः पित
रःश्रेयःकामेनसर्वदा स्कांदे जातिश्चसर्वदातव्यामल्लिकाश्वेतयूथिका जलोद्भवानिसर्वाणिकुसुमानिचचंपकं तत्रैववृद्धमनुः ननियुक्तः शिरस्यावर्ज्यमाल्यं शिरसिधा
रयेत्‌ वर्ज्यानिपृथ्वीचंद्रोदयेभविष्ये केतकीतुलसीपत्रंबिल्वपत्रंचवर्जयेत्‌ द्रोणंचकरवीरंचधुत्तूरंकिंशुकंतथा माधवीयेस्मृत्यर्थसारेतुतुलसीनिषिद्धा तुल
सीनिषेधोनिर्मूलइतिहेमाद्रिः पिंडपद्र: तुलसीगंधमाघ्रायपितरस्तुष्टमानसाः प्रयांतिगरुडारूढास्तत्पदंचक्रपाणिनइतिप्रयोगपारिजातेपाद्मोक्तेरितिबाप
देवः वृद्धपाराः नजातीकुसुमैर्विद्वान्बिल्वपत्रैश्चनार्चयेत्‌ अपादिकुसुमंझिंटीरूपिकासकुरंटिका पुष्पाणिवर्जनीयानिश्राद्धकर्मणिनित्यशः हेमाद्रौशंखः
उग्रगंधीन्यगंधीनिचैत्यवृक्षोद्भवानिच पुष्पाणिवर्जनीयानिरक्तवर्णानियानिच जलोद्भवानिदेयानिरक्तान्यपिविशेषतः अंगिराः नजातीकुसुमानिदद्या
न्नकदलीपत्रमिति जात्याविकल्पइतिहेमाद्रिः निषेधःपिंडविषयः कुंदशोभांजनोद्धाणोनमत्तंगः रुद्धजे पिंडजातींचनोदद्याद्देवीमेकांपनार्चयेदितिवृद्ध
याज्ञवल्क्योक्तेरितिबापदेवः स्मृतिसारे आगस्त्यंभृंगराजंचतुलसींशतपत्रिकां चंपकंतिलपुष्पंचषडेतेपितृवल्लभाः केतकीकरवीरंचबकुलंकुंद
कंतथा पाटलांचैवजातींचश्राद्धेयत्नेनवर्जयेत्‌ केचित्पिंडेपितुलसीमाहुः पितृपिंडार्चनंश्राद्धेयैःकृतंतुलसीदलैः प्रीणिताःपितरस्तेनयावच्चंद्रार्कमेदि
नीतिमार्कंडेयोक्तेः धूपस्तत्रैवविष्णुधर्मे धूपस्तुगुग्गुलुर्देयस्तथाचंदनसारजः अगरुश्चसकर्पूरस्तुरुष्कस्त्वक्तथैवच विष्णुः घृतमधुयुक्तंगुग्गुलंश्रीखं
डदेवदारुसरलादिदद्यादिति तत्रैवदेवलः येहिप्राण्यंगजाधूपाहस्तवातहताश्चये नतेश्राद्धेनियोक्तव्या येचकेचोग्रगंधयः घृतेनकेवलंदद्यात्तुष्टवातृणगुग्गुलं
दीपमाहविष्णुः घृतेनदीपोदातव्यस्तिलतैलेनवापुनः वसामेदोद्भवंदीपंप्रयत्नेनविवर्जयेत्‌ वस्त्रंब्राह्मे कौशेयंक्षौममकार्पासंदुकूलमहतंतथा श्राद्धे

नि॰ सं॰ घृतानि पयो दद्यात्कर्माना भोगितो यौवनोन्मादान् हैमाद्रौ ब्रह्मवैवर्ते यज्ञोपवीतं दातव्यं वस्त्राभावे विजानता पितॄणां वस्त्रदानस्य फलं तेनाप्नुते फलं ख्यं॰ तत्रैव पाद्मे निष्क्र
यो वा यथाशक्ति वस्त्राभं विप्रदीयेते अन्यान्यपि द्रव्याणि तत्रैव कालिकापुराणे॰ धात्वादिनिर्मितानारव्यादीपिकाः श्राद्धकर्मणि पितॄन् दिव्यपादद्या त्सर्वे दुःख
नं श्रियः यो भ्रमदानमार्गं च पात्रमारार्तिकस्य च दद्यात्सिन्तस्य प्रयत्नतस्तस्य स्वर्गोऽक्षय्यो भवति॰ विष्णुधर्मे यः कंचुकं नयो दध्यपि पितॄणां प्रतिपादयेत् ज्वरो दुःखा
नि दुःखानि स कदाचिन्न पश्यति॰ त्रीणि श्राद्धे तु संभरेत् दद्युः श्रावितकानि च॰ निमंत्रिताश्च पञ्चत्रीण्येषा ये तेस्यु सौभाग्यसंयुताः हेमाद्रौ वायवीयपुराणे॰ न कृष्ण
वर्णं दातव्यं नापि कार्पासं संभवं पितॄणां नापि मलिनं नोपभुक्तं कदाचन॰ नाच्छिद्रिमं नाप्यदशां न धौतं कारुणापि च॰ कार्पासानि च धौत्यन्य संभव तत्रैव॰ पितॄन् सत्कृत्य वा
सोभिर्दद्याद्यज्ञोपवीतकं॰ यज्ञोपवीतदानेन विनाश्राद्धं तु निष्फलं एतद्यतिस्त्रीशूद्रश्राद्धेष्वपि देयमिति हेमाद्रिः॰ तत्रैव नृसिंहपुराणे कमंडलुं ताम्रमयं श्रा
द्धेषु प्रददाति यः काष्ठेनाथ निर्मितं वापि नारिकेलमथापि वा दद्यात्कमंडलुं श्राद्धे स श्रीमान्नभिजायते योमृत्तिकाविरचितान् श्राद्धेषु च घटान् शुभान्
का प्रदद्यात्करका वापि सोक्षयं विंदते सुखं तत्रैव उपानच्छत्रवस्त्राणि भुक्तिपात्रं कमंडलुं शयनासनयानानि दर्पणाव्यजनानि च अन्नं संस्कृत गंधाश्च ताम्बूले
दीपचामरे॰ पितॄणां च प्रयच्छेत्तु विष्णुलोकं स गच्छति सौरपुराणे॰ चामरं तालवृन्तं च श्वेतछत्रं च दर्पणं दत्वा पितॄणामेतानि भूमिपालो भवेद्दिवि॰ तत्रैव नंदिपु
राणे अलंकाराः प्रदातव्या यथाशक्ति हिरण्मयाः केयूरहारकटकमुद्रिकाकुंडलादयः स्त्रीश्राद्धेषु प्रदेयास्युरलंकारास्तु योषितां मंजीरमेखलादामकर्णि
काकंकणादयः तथा॰ आदर्शव्यजनछत्रशयवासनपादुकाः मनोज्ञाः पटवासाश्च सुगंधाश्चूर्णमुष्टयः अंगारधानिकाः श्चेति योगपट्टाश्च यष्टयः॰
कटिसूत्राणि रौप्याणि मेखलाश्चैव कंबलाः कर्पूरादेश्च भांडानि तांबूलायतनानि च भोजनाधारपात्राणि पतद्ग्राहास्तथैव च तथांजनशलाकाश्च के शिव॰
शानां च प्रसाधनं एतान् दद्यात्तु यः सम्यक् सो[illegible]धफलं लभेत् स्कांदे॰ सौवर्णं राजतं वापि कांस्येनाप्यथ निर्मितं दत्वा भोजनपात्रं तु सम्राड् भवति
भूतले वामनपुराणे वंदितकास्तु ये केचित् स्[illegible]वा यदि वा परैः येन केनाप्युपायेन यस्तान्मोचयते नरः पितरस्तस्य गच्छंति शाश्वतं परमं व्ययं॰

पराशरः वाचयेत्परिपूर्णं स्वंवासो द[illegible]विधानतः माध[illegible]ये॰ देवैश्च समनुज्ञातो यजेत्पितृगणं तथा तत्र पित्र्ये॰ आसनाद्यशेषमर्चनं कांडे वैश्वदेविकं ज्ञेयं विशेषस्तू
च्यते॰ तत्रासने द्विगुणभुग्नाः कुशाः अत्रावाहनं [illegible]नासूर्वं वा अर्घ्यपूरणोत्तरं वाग्नौकरणोत्तरं वेति स्मृतिषु पक्षा उक्ताः एषां शाखाभेदेन व्यवस्था॰ द्विती
यपक्ष एव बहुसंमतः तत्रार्घ्ये माहाश्वलायनः तैजसाश्ममयमृन्मयेषु त्रिषु पात्रेषु एकद्रव्येषु वा हृदर्भानंतर्धाय तेष्वप शंनो देवीरित्यनुमंत्र्य तिलानाव
पति तिलोसि सोमदेवत्यो गोसवो देवनिर्मितः प्रत्नवद्भिः प्रत्तः स्वधया पितॄन्मां ल्लोकान्प्रीणयाहि नः स्वधा नम इति अश्ममयं स्फाटिकादि मृन्मयं
हस्तकृतमेव च कुलालचक्रनिष्पन्नमासुरं दैविकं न तत्तत् तदेव हस्तघटितं दैविकं केवलं तथेति छंदोगपरिशिष्टात् अन्यान्यपि पात्राणि पूर्वमु
क्तानि मनुः अन्नाभावे द्विजाभावे यद्येको ब्राह्मणो भवेत् पात्राण्यासादयेत्त्रीणि न तु ब्राह्मणसंख्यया॰ दत्तकादेः कर्तुर्द्विपितृत्वादावपि वचना
त्त्रीण्येव पात्राणीति हरिहरः माधवीये तु जवापः अर्घ्ये पितॄणां त्रीण्येव कुर्यात्पात्राणि धर्मवित् एकस्मिन्वा बहुषु वा ब्राह्मणेषु यथाविधि हेमा
द्रावप्येवं अत्रानुमंत्रणं सकृत् तिलोसीत्यस्य प्रतिपात्रमावृत्तिः पितृशब्दस्यान् ह्रस्वेति शांतिकारः दर्भैश्च त्रिगुणं पवित्रं तिस्रस्तिस्रः शलाकाः
कार्याः पितृपात्रेषु पार्वणे एकोद्दिष्टे शलाकैकानिधायोदकमाहरेदिति हेमाद्रौ चतुर्विंशतिमतात्॰ तत्रैव विष्णुः दक्षिणाग्रदर्भेषु दक्षिणापवर्गे
च मेसेषु पवित्रांतर्हितेष्वप आसिंचेत् शंनो देवीरिति मंत्रेण जलासेचनं बह्वृचभिन्नविषयं अस्मिन्पक्षे प्रतिपात्रं मंत्रावृत्तिः कारिकायां गंध
पुष्पाणि चैतेषु पात्रेषु प्रक्षिपेद्यः श्राद्धे॰ जलं क्षीरं दधि घृतं तिलतंडुलसर्षपान् कुशाग्रगंधपुष्पाणि दद्यात्ताम्रमतः स्वयं ज्ञातृकर्ये॰ त
तोर्घ्यपात्रसंपत्तिं वाचयित्वा द्विजोत्तमान् तदग्रे चार्घ्यपात्राणि स्वधार्घ्या इति विन्यसेत् ततस्तिलहस्तो विप्रसव्यजानो दक्षिणाकर्त्रन्य
स्यावाहनं पठेत् अत्र गोत्रसंबंधनामानि द्वितीयांतसंज्ञं च प्रागुक्तं वैजवापगृह्ये॰ तिष्ठन् पितॄन्नावाहयिष्यामीत्यामंत्र्य॰ कोनेः

अपसव्यंततः कृत्वापितॄणांदक्षिणामुखः आवाहनंततः कुर्याद्दुशंतस्त्वेत्यृचाबुधः आवाह्यतदनुज्ञातो जपेदायंतुनस्ततः अत्रसव्यस्यापिप्राप्तुक्तेर्विकल्पः अत्राद्यमंत्रा
दस्मास्मत्सितस्ममुकशर्माणममुकगोत्रंवसुरूपमावाहयामीत्यावाह्यकामदृष्योदिपादांतं तिलान्विकीर्यायंतुनइतिसर्वांतेसकृज्जपेदितिनिबंधाः अत्रोपवेशन
संवेशनपाद्यार्घ्यान्यचमनगंधीयान्यपिहेमाद्रिणोक्तानि तान्यथर्ववेदिनांनियातानिनान्येषां तेषांचप्रपितामहादिपित्रंतंप्रातिलोम्येनसर्वप्रयोगः वाराहे गं
धपुष्पार्चनंकृत्वादद्यादूर्मोतिलोदकं गार्ग्ये। शिरस्तःपादतोवापिसम्यगर्घ्यंचर्चयेत्ततः ततःस्वधार्घ्यइति पितृपितामहादिविप्राग्रेप्रत्येकंनिवेदयेदितिका
रिकायांवृत्तौच आश्वलायनः प्रसव्येनेतरपाण्यंगुष्ठांतरेणोपवीतित्वाद्दक्षिणेनवासव्योपगृह्यतेनपितरिदंतेर्घ्यं पितामहेदंतेर्घ्यं प्रपितामहेदंतेर्घ्यमित्य
पूर्वेता प्रतिग्राहयिष्यन्सकृत्सकृत्स्वधार्घ्यइति प्रदत्वातिस्त्वनुसृष्टास्त्वनुमंत्रयीत यादिव्याआपः पृथिविसंबभूवुर्या अंतरिक्ष्याउतपार्थिवीर्याः हिरणवर्णा
यज्ञियास्तानआपःशंस्योनाभिवंतिति अर्घ्यादिप्रागगंधादेर्यज्ञोपवीतमेव अर्घ्यदानास्रागन्या अपोदद्यात् यद्यप्यत्रसव्येन दक्षिणेनवार्घ्यंदद्यादि
युक्तं तथापिदक्षिणेनेत्यभिमतेर्थे कारिकायांवृत्तौचैवं पित्रादेस्त्रिभिःपात्रैर्दद्यात् पितुस्स्थानेविप्रत्रयेचेदेकार्घ्यंविभज्यदद्यात् त्रयाणांस्वधार्घ्यइति
सकृत्सकृत् एवंपैतामहादावपि जलदानमर्घ्यमंत्रश्चप्रतिविप्रमावर्तते तेषुगंधादेश्चप्रतिविप्रंपदार्थानुसमयः कांडानुसमयोवा पित्रादित्रया
णामेकविप्रपक्षेत्रिभिःपात्रैरेकस्यैवार्घ्यंदद्यादितिवृत्तिः कारिकापि स्वधार्घ्यइत्यपोर्घ्यास्ता उपवीतीनिवेदयेत् निवेदनास्साकप्राचीनावीतमेव
सर्वं अर्घ्यसशेषमादाय दक्षिणेनतुपाणिना सव्यहस्तगृहीतेननिनयेत्सितृतीर्थतः दत्वादत्वानिनीतास्ता यादिव्यचानुमंत्रयेत् यत्तु यादिव्याइतिमं
त्रेणहस्तेष्वर्घ्यंविनिक्षिपेत्इति यच्चवाराहे तिलांबुनाचापसव्यंदद्यादर्घ्यादिकंद्विजइति यच्चव्यासः गोत्रसंबंधनामानिपितॄणामनुकीर्तयेत् ए
केकस्यांतुविप्रस्य अर्घ्यपात्रंविनिक्षिपेदिति तद्बह्वृचातिरिक्तविषयं ततआचामेत् एवंमातामहादिष्वपि आश्वलायनः संस्रवान्समवनीय

ताभिरद्भिःपुत्रकामोमुखमनक्ति संस्रवःशेषः संस्रवद्विपरिशिष्टोभवतीतिशतपथश्रुतेः केचित्तुहस्तगलितांबुवदंति तन्न समवनीयांस्तेद्वेपात्रेपितृपात्रेआ
सिच्येतिवृत्तेः प्रथमेपात्रेसंस्रवान्समवनीयेतिकात्यायनसूत्राच्च ब्राह्मतुप्रतिबिंबंमुखेलोकनमुक्तं स्कांदेत्वायुःकामस्यैतत्पासेचनमुक्तं पित्र्यविप्रे प्राड्मुखस्य
कर्तुरभिषेकः कार्यइतिकेचित् आश्वलायनः नोद्धरेत्प्रथमंपात्रंपितॄणामर्घ्यपातितं आवृतास्तत्रतिष्ठंतिपितरः शौनकोब्रवीत् यावद्विप्रविसर्जनमिति
तुर्यपादेयमीयःपाठः अत्रवृत्तिः पितृपात्रसमवनयनदेशान्नचालयेदाश्राद्धसमाप्तेः यस्मात्तत्रतृतीयपात्रेणावृताइति यद्वा प्रथमपात्रमेवन्युब्जि
तंकुर्यादितिकामात्मतावेपीदमेवशेषप्रतिपादनं हेमाद्रौकौर्मे संस्रवांश्चततःसर्वान्पात्रेकुर्यात्समाहितः पितृभ्यःस्थानमसीतिन्युब्जपात्रंनिधापयेत्
शूलपाणौयमस्तु पैतृकंप्रथमपात्रंतस्मिन्पैतामहंन्यसेत् प्रपितामहंततोन्यस्यनोद्धरेन्नचचालयेदिसाह संस्रवानानीयतृतीयेनछादयन्न्युब्जंकुर्यादि
तिसैवैकवाक्यतार्थइतिकेचित् अत्रिः गंधादिभिस्तदभ्यर्च्यततीयेनापिधापयेत् पितृभ्यःस्थानमसीतिशुचौदेशेचितेर्चयेत् अर्चनंन्युब्जीकृतेपितृत्वं न्युब्जमूजर
तोन्यमदितिप्रचेतसोक्तेः सर्वविप्रान्तरतोन्यसेदितिहेमाद्रिकल्पतरू विप्रवामेइतिहलायुधः कर्तुर्वामेइतिशूलपाणिः उत्तानंविहितंवापिपितृपात्रंनतद्भवेत्स्व
शनसोक्तेर्न्युब्जीकृतेवसाधुः मातामहादिसंस्रवानपिपितृपात्रएवगृह्णीतप्रयोगपरिजातेपात्रपात्रांतरेणापिन्युब्जीकुर्यादितिशूलपाणिः एकोद्दिष्टेतूत्तानंन्युब्जीकृतेतिपितृभक्तोश्री
दत्तः यमोपि स्पष्टमुत्तानमन्यत्रनीतमुद्धारितंतथा पात्रंदृष्ट्वाप्रजंत्याशुपितरस्तत्रयंतिच वैश्वदेवेउत्तानमितिमदनपारिजातः वैजवापः तस्योपरिकुशान्
दत्वाप्रदद्याद्दीपपूर्वकं गंधपुष्पाणिधूपंचदीपवस्त्रोपवीतकं अत्रगंधादेर्देवेपित्र्येचपदार्थानुसमयस्ययाज्ञवल्क्योक्तेःकांडानुसमयेनविकल्पोज्ञेयः बह्वृचानां
तुकर्तृदीपानुक्तेःकांडानुसमयएव अत्रप्राचीनावीतनामगोत्रसंबुध्यायुक्तंप्राक् अन्यद्देववत् तदंतेआचमनंचहेमाद्रौकालिकापुराणे निर्वर्त्यब्राह्मणादेशा
क्रियामेवंयथाविधि मालनानिततोदद्याद्धृतशौचंपुनःक्रमात् आदेशात्सात्त्विकादाद्याद्वित्यन्वयः तेनशैतत्रप्रश्नानुज्ञेये तत्रैववाराहे मंडलानिचका

र्णी॰ दृ॰

र्पणिनैवारेश्चूर्णकेः शुभैः गोमूत्रेक्रियावापि सस्मनागोमयेन च भस्मः भस्मना वारिणा वापि कास्येन मंडलं ततः चतुःकोणं द्विजाग्रस्य त्रिकोणं क्षत्रियस्य तु मं
डलाकृति वैश्यस्य शूद्रस्याभ्युक्षणं स्मृतं बह्वृचपरिशिष्टे तु दैवे चतुरस्रं पित्र्ये वृत्तं मंडलं कृत्वा क्रमेपास यवान्स तिलांश्च दर्शनं दद्यादित्युक्तं मार्कंडेयः यातुधानाः पि
शाचाश्च क्रूराये चैव राक्षसाः हरंति रसमन्नस्य मंडलेन विवर्जितं हेमाद्रौ हारीतः भूमावेव निदध्यान्नोपरिपात्राणीति तन्निषेधे हेमाद्रावत्रिराह भोजने हेमरौ
प्याणि दैवे पित्र्ये यथाक्रमं हारीतः राजतपार्णताम्रकांस्यपात्राणि भोजने इति तत्रैव वायवे सौवर्णानि दूरोप्याणि कास्यानि तदसंभवे अन्यान्यपि हि कार्याणि द्रा
रुजान्यपि जानता नायसान्यपि कार्याणि पैत्तलानि नतु क्वचित् नचसीसमयानीह शस्यंते त्रपुजान्यपि अत्रिः पंचाशत्पलिकं कांस्यं ह्यधिकं भोजनाय वै गृह
स्थे तु सदा कार्यं भसावे हेमरौप्ययोः पालाशेभ्यो विना न स्युः पर्णपात्राणि भोजने पृथ्वीचंद्रस्तु कांस्यपात्रे हविर्दद्याच्चिराशाः पितरो गता इति ब्रह्मोक्तेः कांस्यपा
त्रनिषेधमाह बोपदेवस्तु स्मृतिसंग्रह सुदाजधिहारः श्राद्धे पलाशपात्राणि मधुकोदुंबराणि च पारिकाकुटकप्लक्षकाकचानि क्रमाज्जगुः कदलीचूतपनस
जंबूपुन्नागचंपकाः अलाभे मुख्यपात्राणां ग्राह्यास्तु पितृकर्मणीति हेमाद्रौ तु कदलीपत्रनिषेधमाह गिराः न जातीकुसुमानि दद्यान्न कदलीपत्रमिति स्मृतः अस्क
राणां कुले जातास्तंसापूर्वेषयिग्रहे तस्याः दर्शनमात्रेण निराशाः पितरो गताः एवं पात्राण्यासाद्य भस्मना मर्यादां कृत्वा विप्रहस्तशोधनं कुर्यात् पिशंगरसाणो इति मंत्रद्वयं के
चित्पठंति मात्स्ये अकृत्वा भस्मर्यादां यः कुर्याद्धस्तशोधनं आसुरं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठते तत्रैव ब्रह्मांडे प्रक्षाल्य हस्तपात्रादि पश्चाद्दद्याद्विधानतः प्रक्षाल
नजलं दर्भैः सलिलैर्मिश्रं क्षिपेद्बुधो मंडलोपरीति हेमाद्रिः अथाग्नौकरणं हेमाद्रौ मार्कंडेयः आहिताग्निस्तु जुहुयाद्दक्षिणाग्नौ समाहितः अनाहिताग्निश्चौपसदे अग्न्य
भावे द्विजे प्सु वा वामवीये आहृसदक्षिणाग्नौ तु होमार्थं वै प्रयत्नतः अग्न्यर्थं लौकिकं वापि जुहुयात्कर्मसिद्धये आहिताग्निः सर्वाधानी अर्धाधानी तु गृह्येवेति राम
चंद्रिकापरार्कमिताक्षरामाधवादयः तस्यापि दक्षिणाग्नौ लौकिके वा गृह्य इति हेमाद्रिः कल्पतरुश्च आद्यपक्ष एव तद्युक्तः बहुसम्मतत्वाच्च यद्यपि स्मार्तमग्नौकरणं
श्रौते दक्षिणाग्नौ न युक्तं तथापि वचनाद्भवतीति हेमा[illegible] चंद्रिकादयः इदं दर्शश्राद्ध एव आब्दिकादिषु सर्वाधानी पाणौ अर्धाधानी गृह्ये कुर्यादिति हेमा

द्रिमाधवश्च पक्षांतकर्मनिर्वर्त्य वैश्वदेवं च सान्निकः आहिताग्निरुक्तो हेमाद्रिणा एतदापस्तंबादीनामेव आश्वलायनस्य त्वाहिताग्नेः पाणावेवेति हरिः अर्धाधानि
नः गृह्ये एव व्यतिषंगेणेति प्रयोगपारिजाते परिशिष्टे बोपदेवस्त्वाह होमशब्दः पिंडपितृयज्ञपरः पितृयज्ञं तु जुहुयात् दक्षिणाग्नौ समाहितः औदुंबरौपासना
ग्नौ तु निरग्निर्लौकिके नले अनग्निर्हस्तार्ये अपार्वणे समुपस्थिते संधायाग्निं ततः कुर्याद्धोमानग्निं समुत्सृजेदिति त्रिकांडमंडनोक्तेः श्राद्धे गृह्याग्नावेवेति लौ
किकाग्न्यादिविधानं चैतेन्निरग्न्यादिविषयं बह्वृचस्य त्वनग्नेरपि पाणिहोम एव अग्निपाणी विना सूत्रे विधांतरानुक्तेः अन्नप्रमाने तु विप्रस्य पाणावेवोपपाद्ये
दिति मन्क्तेश्च हेत्वावेवं कृतिसाग्नेरपि पाणिहोम उक्तो गृह्यपरिशिष्टे आन्वष्टक्यं च पूर्वेद्युर्मासि मास्यथ पार्वणं काम्यमभ्युदयेष्टम्यामेकोद्दिष्टमथाष्टमं च
तुर्थं चापि साग्नीनां वह्नौ होमो विधीयते पित्र्यब्राह्मणहस्ते स्यादुत्तरेषु चतुर्ष्वपीति एकोद्दिष्टं सपिंडीकरणं शूद्रत्वनिषेधात् बह्वृचसाध्यकारास्तु सर्वैकोद्दिष्टेषु पा
णिहोममाहुः इदं बह्वृचानामेव अत्रेदं तत्त्वं स्थालीपाकेन सह पिंडार्थं मुख्यत्वेति सूत्रेणात्र पूर्वं स्थालीपाकश्चोद्यते सर्वश्राद्धेषु प्रसंगात्ते नानुवादायमतिदेशः त्तिका
रोक्तेः पार्वणे आब्दिकस्यानंगस्य व्यतिषंगस्य वार्षिकादिष्वनतिदेशाद्दर्धाधानिनोपि पाणिहोम एवेति हरिस्वरसः एवं मासिकादावपि षोडशे मासि केश्रा
द्धे सपिंडीकरणे तथा पाणावेव तु होतव्यमन्यत्राग्नौ तु हूयते इति बोपदेवोदाहृतवचनाच्च भाष्यकारमते तु सूत्रे स्थालीपाकेनेति करणत्वानिर्देशात्कृष्णा
च पार्वणांगोगं अतः काम्यादिषु तदभावे कथं स्यात् पिंडदानस्याप्यभाव एतदेवानुरुध्य विकृतावपि वार्षिकादौ व्यतिषंग उक्तः प्रयोगपारिजाते परिशिष्टे च
तेनैतन्मते धर्धाधानिनोग्न्यादेन वस्तुतस्तु स्थालीपाके सहशाखया प्रस्तरं हरतीति वत्सहभावमात्रकृतेः पालीवतेवत्त्वरूपलक्षणामिव नांगत्वं तत्रैवानांगानुरो
धेन प्रधानभूतपिंडदानस्यागोयुक्तः तेन व्यतिषंगाभावेप्यग्नौ होमो भवतीति बोपदेवः अनाहिताग्नेर्गृह्याग्निमतस्तु सर्वमते गृह्य एव वार्षिकादौ हरिमते
व्यतिषंगेण अन्यमते लौकिके अत्र यथाचारमनुष्ठेयं आश्वलायनः उद्धृत्य घृताक्तमन्नमनुज्ञापयत्यग्नौ करिष्ये करवाणीति वा प्रसनुज्ञा क्रियतां कुरुष्व कुर्वि

निर्ण॰ कमला॰ ३

सव्याग्नौ जुहोतीति यथोक्तं पुरस्तादिति व्यतिषंगपक्षे इदमिति हेमाद्रिः। कर्केकरवाणीत्यत्रैवाग्नाविसनुषंगः। पुरस्तात्सिद्धं पितृयज्ञे। तत्रैवं मेक्षणेनावदायावदानसं
पदा जुहुयात्सोमाय पितृमते स्वधा नमोऽग्नये कव्यवाहनाय स्वधा नम इति स्वाहाकारेण चाग्निं पूर्वं यज्ञोपवीती मेक्षणमनुप्रहृत्येति। अवदानसंपदा उपस्त
रणादीत्यर्थः। व्यतिषंगपक्षेऽतिप्रणीतेऽयं होमोऽन्यथा मुख्ये। अतिप्रणीतेऽग्नाविध्ममुपसमाधायेति बह्वृचपरिशिष्टात्। केचित्तु स्वरसेनानिबहेणाधेत्वानुरूपेव
दंति तदेतद्विरोधाच्चिंत्यं प्रयोगपारिजातेप्येवं शौनकः। स्वाहाकारेण होमं तु भवेद्यज्ञोपवीतवान्। तत्र प्रागग्नये कृत्वा पश्चात्सोमाय हूयते। अग्नौ यज्ञोपवी
त्येव प्रक्षिपेन्मेक्षणं ततः। छंदोगपरिशिष्टे अग्नौकरणहोमश्च कर्तव्य उपवीतिना। अपसव्येन वा कार्यो दक्षिणाभिमुखेन च। कातीयानां त्वपसव्यमेव। पिंडपि
तृयज्ञवत्कृत्वेति सर्वातिदेशात्। सव्यं तु छंदोगपरं गोभिलेनैतदुत्तरमेवापसव्योक्तेः। छंदोगा जुहुयुः सव्येनापसव्येन याजुषा इति रत्नावल्युक्तेश्च। अप
पाणिहोमः आश्वलायनः। अप्स्वनुज्ञया पाणिष्वेवेति। पिंडपितृयज्ञकल्पाभावेनाग्न्यभावे काम्यादिष्वित्यर्थः। पाणिष्विति बहुवचनात्सर्वविप्रपाणिषु होम इति
वृत्तिः। एवं मातामहेऽपि। शौनकोऽपि सर्वेषामुपविष्टानां विप्राणामथ पाणिषु विभज्य जुहुयात्सर्वं सोमायेत्यादिमंत्रतः। यत्तु हेमाद्रौ कात्यायनः। पित्र्ये यः पंक्ति
मूर्धन्यस्तस्य पाणावनग्निकः। हुत्वा मंत्रवदन्येषां तूष्णीं पात्रेषु निक्षिपेदिति। तद्बह्वृचातिरिक्तविषयं। यत्तु तत्रैव मात्स्ये। अग्न्यभावे तु विप्रस्य पाणावथ जले
ऽपि वा। अजकर्णेऽश्वकर्णे वा गोष्ठे वाथ शिवांतिके इति तत्तीर्थश्राद्धविषयं। तद्वदप्सुसमीपे स्याच्छ्राद्धे ज्ञेयो विधिस्तदेति तत्रैव कात्यायनोक्तेः। निर्जले
जकर्णादौ यत्तु चंद्रोदये यमः। दैवविप्रकरेऽनग्निः कृत्वाग्नौकरणं द्विज इति तद्भार्यापरं। अपत्नीको यदा विप्रः श्राद्धं कुर्वीत पार्वणं। पित्र्यविप्रेस्तनुहोता
विश्वेदेवेषु हूयते इति तत्रैव कात्यायनोक्तेः। हूयते इति छांदसो व्यत्ययः। हेमाद्रौ वायवीये विधुरो दैविके कुर्याच्छेषं पित्र्ये निवेदयेत्। दैवविप्रानलस्तत्र च। शिवः
वैश्वदेवार्थदेकास्मिन्भवेयुर्वाप्ययो द्विजाः। तदे[illegible]यो होतव्यं स्याद्द्विधैं विहितस्तदा। सोप्याद्यः प्रथमो वा नियम्येति न्यायात्। तेन मृतभार्यस्य

देवहोमः। अनुपनीतब्रह्मचर्यादिस्तु पित्र्ये अग्न्यभावः स्मृतः। यावद्भार्यां न विंदतीति हेमाद्रौ जातूकर्ण्योक्तेः। सभार्येनष्टाग्नेरपि पित्र्ये करे इति पृथ्वीचंद्रः। उपवीतित्वं देवहोमः
प्राचीनावीतिना पित्र्ये यद्वा सर्वत्र दैवपित्र्यकरयोर्विकल्प इति हेमाद्रौ मदनरत्ने पारिजाते च। यदा तु पितृमातामहयोर्दैवपित्र्यविप्रभेदस्तदा भेदेन पाणिहोम इत्यपरार्के
चंद्रिकायां च। यदा तु दैवं तंत्रं तदा तंत्रेण सकृद्देवपाणिहोम इति केचित्। हेमाद्रिस्तु मातामहस्य भेदेऽपि कुर्यात्तंत्रे च साग्निक इति कात्यायनस्मृतेर्भेदमाह। पूर्वं पित्र्यपिमा
धवीयेप्येवं सप्तरूपि विदेशादौ पाणिहोमो ज्ञेयः। यत्तु कर्के पाणावग्निं विनाश्राद्धमेव नास्तीत्युक्तं तत्सपिंडीकरणवार्षिकाद्यकरणापत्तेर्यत्किंचिदेव। यत्तु रहला
वदीये अनग्निर्दूरस्थायी श्रसावर्णे समुपस्थिते भ्रातृभिः कार्यश्राद्धं साग्निकैर्विधिवद्द्विजाः। क्षयाहे दिवसे प्राप्ते स्वस्याग्निर्दूरगो यदि तत्रैव भ्रातरः स्युश्चेल्लौकिके कार्यमिति
स्मृतिः। औपासनाग्नौ दूरस्थे समीपे भ्रातरि स्थिते यद्यग्नौ जुहुयाद्वापि पाणौ वा सहि पातकी। औपासनाग्नौ दूरस्थे केचिदिच्छंति सत्तमाः। पाणावेव तु होतव्यमिति
नेतत्समंजसं। तद्व्याख्यानादरादुपेक्ष्यं हेमाद्रौ यमः। अग्नौकरणवत्तत्र होमो विप्रकरे भवेत्। पर्युक्ष्य दर्भानास्तीर्य यत्नाद्ध्यग्निसमो द्विजः। मेक्षणेन करेणाथ होमः। मेक्षण
ग्रहणमिति हेमाद्रिः। स्मृतिरत्नावल्यां नानुज्ञा पाणिहोमस्यान्यत्र। पर्युक्षणेक्षणे नाग्नेतमधादिति च नस्यातामित्यमेक्षणे। कर्कोपाध्यायस्त्वेवमाह। माधवीये चंद्रिका
यां चानुज्ञादि सर्वं भवतीत्युक्तं। पाणिहोमप्रश्नाद्याद्यापरार्के शौनकः। अनग्निश्चेद्दाज्यं गृहीत्वा भवतत्त्वेवाग्नौ करवामीति पूर्ववत् तथास्त्विति आश्वलायनः।
यद्विपाणिष्वाचांतेष्वन्यदन्नमनुदिश्य सन्नमने स्तृष्टं दत्तमभुक्तमिति पाणौ हुतं पात्रे निधाय विप्रे आचम्य कृते हुतशेषं पात्रेषु दद्यादित्यर्थः। सदंप्रभृत नोमि
त्तिकं चेदमाचमनं न कुलसत्पानिमित्तं भुक्तं पाणितले दत्तं पूर्वमश्नंत्यबुद्धयः। पितरस्तेन तृप्यंति शेषान्नं न लभंति ते। यच्च पाणितले दत्तं यच्चान्यदुपकल्पितं
एकीभावेन सा नैव पृथक्भावेन विद्यते इति बह्वृचपरिशिष्टात्। हेमाद्रावप्याचमने हत्यर्थवाद उक्तः। पाणावाच्योऽहि द्विजः भुं न इति भाष्ये साचांतेषु भक्ति
तेषु चमसभक्षणे। भक्षणानंतरं चनाचमनं अधिसाम्यात्। पूर्वं निषिद्धस्तु सपिंडीकरणे ज्ञेयः। दद्यादिति चोदितत्वात्। नखत्रैवादित्वादिर्युक्तं। नवत्तद्बह्वृचसंमतं। यत्तु
बोधायनेन तस्मिन्नाशिते द्याद्यदन्नं प्रकृतमन्यदिति पिशक्षयामुक्तं तत्तच्छाखीयानामेवेति हेमाद्रिः। तत्रैव यमः। ॥ जुहोति। पित्र्यपाणिहुतावशिष्टं पितृपात्रेषु निक्षि
पेत्। अग्नौकरणशेषं तु न दद्याद्वैश्वदेविके। एतदग्निहोमेऽपि समं कर्कस्त्वेतद्धुतशेषं दैवत्यविरोधात्सर्वविप्रेषु दद्यादित्याह। तत्रैव बह्वृचसि[illegible] पित्र्यविप्रकरे हु

डि: तृ:

ताशेषंपात्रेषुनिक्षिपेत्· पिंडेभ्यःशेषंयत्तुकिंचिन्नदद्यात्देवविके· अथापस्तंबानांसूत्रे उद्ध्रियतामग्नौचक्रियतामित्यामंत्र्यकाममुद्ध्रियतां काममग्नौ
चाक्रियतामित्यतिसृष्टउद्धरेज्जुहुयाच्च· नष्टाग्निविधुरादिविशेषोहरदत्तनारदीये· नष्टाग्निर्दूरभार्यश्चपार्वणेसमुपस्थिते संधायाग्निंतथाहोमं
कृत्वातंविसृजेत्पुनः अथाग्नौतित्कालेग्निंसंधायकृत्वाहोमंत्यजेदित्यर्थः एतदापस्तंबानामेव· पाणिहोमस्तुछंदोगादीनां विश्वप्रकाशेपि सा
ग्निरौपासने नग्निरग्नौकुर्वीतिलौकिके पाणौहोमंप्रशंसंतिनत्वापस्तंबशाखिनां स्नातकाविधुराबास्युर्येदिवाब्रह्मचारिणः अग्नौकरणहो
मंतुकुर्युस्तेलौकिकेनले· अथाश्वलायनेअग्नौज्योतिरहुध्यव्याहृतीर्हुनेत् ततोनुज्ञातोग्नौ धनाद्यास्यभागात्त यन्मेमातेत्याद्युदकुर्यात् तत्रसमा
नाकृतयः षडाज्यस्येतित्र्योदयव्यसयोर्वा· यथा· यन्मेमाताप्रलुलोभ तन्मेरेतःपितावृंक्तां यास्विष्टीतिद्वाभ्यां· अमुष्मैस्वाहेतिपितुर्नाम्नाहोमो
यन्मेपितामहीप्रलुलोभ· तन्मेपितामहोवृंक्तां अंतर्दधेइति तन्नाम्नापितामहायेदं यन्मेप्रपितामही· तन्मेरेतःप्रपितामहोवृंक्तां अंतर्दधेत्यनुभि
रितितन्नाम्नाप्रपितामहायेद्वो· मातामहेषुतुः· यन्मेमातामही· तन्मेमातामहोवृंक्तां· अन्यमातामहोवृंक्तामित्याद्यो· यन्मेमातुःपितामही प्रलु
रेतोमातुःपितामहोवृंक्तां अन्यंमातुःपितामहोवृंक्तां यन्मेमातुःप्रपितामहीप्रलु० रेतोमातुःप्रपितामहोवृंक्तां· अन्यंमातुःप्रपितामहोवृंक्तां
सर्वत्रैवामुष्मैस्वाहेतिततन्नाम्नायाज्यैतेद्वेस्यसंग्रहे योज्यःपित्रादिशब्दानांस्थानेमातामहादिकः· अन्नंहस्तेनतथास्पर्शो तिलपिंडादिदान
के· यन्मेमातामहीत्यादितत्रोदाहरणंभवेत् ततोयेदेहेस्थेकाञ्चाकृतिः ततःस्वाहापित्रइत्याद्येराज्यंहुत्वा स्विष्टकृतंहुत्वा सर्वभक्ष्यांकि शिव·
चिदादायोदगुद्धृत्यभस्मोपोह्य तत्रलक्ष्मीस्वाहाकारेणजुहोति· परिषेचनांतंस्थालीपाकवत् अयमग्नौकरणहोमोमासिश्राद्धएव तच्च
स्मार्ताग्न्यभावेनकार्यमित्येकेचित्· कार्यमेवेतिबहवः अतएवसर्वाधानिनोहोमवर्जंमासिश्राद्धमुक्तं· हरदत्तेनभाष्ये महाल

येतद्दर्शितके प्रकरणांतरत्वात्कर्मांतरत्वेन स्मार्तपार्वणवत्कार्यमितिस्वगुरवः आब्दिकादिषुतुस्मार्तपार्वणविधिरेव पुनंमातृवार्षिकादिषु मासिश्राद्ध
विकृतावष्टकायां मातृश्राद्धेवैकृतहोमेनप्राकृतहोमबाधः अन्वष्टकासुमातृश्राद्धेनेतिभाष्ये· तत्रापिश्राद्धेतुरवक्रियमाणेतु यन्मेमातेत्यादौगुणत्वेपि
मातुःप्राधान्यंविवक्षितं मासिश्राद्धेनकल्पोव्याख्यात इतिसूत्रात् आग्नेय्येवमनोताकार्येतिवचनादग्निशब्दस्यैववैकृतदेवताभिधायित्वं तेनामुष्माद्रत्य
त्रामुकामुकशर्मणेपितृभ्यामित्याद्यूहःकार्यः तच्चमासिश्राद्धंजीवत्पित्रादिनाव्युत्क्रममृतपित्रादिनाचकार्यमित्युक्तं हरदत्तेनभाष्ये· तत्प्रकारस्तुवक्ष्य
ते मातापित्रोर्दिनादौतुनोहः तस्मादृनोहइतिनिषेधात्स्वकृतासूहाभावाच्च पत्नीसंनद्धेतिवत् उपदेशमतेनोहः यथापत्नेमातेरोप्रलुलुभे [illegible]मावन
नुव्रतइत्याद्यस्मत्पितृकेतमासिश्राद्धनिर्णयेद्रष्टव्यं इतिदिक् अन्यत्प्राग्वत् अथपरिवेषणं तच्चोपवीतिनैवाज्येनदेवपूर्वंमांसमासपक्वमितिपात्राण्युपनीयकुर्यादिति
हेमाद्रिः तत्रैवशौनकः· विधिनादेवपूर्वंतुपरिवेषणमाचरेत् तत्रैवधर्मः· फलस्यानंततांप्रोक्तां स्वयंचपरिवेषणे तत्रैववक्ष्यमुत्तविष्णुः· भार्ययाश्राद्धका
लेतुप्रशस्तंपरिवेषणं ब्रह्मांडे नापवित्रेणनैकेन नोद्धृतेनविनाकुशैः तु नायसेनायसेनैवश्राद्धेतुपरिवेषयेत् वसिष्ठःआयसेनतुपात्रेणयदन्नंसंप्रदीय
ते भोक्तासविष्ठासमंभुंक्ते दाताचनरकंव्रजेत् पैठीनसिः सीसकायसरीतिपात्राण्ययज्ञियानि तत्रैवहारीतः सौवर्णराजताभ्यांच खड्गेनोदुंबरेणवा दत्तमक्षय्यतां
यातिफल्गुमात्रेणवापुनः काष्र्णाजिनिः दर्व्यादेयंघृतंचान्नंसमस्तव्यंजनानिच· उदकंचैवपक्वान्नंनोदर्व्याचकदाचन यमः पंक्तौविषमदानंश्च निष्फलानि वै
विधते· पृथ्वीचंद्रोदयेपराशरः सर्वदाचतिलाग्राह्याः पितृकर्मविशेषतः भोज्यपात्रेतिलान्दृष्ट्वा निराशाःपितरोगताः चंद्रिकायांहरदत्तानपः हस्तद
भास्तुयस्तेन्हा लवणव्यंजनादयः पितृणांनोपतिष्ठंतिसांकाभुंजीतकिल्बिषं घृतपात्रेविशेषोग्रंथांतरे ओदनेपरमान्नेचपात्रमांसाद्यमुद्धृत्यधीः
घृतेनपरयुस्यात्रतद्धस्तेनघृतंभवेत्· घृतादिपात्राणिभूमौस्थापयेत् नतुभोजनपात्रइतिमदनरत्ने संग्रहे हस्तदत्तंतुनाश्नीयात्लवणंव्यंजनादिकं अ
पक्वंतलपक्वंचहस्तेनैवप्रदीयते पात्रालेपनमुक्तंचलुविशातमेत· उत्तानंदक्षिणंसव्यं नीचपात्राण्युपस्पृशेत् याज्ञवल्क्यः दत्वान्नंपृथिवीपात्रमिति

पात्राभिमंत्रणं कृत्वेदं विष्णुरित्यन्ने द्विजांगुष्ठं निवेशयेत् बौधायनः निवेश्यांगुष्ठेनानखेनानुदिशति पृथिवी पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे वः अमृतं जुहोमि ब्राह्म
णानां त्वा विद्यावतां प्राणापानयोर्जुहोम्यक्षितमसि मामेषां पितॄणां क्षेष्ठा अमुत्रामुष्मिँल्लोक इति आद्यजुहोमि अग्नये स्वाहा शब्दः कातीयसूत्रे उक्तः मंत्रे स्वधा
शब्दः अंगुष्ठे विशेषमाह हेमाद्रौ धौम्यः परिवेषणे चांगुष्ठं द्विजस्यान्ने निवेशयेत् तथा उत्तानेन तु हस्तेन द्विजांगुष्ठनिवेशनं यः करोति द्विजो मोहात्त
द्रक्षांसि भुंजते तत्रैव यमः विष्णोर्हव्यं च कव्यं च ब्रूयाद्रक्षस्वेति क्रमात् दैवे पित्र्ये वैसर्थः तत्र गात्रिः संबंधनामगोत्राणि इदमन्नं ततः स्वधा पि
तृक्रमादुदीर्येति स्वसत्तां विनिवर्तयेत् हस्तेनामुष्मिन्नाद्यमिदमन्नमुदीरयेत् अत्रान्नदाने चतुर्थी स्यात् दिश्यादि विशेषाः पूर्वमुक्ताः अत्र पृ
थ्वीकांते अमुक पुरूरवार्द्रव संज्ञका विश्वेदेवा देवता इदमन्नं सपरिकरं द्रव्यं ब्राह्मणाहवनीयार्थं दत्तं च दास्यमानं चातृप्तेर्यथेष्टं गंधोदेशे
भोक्ता इदमन्नं ब्रह्मसौवर्णपात्रस्थमन्नमक्षय्यवटच्छायास्थममुकेभ्यो विश्वेभ्यो देवेभ्य इदमन्नममृतरूपं परिविष्टं परिवेक्ष्यमाणं चातृप्तेः स्वा
हा न मम ममेति वह्वृचपरिशिष्टे हेमाद्रावनुमतः प्रयोगः एवं पित्र्ये ऽमुकगोत्र वसुरूपादि तत्तन्नामरूपं ततो ये देवास इति दैवे ये चेह पि
तर इति पित्र्ये केचिज्जपंति ततोऽच्छिद्रं वाचयेत् तत्रैव प्रचेताः अपोशानं करे विप्रे संकल्पाच्छिद्रभाषणात् निराशाः पितरो यांति दैवे
सहो न संशयः पारस्करः संकल्प पितृदेवेभ्यः सावित्रीमजुप श्राद्धं निवेद्यापोशानं जुष्यपेष्याय भोजनं निवेद्येति ब्रह्मार्पणं के संशयः अ
त एव बृहन्नारदीये ऽन्नत्यागमुक्त्वोक्तं दत्तं हविश्च तत्कर्म विष्णवे वै समर्पयेदिति यत्तु कूर्मलेकाद्धाजिनिः अपसव्येन कर्तव्यं पि
त्र्यं कर्म मशेषतः अन्नदानादृते सर्वमेव मातामहेष्वपीति तदप्येतत्सरं तच्च ब्रह्मार्पणं हरिदीता चतुर्भिश्चेति केचित्पठंति धर्मप्रदीपे
ततो नं पितृदेवेभ्यः संकल्प च यथाविधि दत्तं च दास्यमानं च आतृप्तेर्न मम मेति च तथा श्राद्धान्नस्य तु संकल्पो भूमावेव प्रदीयते हस्ते यदी
यमानं तु पितॄणां नोपतिष्ठते वैश्वदेवस्य चान्नं तु पितृपात्रस्य दक्षिणे संकल्पोदकदानं स्याच्छ्राद्धे यथारुचि प्रचेताः अपोशानं प्रदायाथ

सावित्रीं त्रिर्जपेदथ मधुवाता इति त्र्यृचं माध्विरित्येतत् त्रिरं तथा याज्ञवल्क्यः सव्याहृतिकां गायत्रीं मधुवाता इति त्र्यृचं जप्त्वा यथासुखं वाच्यं भुंजीरंस्तेपि वा
ग्यताः यथासुखं जुषध्वमिति वाच्ये अत्रिः असंकल्पितमन्नाद्यं पाणिभ्यां यस्तु पस्पृशेत् अभोज्यं तद्भवेदन्नं पितॄणां नोपतिष्ठते अन्नं दत्तं न गर्हेत्
या द्याव तोयं न संपिबेत् अपोशाने वामभागे सुरापानसमं भवेत् दक्षभागे तु यः कुर्यात् सोमपानफलं लभेत् तथा पुनरापूर्यापोशाने सुरापानस
मं भवेत् हेमाद्रौ वसिष्ठः दत्त्वा व्याप्ययथादत्तं भूमौ यो नि क्षिपेद्बलिं तदन्नं निष्फलं याति निराशैः पितृभिर्गतैः केचिदाज्येन कुर्वंति तेनैव पायसेन त
थाज्येन माषान्नेन तथैव च न कुर्याद्बलिदानं तु ओदनेन प्रकल्पयेदिति स्मृतिसारे निषेधात् शंखः श्राद्धे नियुक्तान्भुंजानान्नपश्येदेवणादिषु उ
च्छिष्टाः पितरो यांति एकतानात्र संशयः कात्यायनः अश्नत्सु जपेत्सव्याहृतिकां गायत्रीं सकृत्त्रिर्वा राक्षोघ्नैः पुरुषसूक्तमप्रातिरथमिति हेमाद्रौ ब्रह्मो
क्त पुराणे यद्ब्रह्म चपोरुषसूक्तं श्रावयेद्ब्राह्मणान्नित मात्स्यपाद्मयोः ब्रह्मविष्ण्वर्करुद्राणां स्तोत्राणि विविधानि च इंद्रेशसोमसूक्तानि पावमानीः स्वशक्ति
तः मंडलब्राह्मणं तद्वत्प्रीतिकारि च यत्पुनः अभावे सर्वविधानां गायत्रीं जपमाचरेत् पृथ्वी चंद्रोदये ब्राह्मे वीणावंशध्वजं चापि विप्रेभ्य सन्निवेद
येत् जपेच्च पौरुषं सूक्तं नाचिकेतत्रयं तथा त्रिमधु त्रिसुपर्णं च पावमानीयजूंषि च हेमाद्रौ वसिष्ठः हुंकारेणापि यो ब्रूयाद्धस्ताद्वापि वदेद्गुणान् भूतला
दुद्धृत्यान्नं भुंक्ते हस्तेन वा पिबेत् प्रौढपादो बहिःकक्षो बहिर्जानुकरोपि वा अंगुष्ठेन विनाश्नाति मुखशब्देन वा पुनः पीतावशिष्टतोयानि पुनरुद्धृत्य
नापिबेत् खादितार्धात्पुनः खादेन्मोदकानि फलानि च मुखेन वाधमेदन्नं निष्ठीवेद्भाजने पि वा इत्थमश्नन्द्विजः श्राद्धं हत्वा गच्छत्यधोगतिं जाबालिः
इष्टं मुक्त्वा हविष्यं च द्यादन्नं शनैःशनैः वृद्धशातातपः अपक्षतं तु याचितव्यं श्राद्धार्थमुपकल्पितं न याचते द्विजो मूढः स सर्वासि तदघातकः यत्तु यमः श्रा
द्धे द्विजानेवदद्यान्न याचेन्न च दापयेदिति तदसंपादितविषयं हेमाद्रिः हारीतः ऊर्ध्वपाणिश्च विस्मृतः सक्रोधो विस्मयान्वितः भग्नपृष्ठस्तु

निर्ण० तृ०

यद्युक्तेनतस्त्रीणातिवेपितॄन् प्रचेताः नस्पृशेद्वामहस्तेनभुंजानोन्नंकदाचन० नपादौनशिरोबस्तिंनपदाभाजनंस्पृशेत् शंखः श्राद्धपंक्तौतुभुंजानोब्राह्म
णोब्राह्मणंस्पृशेत् तदन्नमत्यजन्भुक्त्वागायत्र्यष्टशतंजपेत् उशनाः भोजनंतुननिःशेषंकुर्यात्श्राद्धे कथंचन० अन्यत्रदध्नःक्षीराद्वाक्षौद्रात्सक्तुभ्यएव
वच ब्राह्मणोनवाश्रुपातयेज्जातुनशुष्कांगिरमीरयेत् नचोच्छिष्टेतभुंजानानचकुर्वीतमत्सरं यमः स्वाध्यायंश्रावयेत्सम्यग्धर्मशास्त्राणिचैवहि० प्रचेताः
भुंजानेषुद्विजेषु सम्यक्तु सामलक्षणं जपेदासिमुखेवात्स्वा पित्र्यंचैवविशेषतः यजूंषिचैवरुद्रंचराक्षोघ्नीःसूक्तान्चैवच० राक्षोघ्नीःकृणुष्वपाजइतिस्त्रियो
द्याः तत्रैवनिगमःभुंजत्सुजपेत्सावमानीरुद्रीरतामध्वन्वतीश्च अन्नसूक्तःपितृनुक्तोपमिति एष्वांचंद्रप्रत्ययमरण्यपः भुंजानेषुतुविप्रेषुप्रमादात्तत्रवैत
गुरुं पादकर्कंततःकृत्वा अन्यंविप्रंनियोजयेत् क्षणपाद्यादिदत्तेस्यर्थः विप्रवमनेतत्रैवदक्षः निमंत्रितस्तुयःश्राद्धे भोजनेमुखनिःसृतेन तदेवहो
मंकुर्वीतस्वाग्नौविप्रःसमाहितः प्राणादिपंचभिर्मंत्रैर्यावद्भात्रिंशत्संख्यया ब्राह्मणस्तुततःकृत्वाधृतप्राशनमाचरेत् साग्निधानेतु० ऐंद्राग्न्यसामसू
क्तेनश्राद्धविघ्नोयदाभवेत् अग्न्यादिभिर्भोजनेनश्राद्धंसंपूर्णमेवहीतिउक्तं अग्न्यादिभिरितिलौकिकाग्निस्थापनचरुनिर्वापाद्यान्यसांगोतनाम
गोत्रपूर्वमग्नौपितृनावाह्यसंपूज्याभ्यासांगंकृत्वा प्राणादिभिर्हुत्वात्रिंशदाहुतीर्कुर्यादित्यर्थः भोजनेनपुनःश्राद्धं० तेनहोमःपुनःश्राद्धंवेतिपक्ष
द्वयमुक्तं तत्रोक्तंजपस्तुसम्यगनुगतः स्मृतिसंग्रहे प्राधान्यंपिंडदानस्यभोजनस्यतदंगता अतोभुक्तिक्रियाहानौश्राद्धावृत्तिर्नमन्यते० पिंडदानोत्तरंवां
तौहोमएवनावृत्तिः पिंडदानात्प्रागवांतेतद्दिन उपवासंकृत्वापरेद्युःपुनःश्राद्धंकार्यमित्यर्थः तत्रैवश्राद्धपंक्तौतुभुंजानोब्राह्मणोवमतेयदि लौकि
काग्निंप्रतिष्ठाप्य अर्चयेच्चहुताशनं तथा एकएवयदाविप्रोभोजनेछर्दितोयदि तदैवाग्निंसमाधायहोमंकुर्याद्यथाविधि० द्वितीयपक्षोत्स राम०
ग्निविधाने भोजनोपक्रमारब्धेप्रक्रमात्पूर्व[illegible]यदि श्राद्धविघ्नेपुनः कार्यंजपहोमोनतत्स्विदो० स्मृतिसंग्रहे० अकृतेपिंडदानेतुभुंजानाब्रा

ह्मणावमेत्० पुनःपाकान्नुकर्तव्यंपिंडदानंयथाविधि० पिंडदानंश्राद्धं अकृतेपिंडदानेतुपितायदिवमेत्ततो पुनःपाकंप्रकुर्वीतश्राद्धंकुर्याद्यथा
विधीतितत्रैवोक्तेः तथापित्र्यर्थानांत्रयाणांहिपिता[illegible]वमतेयदि तद्दिनेचोपवासस्या सुनःश्राद्धंपरेहनि० तथा वमनेवातिरिक्तेवा तद्दिनंपरिवर्जयेत्
एकोद्दिष्टमासिकाब्दिविषयं दर्शादौतुवांतावामेन तदेवकार्यं० श्राद्धविघ्नेद्विजातीनामामश्राद्धंप्रकीर्तितं अमावास्यादिनियतंमाससंवत्सरादृते इति
मरीचिस्मृतेः श्राद्धेपिंडदानमेवप्रधानमितिकर्काचार्याः तन्मतेदक्षोक्तोहोमएवनावृत्तिः विप्रभोजनमितिमेधातिथिः भोजनपिंडदानाग्नौकर
णानीतिकपर्दिधूर्तस्वामिहेमाद्र्यादयः तन्मतपूर्वोक्तोनिर्णयः तत्रेदंतत्त्वं वैश्वदेविकस्यवमनेहोमएवनावृत्तिः अंगत्वात् तच्चरक्षार्थत्वा
त्० इतिश्राद्धकृतदक्षोक्तमासिश्मतेश्च तत्रजयान्नुकुर्यादितिवत्० पितामहादेरपितथा पितृसुक्तेरितिकेचित्० तस्यापिप्रधानत्वात्सितवे
दितितुयुक्तं० सपिंडीकरणादौवार्षिकवत्० सपिंडीकरणादीनियानिश्राद्धानिषोडश० तत्रपिंडप्रधानत्वंप्रेतत्वविनिवर्तकमितिस्मृतेः महै
कोद्दिष्टादौतूभयप्राधान्यादावृत्तिरेव एकएवद्विजोभोज्यपिंडोप्येकोविधीयतइतिस्मृतेः वृद्धिसंकल्पनित्यश्राद्धादौतुभोजनप्राधान्याद्धानौ
आवृत्तिरेव वृद्धिश्राद्धविकल्पेनपिंडदानंबुधैःस्मृतं नित्यश्राद्धमदैवंस्यात्पिंडदानविवर्जितमितिस्मृतेः भुक्तिक्रियायाःप्राधान्यंश्राद्धेसंकल्प
संज्ञके तत्रैवपित्रविप्रस्यतत्पूर्वातिपुनःक्रियतिसंग्रहोक्तेः श्रवमघादावप्येवं तीर्थमहालयादौदर्शवदितिसाशाकीयालोचनेनप्रतीमः अभ्यला
यनः तृप्तान्ज्ञात्वामधुमतीःश्रावयेदक्षन्नमीमदंतेतिचसंपन्नंपृष्ट्वा यद्दत्तमुपभुक्तं ततःस्थालीपाकेनसहपिंडार्थमुद्धृत्यशेषंनिवेदयेदभि
मतेनुमतेचेति अन्नमायत्रीमधुवितित्रिकंजपेदापिक्रम्य० तृप्तान्बुध्वान्नमादायसतिलंपूर्ववत्करेदितिप्रचेतसोक्तेः व्यासः तृप्तात्रेत्तांतुष
माप्तान्ब्रूयत्स्ततास्मद्वस्थ० अभिमतेविप्रःसर्वांकृतुमितिःशेषान्नकापि अन्नशेषैश्चकिंकार्यमितिपृच्छेततांस्ततः तैरुक्तःसहसोपभुज्यमितिप्र
त्युक्तिपूर्वकं प्रदद्युःसकलंतस्मैसर्वांकुर्युर्यथाकृचि० श्राद्धविशेषप्रश्नमदमात्हेमाद्रौविष्णुः पित्र्यस्वदितमितिमोस्यांस्कंधत्संपन्नामि

सन्मुदये दैवेरोचतइति आयुष्यमितिसेरिषु स्वेरमिश्राद्धं याज्ञवल्क्यः अन्नमादाय तृप्ताः स्थ शेषं चैवानुमान्य च तदन्नं प्रकिरेद्भूमौ दद्याच्चापः स
कृत्सकृत् इदं चान्नविकिरदानमन्यशाखिनां आश्वलायनानां तु पिंडांत एव सूत्रकृतोक्तेः कात्यायनस्तु विकिरोत्तरं गायत्र्यादि जपं तृप्तिप्रश्नं
चाह हेमाद्रौ देवलः ततः सर्वाशनं पात्रे गृहीत्वा विविधं बुधः तेषामुच्छेषणस्थाने विकिरं तु विनिक्षिपेत् माधवीये प्रचेताः सार्ववर्णिकमादाय
ये अग्नीति तु विक्षिपेत् सच कुशे कार्यः दर्भेषु विकिरश्चायदुक्तौ स्मृतौ मंत्रः कातीयः अग्निदग्धाश्च ये जीवा येप्यदग्धाः कुले मम भूमौ दत्तेन तृप्य
तु तृप्ता यांतु परां गतिं अन्ये तु असोमपाश्च ये देवा यज्ञभागविवर्जिताः तेषामन्नं प्रदास्यामि विकिरं वैश्वदेविकं इति हेमाद्रौ गोभिलोक्तेन दै
वे असंस्कृतप्रमीतानां त्यागिनां योषितां कुलस्त्रियः दास्यामि तेभ्यो विकिरमन्नं ताभ्यश्च पैतृकं मिसाग्निपुराणोक्तेन पित्र्येन्नं विकीर्य ये अग्नि
दग्धा इत्युच्छिष्टपिंडं कुशोपरि एषमद्यादि सार्द्धः पृथ्वीचंद्रोदयेप्येवं ब्राह्मे ततः प्रक्षाल्य हस्तौ चाचम्य ह्यग्रे संस्मरेत् माधवीये गौतमः वि
किरमुच्छिष्टैः प्रतिपादयेत् हेमाद्रौ व्यासः उच्छिष्टैरेव विकिरं सदैव प्रतिपादयेत् भृगुः पिंडवत्प्रतिपत्तिस्याद्विकिरस्येति तोत्वलिः श्राद्धका
शिकायां यजमानस्य दासादीनुद्दिश्य द्विजसत्तम तस्मादन्नं त्यजेद्भूमौ वामभागेषु पैतृके मनुः उच्छेषणं भूमिगतमजिह्मस्याशठस्य च दासव
र्गस्य तत्पित्र्ये भागधेयं प्रचक्षते उदङ्मुखेष्वाचमनं माधीदद्यात्ततः प्राङ्मुखेषु पित्र्ये दैवे च वेसर्थः शातातपः विश्वेदेवनिविष्टानां चरमं हस्तधावनं
हेमाद्रौ वाराहे हस्तं प्रक्षाल्य यश्चापः पिबेदुच्छिष्टको द्विजः सदा तदन्नमसुरैर्भुक्तं निराशाः पितरो गताः मरीचिः हस्तं प्रक्षाल्य गंडूषं यः पिबेद्विचक्ष
णः आसुरं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठते तत्रैव संग्रहे पवित्रग्रंथिमुत्सृज्य मंडलेषु विनिक्षिपेत् हस्तादीन्क्षालयेद्विद्वान् रोरावादौ तु कुत्रचित् श्रीराम॰
आसुरः ताम्बूलोद्गिरणं चैव गंडूषोद्गिरणं तथा क[illegible]पात्रे तथा ताम्रेन कुर्वीत कदाचन उच्छिष्टैर्धान्यचूर्णैः कुर्योः भूमिं शोधयेत् अथ पिंडदानं॰

तत्राचमनोत्तरमग्नौकरणोत्तरं भोजनोत्तरं विकिरोत्तरं स्वधावाचनोत्तरं विप्रविसर्जनोत्तरं चेति हेमाद्रौ स्मृतिषु पक्षा उक्ताः तेषां शाखाभेदेन व्यवस्था प्रेतश्राद्धे
षु पूर्वमन्येषु भोजनोत्तरमिति चंद्रिका माधवौ सर्वत्र भोजनांतमिति बह्वृचः आश्वलायनः भुक्तवत्सु चानाचांतेषु पिंडान्निदध्यादाचांतेष्वेके भुक्तवत्स्विति पू
र्वनिषेधार्थं सप्रिरति प्रणीतसमीपे ऽनग्निर्द्विजसमीपे हेमाद्रौ जातूकर्ण्यः व्याममात्रं समुत्सृज्य पिंडांस्तत्र प्रदापयेत् प्रसारितभुजांतरो व्यामः संक
टे तु व्यासः अरत्निमात्रमुत्सृज्येति यत्तु तत्रैव सिकताभिर्मृदा वापि वेदी दक्षिणानिम्नगेति तदन्यशाखिपरं देवलः ततस्तैरभ्यनुज्ञातो दक्षिणां
दिशमेत्य च चंद्रिकायां पिंडनिर्वपणं कार्यं कुशाभावे विचक्षणैः काशेषु राजदूर्वासु पवित्रेषु परमेष्ठिते आश्वलायनः स्फ्येन लेखामुल्लिखेदपहता
असुरा रक्षांसि वेदिषद इति तामभ्युक्ष्य सकृदाच्छिन्नैरवस्तीर्य प्राचीनावीती लेखायां त्रिरुदकेनोपनयेच्छुंधंतां पितरः शुंधंतां पितामहाः शुंधंतां प्रपि
तामहा इति तस्यां पिंडान्निपृणीयादसरार्चीनपाणिः पित्रेस पितामहाय प्रपितामहाय चेत् तत्तेसौ ये च त्वामत्रान्विति हेमाद्रौ पारस्करः कर्षूयामुल्लिखे
त्स्फ्येन कुशेर्वापि महीं द्विजः दक्षिणाप्राचीं वेदीमुत्स्प्रमापरतं बोक्त्रे आवाहयित्वा दर्भाग्रैस्तेषां स्थानानि कल्पयेत् तेष्वासीनेषु पात्रेण पात्रयुक्तेन
तिलोदकं परीचीनेन निम्नापितृतीर्थेन वायवीये मधुसर्पिस्तिलयुतांस्त्रीन्पिंडान्निर्वपेद्बुधः चिरस्थली सेती तिलमन्नं च पानीयं धूपदीपं पयस्तथा॰
मधुसर्पिःखंडयुक्तं पिंडमष्टांगमुच्यते याज्ञवल्क्यः सर्वमन्नमुपादाय सतिलं दक्षिणामुखः उच्छिष्टसन्निधौ पिंडान्दद्याद्वै पितृयज्ञवत् केचित्पिं
डेषु माषान्वर्जयंति माषाः श्राद्धेषु वैग्राह्या वर्ज्याश्चैवाग्निपिंडयोः ब्राह्मणेषु तथा मध्यं तथा माषाग्निपिंडयोरिति स्मृतिसारात् माषान्सर्वत्र वेद
धात्पिंडेष्वेव विवर्जयेत् इति स्मृतेश्च अत्र मलं चिंत्यं हेमाद्रावपि सर्वशब्दस्य प्रकृतार्थत्वात्सर्वान्नग्रहणमुक्तं अथ पिंडप्रमाणं हेमाद्रौ वांगिराः
कपित्थबिल्वमात्रान्वा पिंडान्दद्याद्विधानतः कुक्कुटांडप्रमाणान्वा आमलकेबदरैः समानिति तत्रैव धूम्रः कपित्थस्य प्रमाणेन पिंडान्दद्यात्स

माहित: तत्संमंविकिरंदद्यात्पिंडांनेतुषडंगुले· अन्येष्विपह्रुतोभद्राम्तु· एकोद्दिष्टेसपिंडेचकथियंतुविधीयते नारिकेलप्रमाणंतुप्रत्यब्देमासिकेतु
था· तीर्थेदर्शेचसंप्राप्तेकुक्कुटांडप्रमाणतः महालयेगयाश्राद्धंकुर्यादामलकोपममित्यादृ: कालिकाप्यामाचार्येः पत्रस्युर्बहवःपिंडास्तत्रबिल्व
फलोपमाः यत्रचैकोभवेत्पिंडस्तत्रखर्जूरसन्निभः प्रेतपिंडस्तुदैर्घ्येणद्वादशांगुलउच्यते इति· वायवीये· पत्नीपिंडास्तुमध्यायात्रिवर्गाभ्यस
हायिनी हेमाद्रौलौगाक्षिः महालयेगयायांचप्रेतश्राद्धेदशाहिके· पिंडशब्दप्रयोगस्यादन्नमन्यत्रकीर्त्यते· शाट्यायनिः असावेतत्तइदमुक्त्वातदेनेच
स्वधानमः असावित्यत्रसंबंधगोत्ररूपादिविशिष्टपित्रादिनामसंबुध्यंतमुक्त्वापुनश्चतुर्थ्यंतेनतदेतेरुपिंडइदमन्नंचास्वधानमोनममेतिवदेदि
तिहेमाद्रिः पित्रादिनामाज्ञानेत्वापस्तंबः यदिनामानिनविद्यात्स्वधापितृभ्यः पृथिवीषद्भ्यइतिप्रथमं पिंडंदद्यात्स्वधापितृभ्योंतरिक्षसद्भ्यइति
द्वितीयंस्वधापितृभ्योदिविषद्भ्यइतितृतीयं एवंमातामहेषुचमातृषुच· बह्वृचानांतुतत्प्राक् कालिकायांस्मृतिः यावदेवोच्चरेन्मंत्रंताव
त्प्राणंनिरोधयेत्· येषांतुगृह्येदर्शेमातृश्राद्धंपृथगुक्तं तेषांपितृभ्यःपश्चिमेमातृभ्यःसांनिध्येमातामहेभ्यःपिंडदद्यमितिगार्ग्यायनः आस्मि
न्पक्षेतत्साम्नेमातामहीभ्योपिदद्यादितिहेमाद्रौ पूर्वासुपितृभ्योदद्यादपरासुस्त्रीभ्यइतिसूत्राच्च एवंयत्रतीर्थमहालयादौक्वचिदिति
नारीणांपृथक्श्राद्धमरूपियइतिचतुर्विंशतिमतात्· पित्रादिनवदैवत्यंतथाद्वादशदैवतमित्यग्निपुराणाच्च मातॄणांपृथगुक्तं यत्रवा· आचा
र्येगुरुशिष्येभ्यः सखिज्ञातिभ्यएवच तत्पत्नीभ्यश्चसर्वेभ्यस्तथैवचजलांजलीन् पिंडांस्तेभ्यःसदादद्यात्पृथक्श्राद्धपदेनरः तीर्थेपुत्रेचसर्वेषुमा राम
घमासेमघासुचेतिचतुर्विंशतिमते· दौहित्रपुत्रदाराश्चयेकनिष्ठाःसहोदराः निःसंतानामृतायेचतेभ्योप्यत्रप्रदीयते· इतिभविष्यत्रेकोद्दि
ष्टान्युक्तानितत्रापितत्सांनिध्येपिंडदानं[illegible]· येषांनपृथक्तैःसपत्नीकाःपित्रादयोवाच्याः· अन्वष्टकागयामातृश्राद्धेचेवमन्हनि· ए

कोद्दिष्टंतथामुक्तास्त्रीपुनान्यत्पृथक्भवेदि[illegible]शंदवोक्तेश्च मनुः तेषुदर्भेषुतंहस्तंनिमृज्याल्लेपभागिनां हस्तलेपाभावेपिहस्तंनिमृज्यादेवेतिमेधाति
थिः विष्णुः अत्रपितरोमादयध्वमितिदर्भमूलेकरावघर्षणं कालिकायांस्मृतं· एकोद्दिष्टेपुनर्यास्मृदर्भलेपोनविद्यते· सपिंडीकरणादौतुलेपःसर्वत्र
शंस्यते मनुः आचम्योदक्परावृत्यत्रिरायम्यशनैरसून् षड्ऋतूंश्चनमस्कुर्यात्पितॄनेवचमंत्रवित्· उदकंनिनयेच्छेषंशनैःपिंडांतिकेपुनः त्रिःप्राणा
यामंकृत्वेतिमेधातिथिः अमंत्रप्राणंनिरुध्येतिकर्कोधाःमंत्रनद्धसंतापन्नमः नमोवःपितरइत्याद्यैः शेषंपूर्वावनयनशेषं आश्वलायनः निधता
ननुमंत्रयेतात्रपितरोमादयध्वंयथाभागमावृषायध्वमितिसव्यावृदुदगावृत्ययथाशक्तिप्राणानायम्यसिताभिपर्यावृत्यामीमदंतपितरोय
थाभागमावृषायीषतेतिचरोःप्राणमत्रसंमत्रपेन्नित्यंनिनयनमिति नित्यग्रहणंशेषाभावेपिकुर्यादित्यर्थे· शौनकः अथेपामत्रपितरइ
त्याद्येनानुमंत्रणं अमीमदंतेत्याद्येनमंत्रेणाप्यनुमंत्र्यतान्· पिंडशिष्टंचरोरन्नंकिंचिदाघ्रायतत्त्यजेत्· प्रक्षाल्याचम्यरुंधंतामित्याद्यैरे
वपूर्ववत् मंत्रैःपिंडेषुपानीयंनिषिंचेत्पितृतीर्थतः व्याघ्रः अद्भिःप्रक्षाल्यतत्पात्रंप्रतिपिंडंतुपूर्ववत्· कृत्वावनेजनंकुर्यात्पिंडपात्रमधोमुखं·
एतत्स्नानीयार्थानां आचार्यः ततःसमकृद्दिराचम्यनीवींविस्रस्यवाग्यतः आश्वलायनः असावभ्यंक्ष्वासावंक्ष्वेतिपिंडेष्वभ्यंजनांज
नवासोदद्यादूर्णामूर्णास्तुकांवापंचाशद्वर्षतायाउर्ध्वंस्वलोमेतद्वःपितरोवासोमानोन्यत्सितरोयुंग्ध्वमिति· श्राद्धचिंतामणौ ब्राह्मे· एतद्वः
पितरोवासइति — न्यूपक्पृथक् अमुकामुकगोत्रेत्तनुभ्यंवासःपंडद्रूपः इदंकालीयानां· एतद्इतिसूत्राणिप्रतिपिंडमितितत्सूत्रात् हेमाद्रौ
ब्राह्मे· श्रेष्ठमाकुत्रेकुद्दमंजनंनित्यमेवहि· तैलंकृत्वतिलाभ्यश्चदद्यादभ्यंजनंहितत् अंजनप्राथम्यमापस्तंबादिविषयं· तत्रैवव्याघ्रः गंधपुष्पाणि
धूपंचदीपंचविनिवेदयेत्· देवलः दक्षिणास्यंतोगंधप्रतिपिंडप्रदापयेत्· भक्षाण्यपूपानिष्टांश्चव्यंजनान्यशनानिच तत्रैवशंखः यत्किंचि
त्स्यंतश्राद्धे[illegible]भक्ष्यमाज्यमगर्हितं अविद्वानन्नमात्र्यंपिंडमलेकयंचन· एतत्सव्येनतिकेचित् युक्तंसपसव्येन· अजिप्रेक्षातान्पिंडान्

यथान्युप्तान्समासतः ततोनमोवः पितरइषेसादिनोपस्थानं मात्स्ये आचांतेषुचाचम्यवारिदद्यात्सकृत्सकृत् तिलपुष्पाक्षतान्पश्चाद्दक्षय्यो
दकमेवच अत्रदेवेसव्यंपित्र्येत्वपसव्यमितिकल्पः परिभाषोक्तवचनात्सकृत्सव्यमितियुक्तं अत्रशिवाआपःसंतु सौमनस्यमस्त्वित्यादिप्रयोगो
ज्ञेयः मात्स्ये दत्वाशीःप्रतिगृह्णीयाद्द्विजेभ्यःप्राङ्मुखोबुधः अघोराःपितरःसंतुसंत्वित्युक्तेपुनर्द्विजैः गोत्रंतथावर्धतांनस्तथेत्युक्तःसतैःपुनः
दातारोनोभिवर्धंतामन्नंचैवेत्युदीरयेत् स्वस्तिवाचनकंकुर्यात्पिंडानुद्धृत्यभक्तितः स्वस्तिवाचनात्प्राक्पात्रचालनंकार्यं हेमाद्रौनृसिंहप
त्तिःभाजनेषुचतिष्ठत्सुस्वस्तिकुर्वंतियेद्विजाः तदन्नमसुरैर्भुक्तंनिराशैःपितृभिर्गतैः जातूकर्ण्यः पात्रंचालयेच्छ्राद्धेस्वयंशिष्योथवासुतः नस्त्रीभिर्न
चबालेननासाजात्याकथंचन याज्ञवल्क्यः स्वस्तिवाच्यंततःकुर्यादक्षय्योदकमेवच तत्रैवहारीतातपः पितृपात्रेणोमगोत्रेणकरेदद्यात्तिलोदकं प्रत्येकं
पितृतीर्थेनअक्षय्यमिदमस्त्विति अक्षय्येत्रषष्ठीप्रागुक्ता तत्रैवनाभारखंडे उत्तानमर्घ्यपात्रंतुकृत्वादद्याच्चदक्षिणां हिरण्यंदेवतानांचपितृ
णांरजतंतथा बृहस्पतिः तस्मात्सणेकाकिनींवाफलपुष्पमथापिवा प्रदद्याद्दक्षिणांयेनतेनयात्सफलंभवेत् अत्रपितृदेशेनदक्षिणादानेऽ
पसव्यंविप्रोद्देशेनतुसव्यमितिमाधवः कालिकायामाचार्यः दद्याद्यज्ञोपवीत्येवतांबूलंदक्षिणांतथा अत्रिः वेदधनास्तुतान्विप्रान्पित्रादि
भ्यःस्वधोच्यतां गोभिलः अघोराःपितरःसंत्वित्युक्तेस्वधांवाचयिष्यइतिपृच्छति पितृभ्यःस्वधोच्यतामित्युक्तेऽस्तुस्वधेत्युच्यमानेधारांदद्या
दूर्जंवहंतीरिति आपस्तंबेनतुपुत्रान्पौत्रानभितर्पयंतीरित्यपिपरिषेचनेमंत्रउक्तः आश्वलायनः अथैतान्प्रवाहयेत्परेतनपितरःसोम्यासोगंभी
रेभिःपथिभिःपूर्व्येभिः दत्वायास्मभ्यंद्रविणेहभद्रंरयिंचनःसर्ववीरंनियच्छतेति मात्स्ये वाजेवाजइतिजपन्कुशाग्रेणविसर्जयेत् प्रचेताः
स्वस्तिवाच्यंततःकृत्वापितृपूर्वंविसर्जयेत् [illegible]आश्वलायनः अन्नंप्रकीर्योपवीत्योंस्वधेतिविसर्जोऽस्तुस्वधेतिवा ब्रह्मवैवर्ते आमावाजेतिमंत्र

चपठित्वाचप्रदक्षिणं द्वारोपांतेनतेःकृत्वासंयतःप्राङ्मुखोद्विजः प्रांजलिश्चततःप्राहुलान्विप्रान्सत्यवादिनः दातारोनोभिवर्धंतामन्नंचनःप्रतीवहिः एवमस्त्वि
तितेतंचकथयंतिसमाहिताः एतन्मंडलदेशेकार्यमितिहेमाद्रिः मनुः दातारोनोभिवर्धंतांवेदाःसंततिरेवच श्रद्धाचनोमाव्यगमद्बहुदेयंचनोस्त्विति बो
धायनः अन्नंचनोबहुभवेदतिथींश्चलभेमहि याचितारश्चनःसंतुमाचयाचिष्मकंचनेति अत्र दातारोनोभिवर्धंतां लप्स्यध्वं याचिष्यामिस्या
धूहेनपठित्वाविप्रैःप्रतिवचनंकार्यमितिसकृद्भुक्तानभाष्ये स्वादुषंसदः ब्राह्मणासःपितरइतिमंत्रद्वयंचपठंतिशौनकः ब्राह्मणानथनिर्यातान्
परीयात्त्रिःप्रदक्षिणं सस्त्रीकःस्वजनैःसार्धंप्रणमेद्रचितांजलिः कनिष्ठप्रथमाज्येष्ठचरमास्तुप्रदक्षिणे हेमाद्रौबृहस्पतिः अद्यमेसफलंजन्मभव
त्पादाब्जवंदनात् अद्यमेवंशजाःसर्वेयातावोनुग्रहाद्दिवं पत्रशाकादिदानेनक्लेशितायूयमीदृशाः तत्क्लेशजातंचित्तात्तुविस्मृत्यक्षंतुमर्हथ प्रचे
ताः विसृज्यब्राह्मणांस्तांस्तुपितृपूर्वंविसर्जयेत् सीमंतंचाप्यनुव्रजेत् अथपिंडप्रतिपत्तिः हेमाद्रौब्रह्मांडे पिंडमग्नौसदासैदद्याद्भोगार्थीप्रथमंनरः पत्न्यैप्रजार्थीदद्यादृम
ध्यमंमंत्रपूर्वकं उत्तमांगतिमन्विच्छन्गोषुनित्यंप्रयच्छति आज्ञांप्रज्ञांयशःकीर्तिमप्सुपिंडंप्रवेशयेत् प्रार्थयन्दीर्घमायुष्यंवायसेभ्यःप्रयच्छति आ
कामामयेदभ्रक्षितोवादक्षिणामुखः आश्वलायनः वीरंमेदत्तपितरइतिपिंडानांमध्यमंपत्नींप्राशयेत् आधत्तपितरोगर्भंकुमारंपुष्करस्र
जं यथायमरपाअसदिति भर्त्रादत्तमाधानादायद्वितीयेनप्राशनं आपस्तंबस्तुदानेमंत्रमाह अपांत्वौषधीनांरसंप्राशयामिभूतकृतंग
र्भंधत्स्वेतिमध्यमंपत्न्यैप्रयच्छतीति प्राशनेपिययेहपुरुषोऽसदितितदीयःपाठः अन्येषांतत्क्षारवायांहेय तत्रैवशंखः पत्नीवामध्यमं
पिंडमश्नीयात्पुत्रवान्विता कालिकायांछागलेयः प्राचीनावीतमामंत्र्यपत्नीपिंडोविसृज्यते प्रतिपत्न्यस्यमंत्रस्यकर्तव्यावृत्तिरत्रतु माध

वीर्यविष्णुधर्मे • तीर्थश्राद्धे सदा पिंडान् क्षिपेत्तीर्थे समाहितः याज्ञवल्क्यः पिंडांस्तु गोजविप्रेभ्यो दद्यादग्नौ जलेपि वा बृहस्पतिः
अन्यदेशगतापत्नी रोगिणी गर्भिणी तथा • तदा तं जीर्णवृषभश्छागो वा भोक्तुमर्हति • अथ पिंडोपघाते हेमाद्रौ प्रायश्चित्तकांडे दे
लः श्वसृगालकखरैः पिंडः स्पृष्टो भिन्नः प्रमादतः कर्तुरायुष्यनाशः स्यात्पितरस्तं नोपसर्पति • जातुकर्ण्यः पूर्वस्मिन्कीर्तिते तद्दोषपरिहारा
र्थं प्राजापत्यं प्रकल्पयेत् • पुनः स्नात्वा तदा कर्ता पिंडं कुर्याद्यथाविधि • काकस्पर्शे तु न दोषः पिंडोपघाते प्रकाम्य • धनस्य चविता
शः स्यात् काकस्पर्शादिकं विनेति तत्रैव श्लोकगौतमोक्तेः स्मृतिदर्पणे त्रिः मार्जारमूषकस्पर्शे पिंडे च विदलीकृते • [illegible]नः पिंडाः प्र
दातव्या हते नष्टे केन तत्क्षणात् बौधायनः श्वचांडालकादिभिः स्पृष्टपिंडोपघाते प्रहन्यते • प्राजापत्यं चरित्वा पुनः पिंडं समाचरेत्तु • वापदे
शोप्येवमाह • अथ पिंडनिषिद्धकालः स च प्रायेण महालयादिनिर्णये पूर्वमुक्तः हेमाद्रौ बृहस्पराशरः नः युगादिषु वृत्यये नेतथा-
भरणीषु च कुर्वीत पिंडनिर्वपणं नहि • स्मृतिरत्नावल्यां • पुत्रे जाते व्यतीपाते ग्रहणे चंद्रसूर्ययोः श्राद्धं कुर्यात्प्रयत्नेन पिंडनिर्वापा
पाहते • तत्रैव कात्यायनः • ऊद्वेरनंतरं चैव यावन्मासः समाप्यते • तावत्पिंडान्नैव दद्यान्न कुर्यात्तिलतर्पणं • बौधायनः संस्कार्यपूर्वे
तथान्येषु मासं मासार्धमेव च • तथा • भानौ गमे त्रयोदश्यां नंदा भृगु मघासु च • पिंडदानं मृदा स्नानं न कुर्यात्तिलतर्पणं • त्रिस्थ
लीसेतौ काष्णाजिनिः • विवाहव्रतचू[illegible]सु वर्षमर्धं तदर्धकं • पिंडदानं मृदा स्नानं न कुर्यात्तिलतर्पणं • वृद्धिमात्रे तथान्यत्र पिंडा

दाननिराकृया • कृता गर्गादिभिर्मुख्यैर्मासिके तु कर्मणि • हेमाद्रौ ज्योतिःपराशरः विवाहे विहिते मासास्त्यजेयुर्हृदिशो वहि • सपिंडाः
पिंडनिर्वापं मौंजीबंधे षडेव हि • तत्रैव • महालयगयाश्राद्धे मातापित्रोः क्षयेहनि • यस्य कस्यापि मर्त्यस्य सपिंडीकरणे तथा • कृतोद्वाहो
पि कुर्वीत पिंडनिर्वपणं सदेति • मातापित्रोर्मृतिक्षयाहविशेषणं • हविरूपयत्वात्तद्विवक्षितं • तेन भ्रातृपितृव्यादिवार्षिके पिंडदानं का
र्यमिति केचित् • सपिंडीकरणं नवश्राधषोडशश्राद्धोपलक्षणार्थमिति निर्णयामृते उक्तेः • क्षयाहे विशेषः संग्रहे • मातापित्रोराद्धि
के तु विवाहादिषु सर्वदा • तिलैः पिंडाः प्रदातव्या अन्यश्राद्धे विवर्जयेत् • अत्र मूलं चिंत्यं • रामकौतुके • नंदाश्वकामरव्यारभृग्वग्नि
पितृकालभे • गंडे वैधृतिपाते च पिंडास्त्याज्याः सुतेप्सुभिः • विश्वरूपनिबंधे • तिथिवारप्रयुक्तो यो दोषो वै समुदाहृतः स श्राद्धे रत
न्त्रिपित्रे स्यान्नान्यश्राद्धे कदाचन • अन्यस्तत्र प्राकृ • उच्छिष्टोद्वासन मोहः हेमाद्रौ वसिष्ठः श्राद्धेनोद्वासनीयानि उच्छिष्टान्यादिनक्ष
यात् • श्रोतंते वै सुधाधारास्ताः पिबंत्यकृतोदकाः • व्यासः उच्छिष्टं न प्रमृज्यात्तु यावन्नास्तमितो रविः ऊर्ध्वं मुहूर्तांतरस्तले • एकगृहे
तु मनुः उच्छेषणं तु न तिष्ठेद्यावद्विप्रा विसर्जिताः • ततो गृहबलिं कुर्यादिति धर्मो व्यवस्थितः बलिर्वैश्वदेवादिनित्यकर्मेति मे
धातिथिः • अंत्यमांते • प्रदायचाप्युपनायमहाद्वोच्छिष्टं न दापयेत् • तथा • कामं दद्याच्च सर्वं तु शिष्यायच सुतायच • भोक्तुरिति शेषः
जातुकर्ण्यः द्विजभुक्तावशिष्टं तु सर्वं भूमौ निवापयेत् • अथ वैश्वदेवादि • अत्र माम कैः श्लोकः श्राद्धे नाग्निकृतके त्वग्निकरणा
त्सर्वाजुहोति बलिं स्वतंत्र्यस्यात्पथाभवाद्धृ किरतः पश्चात् त्र्यंबकपचे • श्राद्धांते त्वथ वा महालयविधावुद्धृत्य भुंजेः स्याज्जायेत्वं तेमा

निर्ण० त स्त्वमध्यतः श्रमविधावादौ तथा साग्निके॰ अस्यार्थः साग्नेः पृथक्पाकेन सर्वत्रादौ वैश्वदेवः पक्षांते कर्म निर्वर्त्य वैश्वदेवं च साग्निकः॰ पिंडयज्ञं ततः कुर्यात्त
तोन्वाहार्यकं बुधः॰ पित्र्यं निर्वर्त्य पश्चात्तु वैश्वदेवं प्रकल्पयेत्॰ वैश्वदेवार्थमेव च॰ वैश्वदेवं न पित्र्यर्थं न दर्शे वैश्वदेविकमिति लौगाक्षिस्मृतेः॰ अत्र साग्निकः आहिताग्निरिति हेमा
द्रिः श्राद्धात्प्रागेव कुर्वीत वैश्वदेवं तु साग्निकः॰ एकादशाहिकं मुक्त्वा तत्र ह्यंते विधीयत इति हेमाद्रौ शालंकायनोक्तेश्च॰ तत्रैव परिशिष्टे॰ संक्रांतिपा
र्वणश्राद्धे एकोद्दिष्टे तथैव च अग्रतो वैश्वदेवस्याप्यश्राद्धकादशेऽहनि॰ स्मार्ताग्निमतां तद्रहितानां चाग्नौकरणात्तरं विकिरात्तरं वा होममात्रं पृथक्पाके
नान्नयज्ञादितु श्राद्धांतएव॰ अत्र मूलं हेमाद्रिचंद्रिकादौ स्पष्टं सर्वेषां श्राद्धांते वा तत्पाकेन वैश्वदेवं नित्यश्राद्धादावितितृतीयः॰ श्राद्धं निर्वर्त्य विधिवद्वैश्व
देवादिकं ततः कुर्याद्भिक्षां ततो दद्याद्धंतकारादिकं तथेति पैठीनसिस्मृतेः॰ ततः श्राद्धशेषात् श्राद्धान्निःश्राद्धशेषेण वैश्वदेवं समाचरेदिति चतुर्विंशति
मताच्च॰ एवं वैश्वदेवकालत्रयस्य आशार्के शांखायनपरिशिष्टमुदाहृत्य व्यवस्था॰ आदावृद्धौ क्षये चांते दर्शे मध्ये महालये॰ एकोद्दिष्टे तु निर्वृ
त्ते वैश्वदेवो विधीयत इति बह्वृचस्मृत्युक्ता सर्वेषां श्राद्धांत एवेति मेधातिथिस्मृतिरत्नावल्यादयो बह्वृचः॰ बोपदेवस्तु वृत्तिकारेणा विसर्जनां
तं श्राद्धमुक्त्वा उल्लेखणं क्षितिपूर्वोक्तमनुवाक्योदाहरणाद्बह्वृचानां श्राद्धांतएव॰ मध्यपक्षस्त्वन्यशाखापर इत्याह हेमाद्रिस्तु॰ हृद्यावप्यांतएव वैश्व
देवमाह॰ कात्यायनानां तु स्मार्तश्रौताग्निमतामादावेकेनैव पाकेनेति कर्कः॰ अन्येषामंते तैत्तिरीयाणां तु साग्नीनां सर्वत्रादौ वैश्वदेवः पंचय **राम**
ज्ञाश्च अंतएवेति सुदर्शनभाष्ये॰ उक्तं अस्य पक्षद्वयस्य पूर्ववद्व्यवस्था॰ हेमाद्रौ मार्कंडेयः॰ ततो नित्यक्रियां कुर्याद्भोजयेच्च ततोऽतिथीन् ततः

तदन्नं भुंजीत सह सुतसादिभिर्नरः॰ ततः श्राद्धशेषात् नित्यक्रिया नित्यश्राद्धं॰ तत्र पृथक्पाकेन नैत्यकमिति तेनैवोक्तेः॰ पाके त्वविकल्पः॰ अथ नित्यश्राद्धं
हेमाद्रौ व्यासः॰ एकमप्याशयेद्विप्रं षण्णामप्यन्वहं गृही॰ अपीत्यनुकल्पः॰ प्रचेताः॰ नावाहनं त्वर्णं च होमं च नावाहनं न विसर्जनं न पिंडदानं विकिरं न दद्यात्
च दक्षिणां अत्र निश्चये दैवे भोजयितुं किंचिद्द्रव्या विसर्जयेत्॰ इति तेनैवोक्तेः दक्षिणाविकल्पः॰ यत्तु॰ नित्यश्राद्धं देवहीनं नियमादि विवर्जितं दक्षिणारहितं चै
व दातृभोक्तृव्रतोज्झितमिति काशीखंडे तद्विप्राभावपरमिति पृथ्वीचंद्रः॰ भविष्ये॰ आवाहनस्वधाकारपिंडाग्नौकरणादिकं ब्रह्मचर्यादिनियमाः
विश्वेदेवास्तथैव हि॰ दातॄणामत्र भोक्तॄणां नियमो न च विद्यते एतद्दिनांतसंध्यावरात्रावपि कार्यं॰ दिवोदितानि कर्माणि प्रमादादकृतानि च यामिन्याः
प्रहरं यावत्तावत्कर्माणि कारयेदिति वृद्धनारदीयोक्तेः॰ रात्रौ प्रहरपर्यंतं दिवाकृत्यानि कारयेत् ब्रह्मयज्ञं च संध्यां च वर्जयित्वा विशेषत इति प
थ्वीचंद्रधृतसंग्रहोक्तेश्च नचदार्शिकाह्निकाद्यपि रात्रौ स्यादिति वाच्यं इष्टापत्तेः॰ तथा च माधवेन प्रतिपत्करणे स्पष्टमुक्तं वयं चाग्रे वक्ष्या
मः॰ अस्य दिने करणलोप एव॰ रात्रौ श्राद्धं न कुर्वीतेति निषेधादिति पृथ्वीचंद्रः॰ पात्राभावे कौर्मे॰ उद्धृत्य वा यथाशक्ति किंचिदन्नं प्रकल्पयेत्॰ त
त्प्रतिपत्तिमाह विष्णुः॰ भिक्षुकाभावे गोभ्योन्नं दद्यादग्नौ वा प्रक्षिपेदिति हेमाद्रौ नागरखंडे॰ नित्यश्राद्धं न कुर्वीत प्रसंगाद्यत्र सिध्यति॰ श्राद्धां
तरे कृते त्वन्यत्र नित्यं त्वान्नं न हापयेत्॰ षड्दैवत्यं पृथक्कुर्यात्॰ मात्स्ये॰ ततस्तु वैश्वदेवांते सभृत्यसुतबांधवः॰ भुंजीतातिथिसंयुक्तः सर्वं पित
निषेवितं॰ सर्वं पर्वनिषिद्धमांसमाषाद्यपीत्यर्थः॰ एवं च कृते कादश्यादौ गृहिणां पि भोजनं अस्य वैधव्यत्वेन निषेधाप्रसक्तेः॰ एवं ग्रहणे वेधेपि॰
यत्तु नरहिनान्ते रमाषमांसं व्रतयेदित्युक्तं तद्द्वयमेव॰ औतत्वेन तस्य बलत्वात्॰ देवलः॰ श्राद्धं कृत्वा तु यो मर्त्यो न भुंक्ते यः कदाचन देवा हव्यं न गृ

निर्ण॰ त॰ क्रांतिकन्यानि पितरस्तथा॰ शिवरात्र्येकादश्यादौ स्वघ्राणमेवेत्युक्तं प्राक्॰ यत्र तूपवासो नावश्यकस्तत्रैकभक्तमयाचितं वा कार्यमिति हेमाद्रिः आत्
कर्ण्यः अह्न्येव तु भोक्तव्यं कृते श्राद्धे द्विजन्मभिः अन्यथा त्वासुरं श्राद्धं परपाकं च सेवित श्राद्धशेषभोजनस्य क्वचिन्निषेधमाह॰ हेमाद्रौ प्रायश्चित्तकांडे
मार्कंडेयः पित्रादीनामथान्येषां श्राद्धशेषान्नभोजनं व्रतिनां विधवानां च यतीनां च विगर्हितं अभिन्नगोत्राः व्रतिनो ब्रह्मचारिणः श्राद्धं विशिष्ट
भोक्तारस्ते वै निरयगामिनः सगोत्राणां सकुल्यानां ज्ञातीनां च न दोषकृत् इति तत्रैवोक्तेः तत्रैव जाबालिः विप्रस्त्वन्यगृहे श्राद्धशिष्टान्नं भोज
नं चरेत् प्राजापत्येन शुद्धिः स्याच्छ्राति गोत्रे न दोषकृत् यतीनां वपनं लक्षप्रणवजपश्चेति॰ तत्रैवोक्तेः अस्यापवादमाह स एव श्वशुरस्य गुरोश्चापि मा
तुलस्य महात्मनः ज्येष्ठभ्रातुश्च पुत्रस्य ब्रह्मनिष्ठस्य योगिनः एतेषां श्राद्धशिष्टान्नभुक्तौ दोषो न विद्यते॰ इति केचित्प्रशंसंति मुनयस्तदसांप्रतं
विशेषांतरं तत्रैव हेमाद्रौ जाबालः तांबूलं दंतकाष्ठं च स्नेहस्नानमभोजनं रत्यौषधपरान्नानि श्राद्धकर्ता विवर्जयेत् पृथ्वीचंद्रोदये आश्वलाय
नः श्राद्धं भोजयेत् तस्मिन् गृहे यत्नेन तद्दिने श्राद्धशेषं न शूद्रेभ्यः प्रदद्यादखिलेष्वपि॰ इति निर्णयसिंधौ पार्वणश्राद्धं ॥ अथानुकल्पः तत्र वि
प्रालाभे॰ भोजयेदथवाप्येकं ब्राह्मणं पंक्तिपावनं देवे कृत्वा तु नैवेद्यं पश्चात्तस्य तु निर्वपेदिति शंखोक्तेः एको विप्रः पूर्वमुक्तः विप्राभावे दर्भ
बटून्वा युक्तः निधाय वा दर्भबटूनासनेषु समाहितः प्रैषानुप्रैषसंयुक्तं विधानं प्रतिपादयेदिति देवलोक्तेः अशक्तौ चामश्राद्धं आपद्यनग्नौ तीर्थे
च प्रवासे पुत्रजन्मनि आमश्राद्धं द्विजः कुर्वीत भार्यारजसि संक्रमे इति कात्यायनोक्तेः पृथ्वीचंद्रोदये जमदग्निः यावत्स्यान्नाग्निसंयुक्त उत्पन्ना राम॰
ग्निरथापि वा आमश्राद्धं तदा कुर्याद्दूरे ग्नौ कार्यसंभवे॰ कौर्मे अनग्निरध्वगो वापि तथैव व्यसनान्वितः आमश्राद्धं द्विजः कुर्याद्वृषलस्तु सदैव
हि आहिताग्नेः प्रवासस्थे तत्पत्नी गृहे दार्शं ऋत्विगादिना कारयेत् अमावास्यादिनियतं प्रोषिते धर्मचारिणी पत्नी तु कारयेन्नित्यमन्येन

ऋत्विगादिनेति लघुहारीतोक्तेरिति पृथ्वीचंद्रोदयः आदिपदमाब्दिकादिसर्वपार्वणपरमिति शूलपाणिः स्मृतिं तु पाकाभावेऽधिकारः स्याद्द्विजादी
नां नराधिप अपत्नीनां महाबाहो प्रविदेशागमनादिभिः सदा चैव तु शूद्राणामामश्राद्धं विदुर्बुधाः प्रचेताः स्त्रीशूद्रः स्वपचश्चैव जातकर्मणि चाप्यथ
आमं श्राद्धं सदा कुर्याद्विधिना पार्वणेन तु स्वयं पचतीति स्वपचः विष्णूशनसौ आत्मनो देशकालाभ्यां विप्लवे समुपस्थिते आपद्यनग्नौ तीर्थे च प्र
वासे पत्न्यसंभवे॰ चंद्रसूर्यग्रहे चैव दद्यादामं विशेषतः न पक्वं भोजयेद्विद्वानस्त्रिशूद्रान्कदाचन॰ भोजयन्प्रत्यवायी स्यान्न च तस्य फलं लभेत्
अत्र प्रवासतीर्थग्रहणादामश्राद्धमेव पाकश्राद्धं तु न भवत्येवेति हेमाद्रिरत्नावल्यादयः अपरार्कविज्ञानेश्वरादयस्तु पाकाभावे द्विजा
तीनामामश्राद्धं विधीयत इति सुमंतूक्तेः साग्निके निरग्निके च प्रवासादौ सर्वत्र पाकाभावे आमादिना कार्यं पाकसंभवे त्वन्नेनैवेत्याहुः
अत एव पाकश्राद्धमुक्तं एतच्चानुपनीतोऽपि कुर्यात्सर्वेषु पर्वसु भार्याविरहितोऽप्येतत्प्रवासस्थोऽपि नित्यशः इति मात्स्ये निरग्नेरपि पाकेनोक्तमिति शूल
पाणिकल्पतरू एतदब्दश्राद्धपरमन्ये॰ एकोद्दिष्टं तु कर्तव्यं पाकेनैव सदा स्वयमिति॰ लघुहारीतीयमपि साग्नेरेव निरग्नेर्मृहेकोद्दिष्टमप्यामेन
शूद्रस्य तु दशाहपिंडाद्यामेनेति हलायुधः उत्सन्नाग्निर्नामश्राद्धमेव॰ पूर्वोक्तजमदग्निवाक्यात् मरीचिः श्राद्धं विप्रे द्विजातीनामामश्रा
द्धं प्रकीर्तितं अमावास्यादि नियतं माससंवत्सरादृते॰ स्मृतिदर्पणे॰ मृताहं च सपिंडं च गयाश्राद्धं महालयं आपन्नोऽपि न कुर्वीत श्राद्धमामेन
कर्हिचित्॰ हेमाद्रौ व्यासः आमं दद्यात्तु कौंतेय दद्याद्दामं चतुर्गुणं॰ द्विगुणं त्रिगुणं वापि नत्वेकगुणमर्पयेत् सिद्धान्ने तु विधिर्यः स्यादामश्रा
द्धेऽप्यसौ विधिः आवाहनादि सर्वं स्यात्पिंडदानं च भारत॰ दद्याद्यच्च द्विजातिभ्यः श्रृतं वाश्रृतमेव च तेनाग्नौकरणं कुर्यात्पिंडांस्तेनैव निर्वपेत् पक्षांत
रमाह स एव॰ आमं दद्यात्तु कौंतेय तद्धानं द्विगुणं चरेत् त्रिगुणं चतुर्गुणं वापि नत्वेकगुणमर्पयेत् स्मृत्यर्थसारे सममप्युक्तं षट्त्रिंशन्मते॰ आम

नि॰ सि॰ तृ श्राद्धं यथा कुर्यात्तत्र पिंडदानं कथं भवेत्‌· गृहपाकात्समुद्धृत्य सक्तुभिः पायसेन वा· पिंडान्दद्याद्यथाकालं तिलैः सह विमत्सरः· षष्ठीचंद्रोदये व्यासः·
आमश्राद्धं यदा कुर्याद्विधिज्ञः श्राद्धदः सदा· हस्तेग्नौकरणं कुर्याद्ब्राह्मणस्य विधानतः· एतत्साग्नेः निरग्नेः सदान्नमेव तात्· यत्तु· आमेन पिंडं दद्याच्च
द्विजान्पक्वेन भोजयेत्‌· पक्वेन कुरुते पिंडं मामान्नं यः प्रयच्छति· तावुभौ मनुजश्रेष्ठौ नरकार्हौ न संशय इति तद्धेमादिपरं· देशतो चाराच्च व्यवस्थेति पृथ्वीचं
द्रः· आवाहने स्वधाकारे मंत्रोहः· विसर्जने अन्यकर्मण्यनूहः स्यादामश्राद्धविधिः स्मृतः· आवाहनं तु विषये अन्नव स्तत्र स्वीकुर्यात्‌ कर्तव्ये दूरं स्वहः स्वधा
कारे नमो वः पितर इषे इत्यत्र इषे आमद्रव्याय स्वाहा· विसर्जने वाजे वाजे इत्यत्र तत्साइति स्थाने तर्प्यत तृप्यतेति चोहः· यद्यपि तस्मादूर्जं नोहेदिति सू
त्रेणोहनिषेधः तथापि वचनाद्भवति· तृप्तिप्रश्नो वा गतिरश्च जुषप्रश्नो यथा स्वः· आमश्राद्धे भवेन्नैतदपोशानं च पंचमं अभ्युदयानुवादः स्वल्पवाक्या
छेदनादीनामिवार्थाभावाल्लोपसिद्धेः· धर्मप्रदीपे तु· आमं चतुर्गुणं दद्यादथवा द्विगुणं तथा हेम चाष्टगुणं तद्वदामे हेमण्ययं विधिः· आमहेमतया निषेधो दिग्रा
हुतथैवच· व्यतीपातादिके श्राद्धे नियमान्परिवर्जयेत्‌· गृहपाकात्समुद्धृत्य सक्तुभिः पायसेन वा· पिंडदानं प्रकुर्वीत आमहेमकृते सति· आमश्राद्धं च वृद्धौ
च प्रेतश्राद्धे तथैव च विकिरं नैव कुर्वीत मुनिः कात्यायनोब्रवीत्‌· आमश्राद्धमनंगुष्ठमग्नौकरणवर्जितं तृप्तिप्रश्नविहीनं तु कर्तव्यं मानवैर्ध्रुवं· आवा
हनाग्नौकरणं विकिरं पात्रपूरणं तृप्तिप्रश्नं न कुर्वीत आमे हेमे कदाचनेत्युक्तं· एतच्चावाहनं भवेत्कार्यमर्घ्यदानं तथैव चेति हेमाद्रौ भविष्यादिविरोधाच्चिंत्यं·
शाखांतरविषयं वास्तु· विकिरोप्यामे नेति हेमाद्रिः· शूद्रस्य तु तत्रैवोक्तं· अग्नौकरणमंत्रश्च नमस्कारो विधीयते अग्नये कव्यवाहनाय नमः सो राम·
माय पितृमते नम इत्ययं मंत्रः· मात्स्ये मंत्रवर्ज्यं हि शूद्रस्य सर्वमेव विधीयते· एवं शूद्रोपि सामान्यं वृद्धिश्राद्धं च सर्वदा नमस्कारेण मंत्रेण कुर्यादामान्न
वद्बुधः तत्र पूर्वाह्णे कार्यं· आमश्राद्धं तु पूर्वाह्णे [illegible]कोद्दिष्टं च मध्यतः पार्वणं चापराह्णे तु प्रातर्वृद्धिनिमित्तकमिति हारीतोक्तेः· एतद्द्विजविषयं शूद्रकर्तृ

कं त्वपराह्ण एव· मध्याह्ने खरतरे यत्किं कुतपः समुदीरितः· आमश्राद्धं तु तत्रैव पितृणां दत्तमक्षयमिति सुमंतूक्तेरिति अपरार्के हेमाद्रौ चोक्तं· तदन्नाभावे हे
मश्राद्धमाह हेमाद्रौ मरीचिः· आमान्नस्याप्यभावे तु श्राद्धं कुर्वीत बुद्धिमान्‌ धान्याच्चतुर्गुणेनैव हिरण्येन सुरोचिषा· धर्मः आमं तु द्विगुणं प्रोक्तं हेम तच्च चतुर्गु
णं स्मृत्यर्थसारे हिरण्यमष्टगुणं चतुर्गुणं समं वा दद्यात्‌ हेमाद्रौ भविष्ये· अन्नाभावे द्विजाभावे प्रवासे पुत्रजन्मनि हेमश्राद्धं संग्रहे च तथा स्त्रीशूद्र
योरपि· षट्त्रिंशन्मते तु येपादवर्जेपित्तक्षये हानीति पाठः· यस्य भार्या रजस्वलेति व्यासपाठः· पुत्रोत्पत्तौ तु हेमनियममाह संवर्तः· पुत्रजन्मनि कुर्वीत
श्राद्धं हेम्नैव बुद्धिमान्‌ न पक्वेन न चामेन कल्याणान्यभिकामयन्‌ भविष्ये· गृहपाकात्समुद्धृत्य सक्तुभिः पायसेन वा पिंडदानं प्रकुर्वीत हेमश्राद्धे कृते
सति शूद्रस्तु गृहपाकेन तान्पिंडान्निर्वपेत्तथा· सक्तुमूलफलैस्तस्य पायसं वाप्यविस्मृतं· हेमश्राद्धे पिंडदानं नेति दिवोदासः· स्मृत्यर्थसारे तु विकल्प उक्तः·
तदाशयं न विद्मः· षट्त्रिंशन्मते· नामंत्रणाग्नौकरणं विकिरो नैव दीयते· तृप्तिप्रश्नोपि नैवात्र कर्तव्यः केनचित्क्वचित्‌· अत्र मरीचिना आमाभावे हेमवि
धानमुक्तं न पक्वान्नस्य धर्मप्राप्तेः पूर्ववन्मंत्रोहः· पूर्वाह्णकालता चेह ज्ञेयेति दिक्‌· पूर्वोक्तधर्मप्रदीपोक्तेश्च व्यासः· हिरण्यमामं श्राद्धीयं लब्ध्वा यत्तत्क्रिया
दितः· यथोक्तं विनियोज्यं स्याद्भुंजीयाद्ब्राह्मणात्स्वयं विप्राल्लब्धं भुंजीयात्‌ क्षत्रादिलब्धेषु तु यथेष्टं विनियोगः· तेनापि श्राद्धं वैश्वदेवादि न कार्यं· देवो
द्देशेन सक्तस्य देवतांतरायत्तीभावायोगादिति देवयाज्ञिकः· शूद्रलब्धे तूक्तं तत्रैव षट्त्रिंशन्मते आमं शूद्रस्य यत्किंचित्‌ श्राद्धिकं प्रतिगृह्यते·
न तां वेतोज्जनायालं नियने मित्तिकेन चेति शुद्धितत्त्वे गिराः· शूद्रवेश्मनि विप्रेण क्षीरं वा यदि वा मधु· निवृत्तेन न भोक्तव्यं शूद्रान्नेतरदपि स्मृतं· शूद्रो द्विज
गृहे पक्वं प्रविष्टं तु सदा शुचि· पराशरः· तावद्भवति शूद्रान्नं यावन्न स्पृशति द्विजः· द्विजातिकरसंस्पृष्टं सर्वं तद्धविरुच्यते· विष्णुपुराणे संप्रोक्षयित्वा
गृह्णीयाच्छूद्रान्नं गृहमागतं अंगिराः· पात्रांतरगतं ग्राह्यं दुग्धं स्वगृहमागतं सपिंडश्राद्धे शक्तौ वा दृष्टं माद्रौ संवर्तः· समग्रं यस्तु शक्नोति कर्तुं नैवेह
पार्वणं· अपि संकल्पविधिना काले तस्य विधीयते· पात्रभोज्यस्य सर्वगः संकल्प उच्यते· व्यासः संकल्पं तु यदा कुर्यान्न कुर्यात्पात्रपूरणं नावाहना

निर्ण. तृ.

ग्नौकरणे पिंडांश्चैव न दापयेत्· पात्रं अर्घ्यस्य समंत्रकावाहनस्य निषेधः तूष्णीं तु भवत्येवेति हेमाद्रिः, स्मृत्यंतरे विकिरं तु न दातव्यमिति तन्नीयपादे पाठः
स्मृत्यंतरे· त्यजेदावाहनं चार्घ्यमग्नौकरणमेव च· पिंडांश्च विकिरांस्त्यक्त्वा श्राद्धं सांकल्पसंज्ञकं· हेमाद्रौ वृद्धशातातपस्तु· पिंडनिर्वापरहितं यत्तु श्राद्धं वि
तृयज्ञः प्रवर्तते मदनरत्ने प्रजापतिः॥ नासपिंड्याग्निमान्पुत्रः पितृयज्ञं समाचरेत्‌ अपरार्के [illegible]पायनः॥ एकादशाहं निर्वर्त्य पूर्वं दर्शाद्यथाविधि
प्रकुर्वीतास्ति ग्निमान्विप्रो मातापित्रोः सपिंडतां आसीत्यांत प्रथमदर्शो यो मध्ये कस्मिंश्चिदश्नीत्यर्थः। पित्रादीनां सपत्नीकानां देवतात्वान्मातुरपि तु
त्रानुप्रवेशान्मातुरपि प्राग्दर्शात्सपिंडनं युक्तमित्यपरार्के॥ द्वादशाहे वा कार्यं। साग्निकस्तु यदा कर्ता प्रेतश्चानग्निमान्भवेत्‌ द्वादशाहे भवेत्कार्यं
सपिंडीकरणं सुतैरिति गोभिलोक्तेः॥ साग्नेः प्रेतस्य तु त्रिपक्षे प्रेतश्चेदाहिताग्निः स्यात्कर्तानग्निर्यदा भवेत्‌ सपिंडीकरणं तस्य कुर्यात्सद्दिने ध्रुवी
यकेइति सुमंतुक्तेः॥ मदनरत्ने पुलहरतोपि अनग्निस्तु यदा वीरस्त कुर्यात्तदाग्निही प्रेतश्चेदग्निमांस्तस्य त्रिपक्षे वै सपिंडनं द्वयोः साग्निके द्वादशाह
एव साग्निकस्तु यदा कर्तामृतश्चाग्निमान्भवेत्‌ द्वादशाहे तदा कार्यं सपिंडीकरणं पितुरिति तन्नैवोक्तेः॥ द्वयोरनग्नित्वे भविष्ये सपिंडीकरणं कुर्याद्य
जमानो ह्यनग्निमान्‌ अनाहिताग्नेः प्रेतस्य पूर्णे संवत्सरेपि सः द्वादशे हनि षष्ठ्यां त्रिपक्षे वा त्रिमासि वा एकादशोपत्रमासि मंगलस्य वा
पुपस्थितौ कात्यायन गोभिलौ पदरु वीर्याहराप्यती। तत्रवृद्धि दिने एवेति वाचस्पतिः॥ मदनरत्ने पुलस्त्यः॥ निरग्निकः सपिंडत्वं पितुर्मातु

निर्ण. त.

स्वधर्मिणः। पूर्णे संवत्सरे कुर्याद्द्वितीये दशमेऽपि वा। चतुर्विंशतिमते। सपिंडीकरणं चाब्दे संपूर्णेऽभ्युदयेऽपि वा। द्वादशाहे तु केषांचिन्मतं चैकादशे तथा। षष्ठी
चंद्रोदये बौधायनः। अथ सपिंडीकरणं त्रिपक्षे वा तृतीये वा मासि षष्ठे चैकादशे वा द्वादशे वा द्वादशाहे वैकादशेऽह्नि वेति। एतत्प्रक्रमे मासकार्यं द्वा
दशाहं श्राद्धं कृत्वा त्रयोदशेऽह्नि वा कुर्यान्मंत्रवर्ज्जं हि शूद्राणां द्वादशेऽह्नि संवत्सरांतरे यद्यधिमासो भवेत्तदा मासिकार्थं दिनमेकं च वर्धयेदिति। आशौचां
तं द्वादशस्वरूपमासिकानि तेष्वेवापकृष्य द्वादशाहे न पुनर्मासिकादीनि कृत्वा त्रयोदशेऽह्नि सपिंडनं कुर्यात्। अधिकमासे तु चतुर्दशेऽह्नि कुर्यात्।
अत्र साग्नेरनग्नेर्वोक्तकालाभावे त्रिपक्षादिसंवत्सरांता अनुकल्पा ज्ञेयाः। यद्यपि वृद्धिनिमित्तेनापकर्षो निरग्नेरेवोक्तस्तथापि साग्नावपि ज्ञे
यः। उक्तकालासंभवे वर्षांतादिगौणकालवद्वृद्धेरपि प्राप्तेः। वक्ष्यमाणगोभिलवचनात्। व्याघ्रः। आनंत्यात्कुलधर्माणां पुंसां चैवायुषः क्षयात्। अ
स्थितेश्च शरीरस्य द्वादशाहः प्रशस्यते। एतदाद्यौ चांतोपलक्षणं सर्वेषामेव वर्णानामाद्यौ चांते न पिंडनमिति निर्णयामृते कात्यायनोक्तेः। सर्वेषामिति
त्रैवर्णिकपरं। वृद्धमनुः। द्वादशाहानि विप्राणामाद्यौ चांते तु भूभुजां। वैश्यानां तु त्रिपक्षादौ [illegible] यथावास्यात्सपिंडनं। निर्णयामृते गोभिलः। द्वादशा
हादिकालेषु प्रमादादननुष्ठितं। सपिंडीकरणं कुर्यात्कालेषूत्तरभाविषु। रुद्रसाग्नेरुक्तकाले [illegible] तु गौणकालविधानार्थमिति मदनपारिजातः। मदन राम.
रत्नेऽप्येवं। ऋष्यशृंगः। सपिंडीकरणाद्ध्वमुक्तकाले न चेत्कृतं। रौद्रे हस्ते च रोहिण्यां मैत्रमेवा समाचरेत्। कालादर्शेऽपि। एकादशे द्वादशेऽह्नि त्रिपक्षे वा
[illegible] षष्ठे वैकादशे वाब्दसंपूर्णे वाप्युतागमे। सपिंडीकरणस्योक्ता अष्टौ कालाः प्रकीर्तिताः। तच्च पुत्रेसलिनान्यः कुर्यात्। आहिताग्निषोडशादत्वा न तु कुर्यात्। पिं
डनं प्रोषितावसिते पुत्रः कालादतिचिरादपीति वायवीयोक्तेः। षोडशश्राद्धानां वर्षाद्यूर्ध्वकालाभावे पितान्यदत्त्वा न कुर्यात्। किंत्वत्रैव तानियामि

कनिष्ठभ्रात्रादिना कृतानि [illegible]दसपिंडं तानत्रापि विधिवत्कार्याणि कारिका[illegible]निरापि ज्येष्ठस्यैवाधिकारः। ज्येष्ठेन तातस्मात्रे पृथ्वीभवनिम्नानवद्दशम
न्। अपरार्के प्रचेताः अपि। एकादश्याद्याः क्रमशो ज्येष्ठस्य विधिवत्क्रियाः। कुर्युर्नैकैकशः श्राद्धमादिकं तु पृथक् पृथक्। मरीचिः। सर्वेषां तु मतं
कृत्वा ज्येष्ठेनैव तु यत्कृतं। द्रव्येण चाविभक्तेन सर्वैरेव कृतं भवेत्। अंधादिरिक्ते ज्येष्ठे सति कनिष्ठानां मनधिकारा चौ। अतएवोक्तं पाप्रत्य
वायसमर्थं। आहिताग्निः कनिष्ठश्चेत्कुर्यादेव। अन्यथा पितृयज्ञासिद्धेः। एवमावश्यकवृद्धावपि कनिष्ठोऽन्यः सपिंडो वा कुर्यात्। भ्रा
तावा भ्रातृपुत्रो वा सपिंडः शिष्य एव च। सहपिंडक्रियां कृत्वा कुर्यादभ्युदयं ततः। यागोऽन्यकाम्यं यत्कर्म वत्सरात्प्रथमादृते तदा न मरणात्
ऋभुहारिते वचनं काम्यानां करणावश्यकेष्टापूर्तादेनापकार्ये। एतत्साधारणविकारस्थनाधिकाराहृताधिकारार्थं। अभ्युदयवचनं नांदी
श्राद्धनिमित्तकर्ममात्रपरमिति हेमाद्रिः। तेन प्रदेशांतरस्थे कनिष्ठः सपिंडनं विनैव वृद्धिं कृत्वा पुत्रसंस्कारं कुर्यादिति श्रीदत्तो। किंच
पत्नी ला भ्रातृपालिकः। महागुरौ प्रेतभूते वृद्धिकर्मणि युज्यते इति निषेधात्। भ्रातृस्य भ्रात्रादिः सपिंडनं कृत्वा तस्य मृकन्यादेरभ्युद
यं कुर्यात्। न तु स्वपुत्रसंस्कारे। संस्कार्यपितुः सपिंडनं विना वृद्धौ देवताभावादिति साह। तन्न। देवताप्रयुक्तापकर्षस्य निरस्तत्वात्
तत्र विदेशस्थेन ज्येष्ठेन पुनः कार्यं। पत्नीपत्नीत्वं कर्म प्रेतशाबविहाराद्गु। तथा यस्याधिकारे भ्रात्रा सपिंडीकरणात्पूर्वे देशांतरगतानां च
उत्राणां तु कथं भवेतु। कृत्वा तु वपनं कार्यं दशाहं नांदिकोदकं। ततः सपिंडीकरणं कुर्यादेकादशेऽहनि। द्वादशाहे न कर्तव्यमिति शाता
तपोऽब्रवीदिति वचनाच्च भिन्नः। पूर्ववचनेन च ———— चिंत्यं। स्वस्वार्थसार्धेतु विभक्तानाज्ञा द्विकामाश्च पुत्रात् तस्य सपिंडीकरणं तु युक्तमिति च
कं। अत्र दत्तकस्य तत्पुत्रो श्राद्धानां च विधिपः प्रामुक्तः। केचित्तु वृद्धिं विना ——— निष्ठस्य सपिंडनमाहुः। मातापित्रोर्दत्तः केचिज्ज्येष्ठभेदशांत

रस्थिते · कनिष्ठानपकर्तव्यं सपिंडीकरणं तत्रैव कार्यमिति स्मृते — तेवारो । पितेर्ज्येष्ठे पित्राचापि विनस्यति · षण्मासान्ने निवर्तेनन
दा कार्यं कनीयसा · संवर्तः । पुनः सपिंडीकरणं श्राद्धं पार्वणवच्चरेत् · अर्घ्यं — जनं नैवापि — संयोजनं न चेति · नेच यस्मात्न म्रक्षेत्
त्रोषिताचासितेपुत्र इत्या । द्विविरोधा न्योपेक्ष्याः । व्युत्क्रमप्रमृतौ तु हेमाद्रौ आह · मृते पितरि यस्याथ विद्यते च पितामहः । तेन देयास्त्र
यः पिंडाः प्रपितामहपूर्वकाः तेभ्यश्च पैतृकः पिंडो नियोक्तव्यस्तु पूर्ववत् · मातर्यथ प्रमीतायां विद्यते च पितामही । प्रपितामहीपूर्व
र्वक्रमात्तत्राप्ययं विधिः । एवं प्रपितामहजीवने नदुहित्रादिभिरीर्यं · नरा हस्तु मुं तु । अप्यन्यामपि पिंडानामके मात्यसपिंडने · पितश्च
मप्युतप्रेतद्वितीयमेन्यवस्थितः । यत्तु व्युत्क्रमात्तु प्रमीतानां नैव कार्या सपिंडतेति तन्मातापित्रोर्मृतौ भिन्नविषयं · व्युत्क्रमेणाप्यतानां तु सपिं
डीकृतिरिष्यते · यस्मिन्नात्रा यस्य पिता भर्तानैष विधिः स्मृतः इति माधवीये स्कांदे से कैः । मदनरत्नादौ चैवं · अथ प्रपितामहादिभिः पितुः
सपिंडने कृते पितामहे मृते तस्य पिंडने सति पुत्र — नस हस्त्रतु: सपिंडनं कार्यमिति हेमाद्रिमतमाह · अन्यैरनेनाप्यन्यं नेपितामहे वा
पुत्रानरैरसंस्कृते यसंस्कृताभ्यामेव वा पितुः सपिंडनं कुर्यात् · असंस्कृतेनासंस्कृताया पूर्वैः पौत्रप्रपौत्रा त्रके । पितरं त्वसंस्कृत्यारि
ति अपमपक्षो वृत्तीदितिष्ठ दोगयरिशिष्टात् · असंस्कृतोदाहा यदितिकेचित् · असपिंडीकृताधिपतिमुनतं · अतएवोक्तं · नत्रैव ·
पापिष्ठमपिशुद्धं च शुद्धं पापकृता पिता · पितामहेन पितरं संस्कुर्यादिति निश्चयः । पापिष्ठमकृतसपिंडनं न तु पतितत्वादि · अभिशस्त
पतिभ्रूणघ्नः स्त्रियः श्राद्धिकारिणीर्न संस्कारादिति वैजवापोक्तेः पापकर्मिणोऽसंस्कृतेऽनानिग्नितेन यो केशोमुक्त निर्णयामृते · पूर्वयोः पु

त्रार्भो वे तु पौत्रः कुर्याद्वा पितामहः · पितुः प्रमासं च वर्षायामिन्छतिकेत्रेणकादशाहासकर्तव्यं श्राद्धं षोडशं · नैनत्सौत्रेण कर्म यं पुत्रवांश्च पितामहः ।
तुः सपिंडनं कृत्वा कुर्यान्मासानुमासिकमिति कात्यायनोक्तेः । अपरार्के भूकपायोप्येवं · नेन सपिंडनस्या नित्यता स्कृतसपिंडनयोरेव बाधकर्तुमे
केशाषिया रेबाने: परस्ताकृते सपिंडकरणे प्रेतः पार्वणभाग् भवेदिति हारीतविरोधश्च · के चित्तुमातरमा वे पितामहवार्षिकमुपपाद्यः । तत्त्राद्ध्रा
उक्तमिति नेममातः इच्छया पवन्नैव · पितृमहस्य चेद्यादेकोद्दिष्टेन पार्वणमिति वाचस्पतिप्रलगगोक्तं । अन्यार्थी योग पद्येत प्राधा
न्यात्पितुः सपिंडनं कृत्वा पूर्वयोः कुर्यात् · पितामहे मृते दशाहान्तः पितृमृतौ पितुः संस्कारं कृत्वा पितामहस्य पुनः सर्वमाचरेत् · द्व
ले दशाहे नेपं · अत्र मत्या पित्रा — तेनपौत्रोऽपि पितामहश्राद्धं प्रकांते पितृम्रतेनान दाशौचं चैवं ह न्नेव पौत्रः पितामहकर्म कुर्यात्संकां
तत्वादिति मदनपारिजातन पृथ्वीचंद्रे · यत्तु उत्तरालि — रोद्रोऽहृष्णी याम्यसायं पितृभेषु चाग्निभे · श्मश्रुकर्मसकं चवर्जं
येत्प्रेत कार्येष्वपि बुद्धिमानित्युदित सापिंडनप्रकरणेया — न्मुख्य कालेनिषिद्ध ऋक्षे सपिंडनापकर्षः सर्वकालेषु तद्बलेत द्वर्ज्यमेव
पूर्वोक्त काला प्राप्ता नित्यो दशाश्राद्धानि कार्याणीति । तिवाचस्पति मिश्राः । तत्र · अस्य परिभाषानेमवान्यात्सावकाक्शमपिस्ता
त · अस्यप्रेतमा अदेवत्यत्वाभावे · अथ पत्नी पूर्वजैः हेमाद्रौ बृहस्पतिः भर्तृगोत्रेण नाम्ना च मातुः कुर्यात्सपिंडनं · यत्तु
विष्णुः पितृगोत्रं — कृत्स्नं कुर्यात्कन्या गोत्रसंस्थितस्य पुराद्विविवाह तु पितृगोत्रेण धर्मविदिति तद्दृ — नपोक्तेः ।
चानेकवचनेषु — स्यात्सा मातामहेन वा स्याहोक्तेः तत्र व्यवस्था कामभवविषये नीचस्थिता पितामह्यामातुः कुर्यात्तु
पिंडनं · प्रमीनपितृकैः पित्रा नासि · पुत्रिक — पित्रा मातुः पित्रा · लोगाक्षिः पितामह्यादिभिः साधर्म्यात्तरं तु सपिंडनेन

पितरि ध्रियमाणे तु तेनैवोपगतेसति॰ शंखः॥ मा ---- डीकरणं कर्थं कार्यं ---- सुतैः। पितामह्यादिभिः सार्धं सपिंडीकरणं स्मृतं॰
येनकेनापिमातुः सपिंडीयत्र ---- ष्टकारो मातुश्राद्धस्य ---- अपितामह्य ---- हकार्यं॰ नारायणविष्टकाश्राद्धायां पञ्चतेहति॰
पितामह्यादिभिः सहैं मातुःश्राद्धं समाचरेदितिशातातपोक्तेः॥ अपुत्रायांतुवैदीनसिः॥ अपुत्रा ---- नाथां तुपतिःकुर्यात्
त्सपिंडनं॰ श्वश्र्वादिभिः सहैवास्याः सपिंडीकरणं भवेत्॰ यत्तुलघुहारितः॥ पुत्रेणैवतुकर्तव्यं सपिंडीकरणं स्त्रियाः॥ पु ---- पत
पुनात्वन्येभ्यातृपुत्रादयो पियेइति॰ यच्चमार्कंडेयपुराणे॰ सापिंडीकरणं स्त्रीणां पुत्राभावेन विद्यतेइति॰ तत्पुत्रपत्यभावे
वेतेपं॰ अत्रसपत्नीपुत्रो पितेयः॥ बह्वीनामेकपत्नीनामेका चेत्पुत्रिणी भवेत्॰ सर्वास्तास्तेन पुत्रेण प्राहपुत्रवतीर्मनुरि
ति॰ मनुरकेरनतपरत्वात्॰ यत्तुशातातपः॥ स्त्रीणांपितारमातुरक नकार्यंसह पिंडना॰ पितुरेवसपिंडत्वं तस्याअपिकृतं भवे
दितितदशक्तपरं॰ केचिद्विद्वांसस्तमिविहेमाद्रिः॥ अन्वारोहणेतुभर्त्रैव ... पिंडनं॰ ... ---- पत्नी तेनसह पिंड
नं॰ अर्हतिस्वर्गवासं चयावत्भूतसंप्लवमिति शातातपोक्तेः॥ पत्या चैकेन कर्तव्यंसपिंडीकरणं स्त्रियाः॥ सामृता
पि ... कत्यंगतामंत्राद्ब लिवलैरिति यमोक्तेश्च॰ अत्रैक शब्दः पितामह्यादिपक्षनिवृत्यर्थः॥ पत्निपदं चेतरपरं॰ सपिंड
नसपार्वणोकोद्दिष्टरूपत्वादितिमाधवकल्पतरुमदनरत्नादयः॥ अन्येतुभर्त्रैवैकेनाकु॥ स्वेनभर्त्रा सहैवास्याः सपिंडीकरणं भवेदित्येकका
रश्रवणात्॰ पृथ्वीचंद्रोदयेपि विकल्पउक्तः ... इत्ययुक्तं॰ यदा ... माद्धिमेनेश्चोरेकः॥ पिंडस्तदावर्गेणसह॰ यदामाधवपृथ्वीचंद्रादिमते
तेष्वेकपिंडस्तदैकेन पार्वणं ... चैकेनेति॰ अनौमातापितुर्मसपिंडा ----

तेनैवपत्नीपिंडेन संयोज्यैकोद्दिष्टं तंपिंडद्वयं तु सितृ्ादिभिः संयोजयेत्॰ अंत्यपक्षएवयुक्तः॰ स्मृत्यर्थसारेतु अन्वारोहणे स्त्रियाः पृथक्सपिंडनं नास्ति
भु ... स्त्रिया अपिकृतं भवतीत्युक्तं तन्मतांतरमत्रैकः इदं ब्राह्मादिविवाहेषु ज्ञेयं॰ आसुरादिषु तु मत्तारोहणे ॥ शातातपः तन्मातामातामहा
सान्ध्रुवाश्राद्धसपि ---- आसुरादिविवाहेषु विन्नानामपि पितांभवेत्॰ मातामह्यामातुःपितामह्याः पातृपितामहेयोज्य॰ त्रर्मसंवस्तरकृते॰ मा
तामहामहेनहृदित्याहभगवान्शिवः॰ इदमासुरादिपरंचोक्तंप्राकू॰ हेमाद्रिस्तुब्राह्मादिष्वपि सवेदेशाचारादिकल्पमाह॰ अतएवगुर्जरेषु को
किलमतानुसारिणां मातामहएवमातामहइति श्राद्धेप्रयोगः॰ सापिंडनं दृश्यते॰ हेमाद्रावा ... बोपिकाठकस्यापपापुत्री॰ अ ---- संजयजीवनः
पुत्रास्तेन्यकुर्वंत्येतएवं नारदीमिनासती॰ यदिपविज्ञलेख रामानामहेनमाद्य॰ सपिंड्योपिता श्राद्धं तन्मातृश्राद्धं नित्यमि ---- मत्रवाहश्राद्धे
ऽहोगपरिशिष्टे॰ पत्न्याः पितृस्यसत्त्वे तु श्राद्धदानमुपक्रमेदितितन्नेमाहेषयमेव॰ नपाकुत्सके मायाजमाचारं चरेबुधइत्युक्तेः॰ अस्य द्वाव
पवादमाहतत्रैवच्यवप्रपात॰ कुर्यान्मातामहश्राद्धं सर्वदामातृपूर्वकं॰ विधिज्ञोविधिमास्थाय दृष्टोमातामह हारितः॰ केचित्तत्पुत्रिकापुत्र
स्माकुः॰ पत्युः सापिंड्यवोगात्॥ सर्वासावेस्व यंपत्न्यःस्व सर्तृणाममंत्रकं॰ सपिंडीकरणं कुर्युस्ततः पार्वणमेवचेति॰ यत्तुवचनं॰ अपुत्रस्यप
रेतस्यनैवकुर्यात्सापिंडनामिति॰ यच्चापस्तंबः अपुत्रायम्रता॰ केचित्पुरुषावा स्त्रियोपिवा तेषांसापिंडनाभावादेकोद्दिष्टं नपार्वणमिति॰ तत्सु
---- तत्पुत्रो ---- पित्रपासापर्यमितिमाधवः सपिंडीकरणादूर्ध्वमेकोद्दिष्टं विधीयते॰ अपुत्राणां चसर्वेषामपत्नीनां तथैवचेति हेमाद्रौ
---- अत्रैवसोक्तं ---- न्येतुहि विधवचाकादर्शनादिकल्यमाहुः स्मृत्यर्थसारेपि॰ ब्रह्मचारिणामनपत्न्यानां चसापिंडनं नास्तितेषां सदैको

नि·र्ण·त·

———यतानां —— —— नास्तिकिंत्वेकोद्दिष्टरोद्धपार्वणंकार्यंतत्रापात्रदैवतैः एकोद्दिष्टादीनांतदपिनेत्युक्तंप्राक्‌· इदंग्रहणात्पूर्वमतोऽनुरा
हादित्य —— नंसर्वकार्यमितिभट्टचरणाः सपिंडनविधिमाहवैजवापः समानसंवत्सरेरत्नायुद्दपात्राणिप्रयुनक्येकंप्रेतायत्रीणिपि —— प्रेतपा
त्रंपितृपात्रेष्वासिंचयेतियेसमानाइतिद्वाभ्याभिचांपिंडेयाभिमर्शनिएषवानुगः प्रेतःपितरस्तेरहोमितः शिवंभवतुशेषाणांमायुताना
चिरंजीवनः समानीवः संगछध्वं संवदध्वमितिदे यद्यपितत्रापिदैवरहितमेकार्घैकपवित्रकं नेवाग्नौकरणंनचात्रतआवाहनचाभिनंत
मितिमार्कंडेयेनोक्तं· तथापिसपिंडीकरणंश्राद्धंदैवपूर्वंनियोजयेदित्यादिवचनात्पार्वणवत्कल्प्यः प्रेतांशेचावाहनं अत्रकामकालौविश्वेदेवावित्युक्तंप्रा
क्‌· मैत्रायणीयपरिशिष्टे· पित्र्यविप्रकरेहेम· साग्नेरग्निपात्रवेदिह· पितृगोभिलः अनुक्तकालेष्वपिपितृव्युत्क्रमेणामन्त्रणापि आमेनवापिसपिंडं
——— स्वावापित्रकस्मयोरिति· तदापिहि मातापितृभिन्नपरं· आपन्नोपिनकुर्वीत श्राद्धमामेकदाचिदग्निरिति वचनोक्तेः· कामधेनौ· सपिंडीकर
णंयावत्प्रेतश्राद्धानुषोडश कं पक्वान्नेनैवकर्तव्यंसामिषेणाद्विजातिभिः विश्वप्रकाशे· प्रेतःसपिंडनादूर्ध्वंपितृलोकंतुगच्छति· कुर्यात्तस्यतुपा
येयंद्वितीयेह्नि सपिंडनात्‌· स्मृत्यर्थसारोप्येवं· ततोऽवृद्धिं कुर्यात्‌· एतन्मलमासेपिकार्यं· अधिमासेनकर्तव्यंश्राद्धमाब्दिकंयतस्तथा· तथैव
मयंयत्कर्मवत्सरात्प्रथमादृते· इति हेमाद्रौहारीतोक्तेः· इतिकमलाकरभट्टकृतेनिर्णयसिंधौसपिंडीकरणं· अथप्रथमाब्दनिषिद्धानि

श्रीमेरोः

हेमाद्रौ [illegible] स्नानंचैवमहादानंस्वाध्या —— ग्नितर्पणं· प्रथमेब्देनकुर्वीतमहागुरुनिपातने· अग्नितर्पणंलक्षहोमादिनत्वाधानं· तत्रप्रथ
मनाश्सवत्सरेव· तदाहहेमाद्रौवृद्धमनुः पितुःसपिंड —— रणंवार्षिकेमृतवासरे· आधानाद्यपसंप्राप्तानैवप्राग्वत्सरात्‌· आदिपदंद
हाद्वृद्धिनिमित्तकर्मपरं दिवोदासीयेमहालयपिंडन्यनन —— —— संवत्सरेव संवत्सरेनकुर्वीतमहागुरुनिपातने· गौडनिबंधेताभावः

सपिंडीकरणादूर्ध्वंप्रेतःपार्वणभुग्भवेत्‌· वृद्धिश्राद्धेपूर्वयोग्यश्च —— स्वधाभुक्सद्भवेत्‌· सपिंडनाभावेनाधिकारीत्यर्थः गृहस्थः
सपिं[illegible]मीत्यर्थः अतएवप्रेतकर्माण्यनिवर्त्यचरेन्नाभ्युदयिकीं आचतुर्थंततःपुंसिपंचमेशुभदंभवेदितिज्योतिषेउक्तं· माधवीये
देवलः प्रमीतौपितरौयस्यदेहस्तस्याशुचिर्भवेत्‌· नदैवंनापिवापित्र्यंयावत्पूर्णोनवत्सरः· इदंवर्षेतत्सपिंडनपरं· तथैवकाम्यंय
त्कर्मवत्सरात्प्रथमादृते इतिलघुहारीतापिकवाक्यत्वात्‌· वृद्धिनिमित्तापकर्षेतुवर्षमध्येपिकाम्यादिस्त —— वेतिगौडाःपित्र्यंस
पिंडनं· अतएवलौगाक्षिः अन्येषांप्रेतकार्याणिमहागुरुनिपातिते कुर्यात्संव[illegible]वाकुश्राद्धमेकंतुवर्जयेत्‌· दाहा —— येदूरा
हान्नकार्यं· तत्रचोत्तरांतस्याप्रतिबंधकत्वात्‌· आद्यश्राद्धमशुद्धोपिकुर्यादेकादशेहनीत्युक्तेश्च· एकंसपिंडनं पत्न्याद्यैत्वप
वादमाहऋष्यशृंगः पत्न्याःपुत्रस्यतत्पुत्रभ्रात्रोस्तत्तनयस्यच· स्नुषायाश्वशुरस्यापिवर्जोभ्यसंघातमरणंयदि· अर्वागब्दान्मातृपि
तृपूर्वंसापिंड्यमाचरेत्‌· लौगाक्षिः पत्न्यालीपुत्रस्तपापौत्रोभ्रातातत्सुतएवच का अपि· पितरौचयदेकस्मिन् [illegible] स्त्रियेरन्वासरेतदा
आद्यमेकादशेकुर्यात्त्रिपक्षेतुसपिंडनं धवलनिबंधे· महागुरुनिपातेतु —— —— यथाविधिः कुर्यात्संवत्सरादर्वागेकोद्दिष्टानपार्व
यां· स्मृतु मातापितृपात्राना भार्यापुत्रस्तथास्नुषा· एवा —— —— चरेच्छ्राद्ध —— स्य —— —— —— पिसापिंडनपरंपितुर्मरणावन्यस्य
श्राद्धनची हत्यर्थः शुद्धिदेवलः अन्नश्राद्धपरान्नंगंधमाल्यंचमेपुनर्वर्जयेत्‌ गुरु —— तु —— —— —— रः शुद्धितत्वेदेवलः महागुरुनि
पातेतुकाम्यंकिंचिन्नचाचरेत्‌· आर्त्विज्यंब्रह्मचर्यंचश्राद्धंदेवक्रियांतथा· नरेत्सदि —— —— —— —— —— —— पीमित्यन्ये हेमाद्रौ

भविष्ये गयाश्राद्धं मृतानां तु पर्वते विप्रशास्थने त्रिस्थलीसेतौ ईंगारूडे तीर्थश्राद्धं गयाश्राद्धं श्राद्धमन्य — — — — — — महागुरु
निपातेषु इहसपिंडनाभावे इ कुमारोसपिंडनापकर्षक्रम ध्योपिद्रादिकार्यमेव पितुःसपिंडमं कृत्वा कुर्यान्मासा — — कमित्ति बंदोगपरिशि
ष्टात् सपिंडीकरणादूर्ध्वं प्रेतः पार्वणभुक्स्तुवे हिनिमात्स्यात् · ततः प्रभृतिवैश्वेन पितृसामान्यमश्नुते पिंडनोपितृलोके — — श्राद्धं समनंतेः
निहारीतापीति श्लपाणिः यजुःकातीयं · सपिंडीकरणादूर्ध्वं नरयाप्तानिमासिकं एकोद्दिष्टविधानेन रपार्ष्णियाहरोपेन कर्तीति तदेको
द्दिष्टविधिनाद्यादित्यन्वयः तुर्यपादे पार्वणे पोरेकव्यंड· तथा · अस्थिक्षेपे गयाश्राद्धं श्राद्धं चापरपक्षिकं · प्रथमेब्दे न कुर्वीत तथैव पि
तुःसपिंडनं · अस्यापवादः अस्थिक्षेपं गयाश्राद्धं श्राद्धं चापरपक्षिकं प्रथमेपि कुर्वीत यदि स्यात् वृद्धिकं मान्तकः पतितानां गयायां वि
शेषो वास्ते · क्रियते पतितानां च गते संवत्सरे क्वचित् देशधर्मप्रमाणत्वाद्गयश्राद्धं स्वबंधुभिः अथ विधानानि · तत्र पंचकमृते
मदनरत्ने गारुडे आहीकृत्वाधनिषाधमेतन्नक्षत्र — — रेवत्यंतं सदाद्दृष्यमशुभं दाहकर्मणि शवस्य तु समीपे तु क्षेप्यास्तथा पुत्र
जास्तदा दर्भमयास्तच्चत्वारः ऋक्षमंत्राभिमंत्रिताः ततो दाहः प्रकर्तव्यस्तै[illegible]सु — — केसर· मृतकांते ततः पुत्रैः कार्यं शांति
कपौष्टिकं · पंचकेषु मृतो यो वै न गतिं लभते नरः तिलां श्चैव हिरण्यं च मधुहिरण्यघृतं दहेत · क्रियानिबंधे · भाजनोपानहौ छत्रं
हेममुद्रा[illegible]वाससी दक्षिणा दीयते विप्रे सर्वपातकमोचनी · मदनरत्ने मार्ग्ये · वसिष्ठ दामिनीनां स्याद्गुणुभौ मद्दरनेष्वरेः त्रिपादर्क्षम
संयोगो द्विपाद्योगो द्विपुष्कर योगे तु मृति मेत्यन्न राघवे · दहनं मरणे वृद्धौ त्रिगुणं स्यात्त्रिपुष्करे · एवं नत्र्यप्येचमपश्चात् दोषा
पत्तितेपि तिलप्रदेय एवं वापिरा[illegible] — येतः · श्रेष्ठे तु पौर्णिधाया कृत्यं दाहं [illegible]प्रयेसैतकोपरि · तद्दाहमंत्रमाह बोधायनः अस्मात्त्वमिति मंत्रेणाति

तिलापि संप्रदाहयेत · द्विति[illegible] कपोर्दोपमि — — हु हु बंपोहति · नातस्यो [illegible]गानि दहसमंततो नेरऋभांस वेत · ततस्य दाहे कर्तव्योपि च ताचा
ततषु ततषु · अपवातोदिन कुर्याद्दाहस्तु विधिपूर्वकं वा — — पंचकजीवामता यारिक पंचन · त्रिपुष्करयाम्य सेवा कुर्यात् जान्मारे इहं ततानिषि
[illegible]तस्यां नारायणविधानं समुदीयते · दर्भाणां प्रथमाः कार्याः पंचाणां मृतवे — — ताः यज्ञोपवीतेनानुलिमालाभिः मदनावर्दहेत · प्रेतदाहे प्रेतसरव:
प्रेतपप्रेतभूमिपः प्रेतहर्ता पंचमस्तु नामान्येतानि चक्रमात् · प्रेतयानं मार्गपुष्पं — — पित्ता · प्रथमा शिरसि · द्वितीया नेत्रयोः तृतीया
वामकुक्षौ चतुर्थी नाभौ · पंचमी पादयोर्न्यस्य तदुपरिनामयोक्त घृतेन दृश्यताः [illegible]ायताम · स्वक्रमिति यं सप्त्यं कृत्वा स्वान्य
दुतोहिनी दाने तथा · मृतकांते ततः पुत्रः कुर्याच्छांतिकपौष्टिकं · मांस्यपात्रस्थितं तेलं · वीक्ष्य दद्याद्द्विजन्मने · ब्रह्माविष्णुमहेन्द्रादवरुणाद्यो
तयेतः माषमुद्गयव व्रीहि त्रिपंगवादिकयवाज्ये · स्वर्णदानं रुद्रजाप्यं लक्षहोमादिकादिकं चेत् · गोभूदानं षडंशेन कुर्याद्दोषोपशांतये ·
— — — — — तत्कर्मतर्पणं तत्र · स्वादितान्मुखं · प्रास्या दुःखमितत्रयपंचकुलनेद्हवपामिति · ततो निर्हरणं कुर्याद्विषमाग्निविधिःस्मृतः · इतरो निरव
निरवने देवजलेवाप्रतिपादयेत · त्रिपाद्दृष्यमृते तत्र हिरण्यशकलं मुखे · तस्याप्रिहमयं कुर्यात् पुरुषत्रितयं ततः होमं प्रतिमुखं कुर्यात्तेपावकु
वपामिति कनकं हीरकं नीलं पुष्पं प्रवालं च मौक्तिकं · पंचरत्नमिदं प्रोक्तं ऋषिभिः पूर्वदर्शिभिः रत्नानां चाप्यभावे तु स्वर्णं कर्षार्धमेव वा
करणं स्यादप्यभावे तु आज्यं तत्र विनिक्षिपेत · तथा एकार्धं तिपुलं काम्यं नदर्धं तदर्धकं न चपट्रैचेफकं वापि दद्याद्दिपाप्यशक्तितः
तथान्यत्र · स्वगृह्योक्तविधानेन कृत्वाग्नेः स्थापनं ततः अन्वाधानं निर्वपणं — — — — — — यधर्मराजाय मृत्यवेंतकाय

नि॰ र्ण॰ सिं॰

पत्वैवस्वताय कालाय सर्वभूतक्षयाय च । औदुंबराय दध्नाय नीलाय परमे —— कोदरा —— त्रा —— तेषां विधिनार्पणं कृ
त्वा एकैकमाहुतिं हुनेत् । कृष्णां गां कृष्णवत्सां च हेमनिष्कसमन्वितां दद्याद्विप्राय यमो नामायं प्रीतोऽस्त —— —— रथात्प
राकेः पुनर्वसुज्ञाराविषाकृत्तिको नर भफाल्गुन । पूर्वासाढा विशाखा च त्वयमनात्रिपादृक्षं मयूरचित्रे गर्गः मतः त्वा —— न उपनी
गृहयस्य प्रविष्ठासोऽनिष्टे दयकरस्तु ते । अग्निरात्म्यके मायातिहृत ददाहि परिग्रहः तत्राशौचं प्रवक्ष्यामि धर्म —— यथा रुणाघु
ताकृनामग्ने दुंचामुरववुधः औदुंबरीणो विधिवत्तान्न शांतिः कृतमेघेन । सावित्र्या दशसहस्रेण क्षीरस्रोतिं च कायेत् । कपिलादि
—— दृतांते भ्रारिहितिया । अपब्रह्मचारिम्नतो शौनकः । ब्रह्मचारिम्नतोरीतिं कपयामि समासतः । तत्रावकीर्णदोषस्य प्रायश्चित्तं
प्रशांतये । द्वाहरावृष ३ वं वाच्यं बंधं त्यापवावरेत् । स्नानको ब्रह्मचारी च निपतं प्राप्नुयाद्यदि । संयोज्य चाके विधिना संयोज्याग्नौ
ततःपरं देशकालौ स्मृत्वामुकगोत्रामुकनाम्नाम्नस्य ब्रह्मचारिणो व्रतविसर्गं करिष्ये इत्युक्त्वा हेम्ना नांदीश्राद्धं कृत्वाग्निप्रतिष्ठा
घापारं तेवतस्म तभि व्याहृतिभिरग्नये व्रतपतये न —— नानुध्यानफलसंपादनाय विश्वेत्यादेवस्य चाज्यं कृत्वा स्विष्टकृद्धोमादि
समाप्य पुनर्देशकालौ स्मृत्वा कृविवाहं करिष्ये इत्युक्त्वा हेम्ना नांदीश्राद्धं —— कृत्वा स्वगृह्यवचहरियालिस्थापीत समेव स्त्रयु
न चावेष्याग्निं प्रतिष्ठाप्य यातीतेऽग्नेर्बृहस्पतये विवाहविधियोजकाय चय स्मैव कामं कामायति कामायव्याहृतिभिश्चाज्यं हुत्वा ॥ श्रीरामः
स्विष्टकृदादि समाप्य केनापवा —— रावचरेत् । विधानमालायां । यथाकुर्वे ब्रह्मचारी निर्वनं प्राप्नुयाद्यदि —— क्षयमाप्नोति सो
पिंडुगतिमाप्नुयात् । मृतस्य म्रियमाणस्य षडब्दं तत्मादिशेत् । त्रिंशद्धस्तो ब्रह्मचारिण्यादधात्कापीले कान्तदात् । हस्तमात्रा कर्पा
मा —— दद्याद्धस्माजिनादि च । पादुकाच्छत्रमाल्यानि गोपीचंदनमेव च । मणिप्रवालमालाश्च पुस्तकादि समर्पयेत् । एवं कृते विधाने

न विघ्न कोऽपि न जायेत अत्र मूलं चिंत्यं कुष्ठ —— मृतोतु यमः मृतस्य कुष्ठिनो देहं निखनेद्दोषभूमिषु । शतरात्रेण यासश्चाद्धृत्यान्यत्र
नं रहेत् । न गंगायां प्लवनं कार्यं निक्षिपेया —— —— तो षडब्दव्रतपूर्वेण विधिनात्यं कर्तुं चरेत् । ततोऽस्थिसंचयं तस्य गंगायां प्रक्षिपेत्सुधीः
मासि मासि ततः कुर्यान्मासिश्राद्धानि पार्वणात् । इत्येतत् कुष्ठकुष्ठिमरतो —— कथितं शास्त्रकोविदैः । रुद्रमतेऽसरिषेः । शृणुकु
छगणां विन उत्तरोत्तरतो गुरुः । विवर्णिका तु दद्रुश्च चर्माचर्वीय स्त्रीयकः । विकर्त्तुं व्रणताम्रौ च कुष्ठ मृतः —— थाद्धकमित्यलं । मतेन
प्रापयेन्न पुंमणवा तरुमूलके । न पिंडं नोदकं कार्यं न च दानक्रियां चरेत् । षण्मासीयं त्रिमासीयं मृतः कुष्ठी कदाचन । यदि —— मागरेदाहयेत्
चांद्रायणं च । अकृतप्रायश्चित्त कुष्ठ्यादिदाहे त्वयं प्रायश्चित्तं अत एव कुनख्यादि रियस्कुष्ठिनोपि द्वादशाब्दं तत्र ल्पप्रोक्तं —— मरणे
न मानावात्र मुक्ते कार्मे । क्रियाहीनस्य मूर्कस्य महारोहणस्य च नेति । यथा वरणस्याद्भुमेरणातमशौचं । मुहारोगात्ते । वातया भस्मरी कुष्ठ —— दर
भगंदराः अर्शासि ग्रहणी त्येष्ट महारोगाः प्रकीर्तिताः इति । रजस्वलायास्तु दुष्टत्वात् तत्र रजस्वलायाः प्रेतायाः संस्कारादीनि नाचरेत् ॥ पौत्रराशो
स्नानांतार्धर्मेण दाहयेत् । अतः प्रक्षाल्य काष्ठवद् भावयाहो धर्मेण च । संकटेनुमरन तत्रैस्मत्येनरे । आशौचे तु न तिष्ठेत् दाहयेद्दतरापि रजस्वलानु
पेन स्नापयित्वा तु मंत्रतः आपोहिष्ठेति त्रिसृभिर्हिरण्यवर्णा इति सृभिः पवमानानुवाकेन यद्देवीति दशभिः तनोम त्पवित्रेण गोमूत्रेण
पञ्चद्विता स्नापयित्वान्य —— —— वधर्मतः तदाहादिकं ततः कुर्यात्प्रजापतिवचो यथा पाये मदूपी वेद्यमपोऽस्मसा ॥ इति मिताक्षरायां पंच
भिःस्नापयित्वा तु गव्यैः —— —— —— —— —— तां कृत्वा दाहयेद्विधिपूर्वकं । गृहकारिकायां अंतरितमतायां तं मक्रावष्कृत्य समाहृतः उद
क्यास्त्रैकानारी चरत्रांद्रायणत्रयं —— —— —— —— चरशतरर्पादिकैः संख्याप्य भस्मगोमयमत्कु —— दकपंचगव्याकृदुदो काराप्ते हि

ऽनिपावमानीभिः संस्नाप्यान्यवस्त्रैर्धृत्वा दहेत् -- -- माबौधायनः उदक्यासूतिकामृत्यौ नेरे चांद्रायणत्रयं भवति · सूति
कायास्तु मिताक्षरायां · सूतिकायां मृतायां तु कथं कुर्वं -- -- रूप यत्पंचगव्यं क्षिपेत्ततः पुण्यमन्त्रैरपि मन्त्र्याप्यो चा
शाशुद्धिं लभेत्ततः तेनैव स्नापयित्वा तु कुर्यात् यथाविधिः प्रा -- -- नो विशेषः सूतिका तु यदा साध्वी विस्ताना मरणं गता ·
त्रिवर्षपूर्णपर्यंतं रुद्रकृच्छ्रेण सर्वदा सूतिका तु यदा नारी रजसा तु परिप्लुता प्रि -- -- मा नारी द्विवर्षं कृच्छ्रमाचरेत् · इदं द्विनी यमहे ·
सूतिका तु यदा साध्वी विस्ताना मरणं गता · त्रिषष्ठनवदिना दर्वागकालेन विरुद्धानि ॐ ध्वंति सूतिका तु यदा नारी प्राणांश्चोपपूरिश्य जेत् ·
मासमेकावधि यावत् त्रिभिः कृच्छ्रैर्विशुद्ध्यति ॥ ॥ गर्भ ॥ गर्भिणीमृतौ तु मदनरत्ने शौनकः गर्भिण्युदक्यासंस्कारं निशुब्रूसंस्कार
मेव च · प्रवक्ष्यामि समासेन तु शौनकोहं द्विजन्मनां गर्भिणीमरणे प्राप्ते गोमूत्रेण जलैः सह · आपो हिष्ठादिभिर्मंत्रैः प्रोक्ष्य पात्रौ स्मशानं प्रेतं
श्मशानेन नीत्वा पोद्धिख्यारुदन्तः पुत्रमायज्जीवस्य लनं दत्त्वा कुनायतुः यत्नेस्तनः शशायस्पृशाशच्च धर्मे पदादाहयत् · नत्रवधूदग्नीनिम
न्यामृताया दक्षिणपार्श्वे स्तरेनिधाय स्य तस्या नाभिरं प्रा सव्यमुदरं वणुं गुलौ हिरण्यगर्भः समवर्त्ततमिति छित्वा गर्तस्थ्येव प्राणां स्तं प्रक्षाल्यानिरव
नेत्स्यजीवनजीवत्त्वं मम पुत्रके ... त्रियेत्वेति पंचभिः स्नापयित्वा हिरण्यमंत [illegible] मानि धाय चारात्तेभिरभिमंत्र्य यत्नस्तनः शशा
यदितिस्तनं पाययित्वा भुग्नामेभ्यामय · दरुख्केरनायुधायेति पंचाहुतीर्हुत्वा प्राणाय स्वाहा पृथिव्यै स्वाहेत्यनुक्रमाभ्यां व्याहृत्या चाज्यं
हुत्वा [illegible] मुदरं सूत्रेण -- घृतेनावलिप्य ब्राह्मणायेति तिलानां भूमिं दद्यात् हृदयपोक्तेन कल्पेन दहेत् · बौधायनेन तु शतायुधायेति पंचमो हो
नं तं संयासायायायासविधासायसंयासायोधासायाव्यासाया अत्र शौनकायत्तपतन पत्यै ब्रह्महत्यायै सर्वस्य इति स्वाहांन राकृतयोपाधिकाद्या ग
सकारिकायां

श्रीरामः

यदा गर्भवती नारी सशल्या संस्थिता भवेत् कुक्षिं भित्वा न तत् -- -- सगर्भं दहेनेतस्या वर्णज्येष्ठवधपातकं प्रायश्चित्तं च
रित्वा तु शुद्ध्यति पापकारिणः दग्ध्वा तु गर्भसंयुक्तां चिरवं कृच्छ्रमाचरेत् अथान्वारोहणं स्त्रीणामात्मनो भर्तुरेव च सर्वपापक्ष
यकरं निरयोत्तारणाय च अनेकस्वर्गफलदं मुक्तिदं च तथैव च जन्मांतरे च सौभाग्यधनपुत्रादिरहितं देशकालौ स्मृत्वा अरुंधती
समाचारत्वस्वर्गलोके महीयमानत्वमनुष्यलोकसमसंख्याब्दावच्छिन्नस्वर्गवासभर्तृसहितत्वचतुर्दशेंद्रावच्छिन्नकालिककीडमा
नत्वमातृपितृश्वशुरकुलत्रयपूतत्वब्रह्मघ्नमित्रघ्नकृतघ्नपतिपूतत्वमत्यविरयोगकामा भर्त्रा ज्वलितचितारोहणं करिष्ये अ
नुगमने तु फलं मुक्तिः अन्वारोहणं करिष्ये इत्युक्त्वा हरिद्राकुंकुमांजनादियुतशूर्पाणि सुवासिनीभ्यो दद्यात् मंत्रस्तु लक्ष्मीनाराय
णो देवो बलसत्वगुणाश्रयः गाढसत्वं शरीरे मे ददात्वाशूर्पदानेः परितोषितः सोपस्कराणि शूर्पाणि वायनेः सपुतानि च लक्ष्मीनाराय
णप्रीत्यै सत्वकामा ददाम्यहं अग्नेः समीपमागत्य पंचरत्नानि पल्लवे नीलांजनं तथा बध्वा मुखे मुक्ताफलं न्यसेत् ततोग्निं प्रार्थनं
कृत्वा मंत्रेणानेन निश्चितं स्वाहासंश्लेषनिर्विण्णशर्वगोत्र हुताशन सत्वमार्गप्रदानेन नय मां पत्युरंतिकं ततोग्नावाज्येनाग्न

य तजोधिपतये विघ्ने वेसत्वाधिपतये कालाय धर्माधिपतये पृथिव्यै लोकाधिपतये ऽद्भ्यो रसाधिपात्रीभ्यः वायवे बलाधिपतये काशाय सर्वा
धिपतये कालाय धर्माधिपात्रे ऽद्भ्यः सर्वसाक्षिणीभ्यः ब्रह्मणे वेदाधिपतये रुद्राय श्मशानाधिपतये वहुत्वाग्निं प्रदक्षिणी कृत्य दर्पसमुपलाव
संपूज्य पुष्पांजलिं गृहीत्वाग्निं प्रार्थयेत् । त्वमग्ने सर्वभूतानामंतश्चरसि साक्षिवत् त्वमेव देव जानीषे न विदुर्यानि मानुषाः अनुगच्छा
मि भर्तारं वैधव्यभयपीडिता सत्यमार्गप्रदानेन नयमां भर्तुरंतिकं मंत्रमुच्चार्य त्वनेकैः प्रविशेच्च हुताशनं गौडास्तु इमा नारीरविधवा इति इ
माः पतिव्रताः पुण्याः स्त्रियो पापाः सुशोभनाः सदेभर्तृशरीरेण संविशंतु विभावसुं इति च विप्रः पठेदिसाकुः कातरे तु पुरे प्रेतां तरस्तु तां देवरः शिष्यो
वा उदीर्ष्व इति द्वाभ्यामुत्थापयेत् एतन्मसिम्नामिताक्षरादो नेयः पृथिवीचंद्रोदयस्कांदे अनुव्रजंती भर्तारं गृहात्पितृवनं मुदा पदे पदे श्व
मेधस्य फलं प्राप्नोत्यनुत्तमं यत्वंगिराः या स्त्री ब्राह्मणजातीया मृतं पतिमनुव्रजेत् सा स्वर्गमात्मघातेन नात्मानं न पतिं नयेदिति यच्च व्या
घ्रपात् म्रियते या समं भर्त्रा ब्राह्मणी शोककर्षिता न ब्रह्मगतिमाप्नोति मरणादात्मघातिनीति तत्र पृथक्चितिं समारुह्य न विप्रा गंतुमर्ह
तीति अत्यासां चैव नारीणां स्त्रीधर्मोयं परः स्मृत इत्यस्यानंतरोक्तेः पृथक्चितिस्तु क्षत्रियादिपरा तद्विधिश्रुतेः देशांतरमृतपत्नीसा
ध्वी तत्पादुकाद्वयं निधायोरसि संशुद्धा प्रविशेज्जातवेदसं ऋग्वेदवादात् साध्वी स्त्री न भवेदात्मघातिनी अहाशौचे निवृत्ते तु श्राद्धं

प्राप्नोति शास्त्रवत् इमा नारीरविधवा इति ऋग्वेदवादः अहाशौचमन्वारोहणपरमिति स्मार्ताः निषेधवाक्यानि प्रायश्चित्तार्थमित्यनेन वा सहग
मन x x पुराणीसाकुः अस्थिदोरपलाशादर्वा न पृथक्चितिदोषः अंगत्वेन स्थानपत्यावा शरीरतुल्यत्वात् यच्च ब्रह्मघ्नो वा कृतघ्नो वा मि
त्रघ्नो वा भवेत्पतिः पुनात्यविधवा नारी तमादाय मृता तु या इति हारीतीयं तस्य ततदाहादि निषेधेन सहगमनस्य दूरापास्तत्वादर्थवादमात्रमिति पृथ्वी
चंद्रः जन्मांतराय पापवतः सहमरणेनोद्धार इति स्मार्तगौडाः शुद्धितत्त्वे व्यासः दिनैकमन्यदेशस्था साध्वी चेत्कृतनिश्चया न दह्येत्तावदभिनं तस्या या
वदागमनं भवेत् तत्रैव भविष्ये तृतीयेह्नि उदक्यायां मृते भर्तरि वै द्विजाः तस्यास्तु मरणार्थाय स्थापयेदेकरात्रकं एकां चितां समासाद्य भर्तारं यानुगच्छ
ति तद्भर्तुर्यः क्रियाकर्ता स तस्यास्त्रक्रियां चरेत् एतद्दशाहांतं यश्चाग्निदाता प्रेतस्य पिंडं दद्यात्स एव हि इति वायवीयोक्तेः आपस्तंबः चिति
भ्रष्टा तु या नारी मोहाद्विचलिता भवेत् प्राजापत्येन शुध्येत तस्मा हि पापकर्मणः तथा अन्वारोहेकृते पत्न्याः पृथक्पिंडो स्तिलांजलीन् पृ
थक्छीलेन कुर्वीत दद्यादेवं शितिं तथा अन्यत्राप्युक्तं इदं गर्भिणी बालापत्या सूतिका रजस्वला व्यभिचारिणी भिन्नकार्या स्वैरिणी नापतितानां
चैवाधितां नास्तिपत्याग्निसंवेश्यपति तौ ह्रितथाकुसाविति मदनरत्ने स्मृतिसंग्रहोक्तेर्बृहस्पतिः बालसंवर्धनं मुक्त्वा बा x x सूतिकानां x लापत्या
न गच्छति व्रतोपवासनियता रक्षेत्कुंभे च गर्भिणी तृतीयपादे रजस्वला सूतिका चेति पृथ्वीचंद्रोदये गौडीय शुद्धितत्त्वे च पाठः तत्रैव बृहन्ना

रदीयेपि बालापत्याश्चगर्भिण्याश्चादृष्टर्तवस्तथा रजस्वलाराजसुतेनारोहंतिचितांसुतइति अत्रिः पतिव्रतासंप्रदीप्तंप्रविशेद्या हुताशनंमितिभा
रताद्दग्वेदात् साध्वीस्त्रीतिश्रावलाञ्च पतिव्रतानामेवाधिकारोनदुर्वृत्तानां यत्तु अवमत्यचयाःपूर्वंपतिंदुष्टेनचेतसा वर्त्ततेयाश्चसततंभर्तृणांप्रति
कूलतः तत्रानुमरणंकालेयाःकुर्वंतितथाविधाः कामात्क्रोधात्भयान्मोहात्सर्वाएवाभवस्कृतेतिभारते तत्कैमुतिकन्यायेनस्तावकमितिपृथ्वी
चंद्रेः ब्राह्मण्याएकचितिरेवनपृथक्चितिः क्षत्रियादीनांपृथगेकावेतिकल्पतरुरत्नाकरमदनपारिजातादयः शुद्धिचिंतामणौचैवं तत्रान्वारो
हणेभर्त्राशौचमध्यतदूर्ध्वंवाकृतेत्रिरात्रमध्यएवदशपिंडाः सहगमनेतु भर्त्राशौचेतुल्यमाशौचंपिंडदानंच अन्वितायाःप्रदातव्यादशपिंडा
न्वारोहणेतु साम्यशौचेव्यतीतेतुतस्याःश्राद्धंप्रदीयतइतिशुद्धितत्वेशूलपाणौचैवंपैठीनसिस्मृतेः संश्चितंपतिमालिंग्यप्रविशेद्याहुताश
नं तस्याःपिंडादिकंदेयंक्रमशःपतिपिंडवदितिजनकशूलपाणिः शुद्धितत्वेधृतत्र्यक्षेपकेश्च अन्यत्वाशुक्तं पदानुरजस्वलाकाचिम्मतेप
श्चादेशकालवशात्तदेवानुगच्छतिनशुद्धिंप्रतीक्षतेतत्रविधिः देवयाज्ञिकनिबंधे यदास्त्रियामुदक्यायांपतिःप्राणान्समुत्सृजेत् द्रोणमे
कंतंडुलानामवहन्याद्विशुद्धये मुसलाघातैस्तदस्पृक्स्रवतेयोनिमंडलात् विरजस्कामन्यमानस्त्वेचिंतेतदस्पृक्क्षयं दृष्ट्वाशौचंप्रकुर्वी
तपंचम्यांतिकयापृथक् त्रिंशाद्विंशतिदशचमावोदत्वावह्निःक्रमात् विधानात्तवचनात्छुद्धासमारोहेद्धुताशनं नारीणांसरजस्कानामि

यंशुद्धिरुदाहृता। अत्रश्राद्धादौनिर्णयःपूर्वमुक्तः इतिभट्टकमलाकरकृते निर्णयसिंधौ अंत्यकर्मनिर्णयः सहगमन
विधिनिर्णयः अग्निप्रवेशाशक्तौतु विष्णुः मृतेभर्तरिब्रह्मचर्यंतदन्वारोहणंवेति ब्रह्मवैवर्त्ते सहानुगमनंशस्तंवैधव्य
स्याप्यपालनं यत्तु तत्रैव कलौनान्योगतिःस्त्रीणांसहानुगमनादृतेइति तद्ब्रह्मचर्याशक्यत्वपरं तथाचमनुः ब्रह्मचर्यं
चरेद्वापिप्रविशेद्वाहुताशनं काशीखंडेपि पत्यौमृतेपियायोषित् वैधव्यंपालयेत्क्वचित् सापुनःप्राप्यभर्तारंस्वर्गलो
कंसमश्नुते अनुयातिनभर्तारंयदिदैवात्कथंचन तत्रापिशीलंसंरक्षेच्छीलभंगात्पतत्यधः तद्वैगुण्यादपिस्वर्गात्पति
पतृतिनान्यथा। तस्याःपिताचमाताचभ्रातृवर्गस्तथैवच अथविधवाधर्माः मदनरत्नेस्कांदे विधवाकबरीबंधो
भर्तृबंधायजायते शिरसोवपनंतस्मात्कार्यंविधवयासदा। एकाहारःसदाकार्योनद्वितीयःकदाचन मासोपवासंवा
कुर्याच्चांद्रायणमथापिवा। पर्यंकशायिनीनारी विधवापातयेत्पतिं नैवांगोद्वर्तनंकार्यंस्त्रिया विधवयाक्वचित् गं
धद्रव्यस्यसंभोगोनैवकार्यस्तथापुनः तर्पणंप्रत्यहंकार्यंभर्तुस्तिलकुशोदकैः तत्पितुस्तत्पितुश्चापि नामगोत्रादि
पूर्वकं इदमपुत्रापरमितिमदनपारिजातः नाधिरोहेदनड्वाहं प्राणैः कंठगतैरपि कंचुकंनपरीदध्याद्वासोनविकृतं

वसेत् वैशाखकार्त्तिके माघविशेषनियमांश्चरेत् नारदीयप्रचेताः तांबूलाभ्यंजनं चैव कांस्यपात्रे च भोजनं यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत् श्राद्धादौ तु विशेषः प्रागुक्तेन यत्तु बोधायनः संवत्सरं प्रेतपत्नी मधु मांसं विवर्जयेत् । अधःशयीत षण्मासानिति मोदकृत्यभाषितमिति तद्दुसवर्णापरमित्यपराके अथ संन्यासः याज्ञवल्क्यः वनाद्गृहाद्वा कृत्वेष्टिं सार्ववेदसदक्षिणां । प्राजापत्यां तदंते तानग्नीनारोप्य चात्मनि अधीतवेदो जपकृत्पुत्रवानन्नदोग्निमान् शक्त्या च यज्ञकृन्मोक्षे मनः कुर्यात्तु नान्यथा एतदाश्रमसमुच्चयपक्षे जाबालश्रुतौ त्वन्येपि पक्षा उक्ताः यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वा वनाद्वा अथ पुनरव्रती वा व्रती वा स्नातको वाऽस्नातको वा उत्सन्नाग्निरनग्निको वा यदहरेव विरजेत्तदहरेव प्रव्रजेदिति अंगिराः प्रव्रजेद्ब्रह्मचर्याद्वा प्रव्रजेच्च गृहादपि वनाद्वा प्रव्रजेद्विद्वानातुरो वाथ दुःखितः आतुरो मुमूर्षुः दुःखितश्चोरव्याघ्रादिभीतः भारते आतुराणां च संन्यासे न विधिर्नैव च क्रिया प्रैषमात्रं समुच्चार्य संन्यासं तत्र पूरयेत् जाबालश्रुतावपि यद्यातुरः स्यान्मनसा वाचा वा संन्यसेदिति अत्र विप्रस्यैवाधिकारः ब्राह्मणाः प्रव्रजंतीति जाबालश्रुतेः आत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेद्गृहादिति मनूक्तेश्चेति विद्या

रण्यादयः वृद्धयाज्ञवल्क्योपि चत्वारो ब्राह्मणस्योक्ता आश्रमाः श्रुतिचोदिताः क्षत्रियस्य त्रयः प्रोक्ता द्वावेको वैश्यशूद्रयोरिति माधवस्तु ब्राह्मणः क्षत्रियो वाथ वैश्यो वा प्रव्रजेद्गृहादिति कौर्मादुक्तेर्वर्णत्रयस्याप्यधिकारः पूर्ववाक्यं तु कलिपायदंडाय निषेधार्थं मुखजानामयं धर्मो यद्विष्णोर्लिंगधारणं राजन्यवैश्ययोर्नेति दत्तात्रेयमुनेर्वचः इति बोधायनोक्तेरिति पक्षांतरमाह तत्त्वं तु कुटीचकादिपरमेतदिति योपि संन्यासं पलपैतृकमिति कलौ निषेधः सोपि त्रिदंडादिपर इत्युक्तं प्राक् स च संन्यासश्चतुर्धेत्याह हारीतः कुटीचको बहूदको हंसश्चैव तृतीयकः चतुर्थः परमो हंसो यो यः पश्चात्स उत्तमः आद्यः पुत्रादिना कुटीं कारयित्वा तत्र गृह एवावसन् काषायवासाः सशिखोपवीतस्त्रिदंडवान् बंधुषु स्वगृह एवाभुंजान आत्मज्ञो भवेत् एतद्संताशक्तपरं द्वितीयस्तु बंधून्हित्वा सप्तागाराणि भैक्ष्यं चरन् पूर्वोक्तवेषः स्यात् हंसस्तु पूर्वोक्तवेषोप्येकदंडः एकं तु वैणवं दंडं धारयेन्नित्यमादरादिति स्कांदात् विष्णुरपि यज्ञोपवीतं दंडं च वस्त्रं जंतुनिवारणं तावन्परिग्रहः प्रोक्तो नान्यो हंसपरिग्रहः चतुर्थोपि स्कांदे परहंसस्त्रिदंडं च रज्जुं गोवालनिर्मितं शिखां यज्ञोपवीतं च नित्यकर्म परित्यजेत् अयमप्येकदंड एव यत्तु शिखोपवीतादित्यागनिषेधास्ते कुटीचकादिपराः यत्तु मेधातिथिः

नि॰ क॰ ३

यावन्तस्युस्त्रयो दंडास्तावदेकेन वर्जयेदिति तदपि तत्परमेव यच्च माधवः चतुर्धा भिक्षवः प्रोक्ताः सर्वे चैव त्रिदंडिन इति त
द्वाग्दंडादिपरं न यष्टिपरं वाग्दंडोऽथ मनोदंडः कर्मदंडस्तथैव च यस्यैते नियता दंडाः स त्रिदंडीति चोच्यत इति मनूक्तेः तस्मात्प
रमहंसस्यैकदंड एव सोऽप्यविदुषः विदुषस्तु सोऽपि नास्ति न दंडं न शिखां नाच्छादनं चरति परमहंस इति महोपनिषदुक्तेः
ज्ञानमेवास्य दंड इति वाक्यशेषाच्च यत्तु यमः काष्ठदंडो धृतो येन सर्वाशी ज्ञानवर्जितः स याति नरकान्घोरे कर्मस्था
गासोतांतिते इति स्मृतेः यच्चाश्वमेधिके एकदंडी त्रिदंडी वा शिखी मुंडी तथैव वा काषायमात्रसारोऽपि यतिः पूज्यो यु
धिष्ठिरेति तस्यापि पूर्वोक्ता व्यवस्था ज्ञेया अथ तद्विधिः बोधायनः कृत्वा श्राद्धानि सर्वाणि पित्रादिभ्योऽष्टकं पृ
थक् वापयित्वा च केशादीन्मार्जयेन्मातृकादिमाः सर्वाण्येतीति स्वस्त्ययनं श्राद्धं षोडशश्राद्धादिकं स्वयं स्मृत्यर्थ
सारेऽपि एकोद्दिष्टविधानेन कुर्याच्छ्राद्धानि षोडश अग्निमान्पार्वणेनैव विधिना निर्वपेत्स्वयमिति कात्यायनः कृच्छ्रां
स्तु कुर्यात्कृत्वा पावनार्थमनाश्रमी आश्रमी चेत्तप्तकृच्छ्रं तेनासौ योग्यतां व्रजेत् बोधायनः सदैवमार्षकं दिव्यं पि
त्र्यं मातृकमानुषे भौतिकं चात्मनः श्राद्धे तु अष्टौ श्राद्धानि निर्वपेत् अत्र क्रममाह हेमाद्रौ शौनकः देवश्राद्धे ब्रह्मविष्णु

महेश्वरा देवताः आर्षे देवर्षिब्रह्मर्षिक्षत्रर्षयः देवर्षिक्षत्रर्षिमनुष्यर्षयो वा मरीच्यादि। मनुष्य इति संन्यासपद्धतौ दिव्ये च
वसुरुद्रादित्याः मानुषे सनकसनंदनसनातनाः भूतश्राद्धे पितृव्यादिभूतानि चक्षुरादिकरणादि चतुर्विधो भूतग्रामश्चेति ति
स्रः पित्र्ये पित्रादित्रयं मातामहाश्च मातृके मात्रादयस्तिस्रः आत्मश्राद्धे आत्मपितृपितामहा देवताः आत्मश्राद्धं परमा
त्मदेवत्यमिति संन्यासपद्धतौ सर्वत्र नांदीमुखत्वं विशेषणं ज्ञेयं सर्वत्र पिंडदानं युग्मा विप्राः दक्षक्रतुसंज्ञौ वा वि
श्वेदेवौ अन्यन्नांदीश्राद्धवदिति हेमाद्रिः स्मृत्यर्थसारे केशश्मश्रुलोमनखानि वापयित्वोपकल्पयेत् दंडं जलपवि
त्रं च शिक्यं पात्रं कमंडलुं आसनं कौपीनमाच्छादनं कंथां पादुके इति दश पंच वा एतच्च पूर्वेद्युर्नांदीमुखं कृत्वा परेद्युः पुण्या
हवाचनं कृत्वा कार्यमिति शौनकः बोधायनः त्रीन्दंडानंगुलीस्थूलान्वैणवान्मूर्धसंमितान् एकादशनवद्वित्रि
चतुःसप्तान्यपर्वकान् वेष्टितान्कृष्णगोवालरज्ज्वा तु चतुरंगुलान् एको वा तादृशो दंडो गोवालसदृशो भवेत् अन
ग्निरग्निमुत्पाद्य नित्येन विधिना ततः इष्ट्यादिविधानेनेत्यर्थः स्वाग्नावेवाग्निमान्कुर्यादपवर्गोऽक्रमादिति आ
ज्यं पयो दधीत्येतत्त्रिवृद्द्वा जलमेव वा ओं भूरित्यादिना प्राश्य रात्रिं चोपवसेत्ततः अथादित्यस्यास्तमया स्रुवमग्नी

नि॰ क॰ ३

नवित्हस्य सः आज्यमग्नो गार्हपत्ये संस्कृत्यैतेन चरुं कृत्वा पूर्णयाहवनीयेतु जुहुयात्स्रुवेण वनतत ब्रह्मान्वाधानमेतत्स्याद
ग्निहोत्रं हुत्वा ततः संस्तीर्य गार्हपत्यस्य दर्भानुत्तरतो त्रतु पात्राण्यासाद्य दर्भेषु ब्रह्मापतन एवतु आग्नेय्या रात्रिमेतां
तुयावद्ब्राह्मो मुहूर्तकः अग्निहोत्रं स्वकाले तु हुत्वा प्रातस्तनं ततः इष्टिं वैश्वानरीं कुर्यात्प्राजापत्यामथापि वा जाबाल
श्रुतौ तदु है के प्राजापत्यामेवेष्टिं कुर्वंति तदु तथा न कुर्यादाग्नेयीमेव कुर्यात्सम्ब्रैवान्वेधातवीयामेव कुर्यादित्युक्तं तेनात्रवि
कल्पः अत्राहुः त्रेताग्नेः प्राजापत्या तद्वा कश्यशेषाग्नीनिति बहुत्वकृताः एकाग्नेर्योति अनाहिताग्नेरिष्टिस्थाने वैश्वान
रः आग्नेयो वा चरुरिति माधवः कात्यायनः आत्मन्यग्नीन्समारोप्य वेदमध्यासितं हरिं ध्यात्वा हृदि त्वनुज्ञातो गुरु
णा प्रैषमीरयेत् कपिलः विधिवत्प्रैषमुक्त्वाथ त्रिरुपांशु त्रिरुच्चकैः अभयं सर्वभूतेभ्यो मत्तः स्वाहा त्यपो भुवि निनीय
दंडशिक्यातुपात्रं व्याहृतिभिस्तथा गृहीत्वाथ बहिर्व्रजेत् बौधायनः सखे मे त्याहिनादंडं येन देवाः पवित्रकं यदस्यपा
त्रे शिक्यंतु पात्रं व्याहृतिभिस्तथा युवा स्कवासाः कौपीनं गृहीत्वा बांधवान् त्यजेत् अथ क्रमः अत्र संन्यासेधिकार
सिध्यर्थं स्वस्त्ययनश्राद्धं षोडशश्राद्धं सपिंडनानि साग्निः पार्वणान्यग्नि स्वके द्दिष्टविधिना कृत्वा नाश्रमी चेत्कृ

कृ चतुष्टयमन्यत्तु तत्र कृच्छ्रं कृत्वोदगयने एकादश्यां वा साग्निरमावास्यायां पौर्णमास्यां चतुर्दश्यां यथा पर्वणि प्राजा
पत्यां स्यात्तत्र देशकालौ स्मृत्वा परमहंसाख्यसंन्यासग्रहणं करिष्य इति संकल्प्य गणेशं संपूज्य पुण्याहं वाचयित्वा मातृ
कापूजां वृद्धिश्राद्धं च कृत्वा स्तमयास्त्रा गोपासनं समिध्याहिताग्निस्तु गार्हपत्यं विधुरोग्निहोत्री तु त्रिकांडमंडनोक्त
दिशा कुपत्न्या सह पवमानेष्ट्यंतं पूर्णाहुत्यंतं वा ऽऽधानं कुर्यात् ब्रह्मचारी च लौकिके विधुरश्च वेद्या इतिभिः प्रणवेन वा
ग्निमादाया ग्निरूषसा मिसानीय प्रष्ठादिवीति निधाय तेनैव समिध्य तत्सवितुरित्यादि सवितुर्विश्वानन इति तिस्रः
समिधो भ्यादध्यात् एवमग्नौ सिद्धे कृत्वा पस्यंवर्जं पवनं कृत्वा पयो दधियुतमाज्यमयो वा ॐ भूः सावित्रीं प्रविश
मि तत्सवितुर्वरेण्यमिति प्राश्याचम्य पुनरादाय ॐ भुवः सावित्रीं प्रविशामि भर्गो देवस्य धीमहि इति द्वितीयं ॐ
स्वः सावित्रीं प्रविशामि धियो यो नः प्रचोदयात् इति तृतीयं समस्तया चतुर्थं ॐ भूर्भुवः स्वः सावित्रीं प्रविशामि
तत्सवि॰ यात् इति संन्यासपद्धतौ तु विरजसीति प्रथमः प्ररदसीति द्वितीयं विरजसीति तृतीयं प्राश्यापः पुन
स्त्विति जलं प्राश्य सावित्रीप्रवेश उक्तः ततआहवनीयं विहृत्य ब्रह्माणमुपवेश्याज्यं संस्कृत्य चतुर्गृहीतं वार

नि॰ क॰ ३.

हुत्वा समिद्भिर्वा ॐ स्वाहा परमात्मन इदमिति हुत्वोपवसेत् ततः सायं होमं वैश्वदेवं च कृत्वा गुरु दक्षिणानां तीर्थदं
डादीनि दश पंच वा साद्य ब्रह्मासने कृष्णाजिनोपविष्टो रात्रौ जागरं कृत्वा प्रातर्होमानंतरं प्राजापत्यां वैश्वानरीं वा कृ
त्वा सात्विभ्यः सर्वस्वं ब्रह्मणे च मधुपूर्णं तैजसपात्रं दत्त्वा दारुपात्राण्याहवनीये श्ममन्मयानि चाज्जले क्षिपेत्
कृष्णाजिनं त्वाददीत अनाहिताग्निस्तु वैश्वानरमाग्नेयं वा चरुं कृत्वा पात्राण्यग्नौ क्षिप्त्वा भूर्भुवः स्वरित्यपः स्पृष्ट्वा
तरत्समंदीति जप्त्वा विप्रान्संभोज्य पुण्याहं वाचयित्वा स्ववाचनं कृत्वा हेमरूप्य कुलजले स्नात्वा पुरुषाय चरुं कृत्वा प्रा
णाय स्वाहेति पंचाज्याहुतीर्हुत्वा पुरुषसूक्तेन प्रत्यृचमाज्यं चरुं च जुहुयात् अत्र विरजाहोमं केचित् आहुः यथो
क्तं शिवगीतासु कं जुहुयाद्विरजामंत्रैः प्राणापानादिभिस्ततः अनुवाकांतमेकाग्रः समिदाज्यचरून्पृथक् आ
त्मन्यग्नीन्समारोप्य याते अग्ने इति मंत्रतः भस्मादाय ग्निरित्याद्यैर्विमृज्यांगानि संस्पृशेत् पापैर्विमुच्यते सद्यो मुच्य
ते न संशयः यथा प्राणापानव्यानोदानसमाना मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा सर्वत्र लिंगो
क्तदेवतास्यिस्त्यागः वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणरेतोबुध्याकूतिः संकल्पा मे शुध्यंतां ज्योतिः ० त्वक्चर्ममांस

रुधिरमेदोमज्जास्नाय्वस्थीनि मे शुध्यंतां ज्योतिः ० शिरःपाणिपादपार्श्वपृष्ठोरूदरजंघशिश्नोपस्थपायवो मे शुध्यंतां ज्योतिः ० श
ब्दस्पर्श॰परसगंधा मे शुध्यंतां ज्योतिः मनोवाक्कायकर्माणि मे शुध्यंतां ज्योतिः अव्यक्तभावैरहंकारैर्ज्योतिः ० आत्मा मे शुध्यतां ज्यो० अंत
रात्मा मे शुध्यतां ० परमात्मा मे शुध्यतां अन्नमयप्राणमयमनोमयविज्ञानमयानंदमयपरमात्मा मे शुध्यतां ज्योतिः क्षुधे स्वाहा ० क्षु
त्पिपासाय स्वाहा विविधे स्वाहा ऋग्विधानाय स्वाहा कषोत्काय स्वाहा क्षुत्पिपासामलं ज्येष्ठामलक्ष्मीं नाशयाम्यहं अभूति
मसमृद्धिं च सर्वान्निर्णुद मे पाप्मानं स्वाहेति ततः स्विष्टकृदादि हुत्वा ब्रह्मणे हिरण्यमाज्यपात्रं धेनुं च दत्त्वा समासिंचत्त्विस्रुपति
ष्ठेत अत्र केचिदनग्नेः सावित्रीप्रवेशं पूर्णाहुतिं ततो याते अग्ने यज्ञियातनूरिति त्रिस्त्रिरेकैकं जिघ्रन्नात्मन्यग्नीन्समारोप्य गु
रवे सर्वस्वं दत्त्वा यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ०
इत्युपस्थाय दक्षिणं जान्वाच्य पादानुपसंगृह्याधीहि भगवो ब्रह्मेति वदेत् ततो गुरुरात्मानं ब्रह्मस्वरूपं ध्यात्वा शंखद्वादश
प्रणवैरभिमंत्र्य तेन शिष्यमभिषिंच्य शंनोमित्र इति शांतिं पठित्वा तच्छिरसि हस्तं दत्त्वा पुरुषसूक्तं जप्त्वा मम व्रते हृदयं ते
दधामीति जप्त्वा दक्षुरवः प्रणवार्थमनुसंदधन्दक्षिणे कर्णे प्रणवमुपदिश्य तदर्थं च पंचीकरणाद्यवबोध्य अयमात्मा ब्र

सतत्त्वमसि प्रज्ञानं ब्रह्मेत्याद्युपदिशेत् तदर्थं च वदेत् ततो नापदध्यात् ततः शिष्यः तेनोपदिष्टो हरिं स्मरन्नूर्ध्वबाहुस्तिष्ठन्देवा
न्साक्षिणः कृत्वा ॐ भूर्भुवः स्वः संन्यस्तं मयेति त्रिरुपांशु त्रिरुच्चैश्चोक्त्वा जलसमीपं गत्वा स्नात्वा अभयं सर्वभूतेभ्यो मत्तः स्वाहेति
त्रिरंजलीन्क्षिप्त्वा युवा सुवासा इति काषायकौपीनवासश्च परिधाय सखा मा गोपायेति मुख्यं वैणवं पालाशं बैल्वमौदुंबरं वा
दंडं गृह्णीयात् अपुत्रकामो हि गृहस्थः शंखेन पुरुषसूक्तेन दंडमभिषिच्य दद्यादित्याचारः ततः शिखामुत्पाट्य ॐ भूः स्वाहेत्य
प्सो जले वा कृत्वा तथैवोपवीतं कृत्वा येन देवाः पवित्रेणेति जलपात्रं षट्स्यपार इति शिक्यं सावित्र्या कमंडलुं समस्तव्याहृतिभिर्भोज
नपात्रमिदं विष्णुरित्यासनं वृशीं वा गृहीत्वा ॐ भूस्तर्पयामीति व्यस्तसमस्ताभिर्महर्नम इति तर्पयित्वा ॐ भूः स्वधा भुवः स्वधा स्वः स्व
धा भूर्भुवः स्वर्महर्नमः स्वधेति पितॄंस्तर्पयित्वा उदुत्यं चित्रं तच्चक्षुः हंसः शुचिषन्मामित्रस्येति सृभिस्त्वा सुरभिमतीभिरापो हि ष्ठेति
हिरण्यवर्णाभिः पावमानीभिः व्याहृतिभिश्च मार्जयित्वाष्टोत्तरशतमघमर्षणं प्राणायामांश्च कृत्वा ॐ भूर्भुवः स्वरिति पठित्वा
नमः सवित्र इति सूर्यमुपस्थाय पुनः स्नानं जंघे प्रक्षालयित्वा ॐमिति ब्रह्मोमिति पदं सर्वमोमिति ब्रह्म वा एषं ज्योतिष

एष तपति वेयमेवैतद्य एवं वेदाय त्वनमस्तीति जपित्वा सहस्रं गायत्रीं जपेदिति ॥ अथ यतिधर्माः प्रातरुत्थाय ब्रह्मणस्पतेरिति जपि
त्वा दंडादीन्निमदं निधाय मूत्रपुरीषयोरुत्सर्गं कृत्वा चतुर्गुणं शौचं कृत्वाचम्य पूर्ववद्द्वादशीवर्ज्यं प्रणवेन दंतधावनं कृत्वा तेनैव मृदा बहिः कटिं प्रक्षा
ल्य जलतर्पणवर्जं स्नात्वा पुनर्जंघे प्रक्षाल्य वस्त्रादीनि गृहीत्वा मार्जनांतं कृत्वा केशवादिनमोंतनामभिस्तर्पयित्वा ॐ भूस्तर्पयामीत्यादि
व्यस्तसमस्तव्याहृतिभिर्महर्जनस्तर्पयामीति तर्पयेत् ॐ भूः स्वाहेति स्वाहाशब्दांतैः स्वधाशब्दांतैश्चैभिरेव पुनस्तर्पयेदिति केचि
त् ततः आचम्यांजलिना प्रणवेन जलमादाय व्याहृतिभिरुद्धृत्य गायत्र्या त्रिः क्षिप्त्वा गायत्रीं जपेत् उदिते सूर्ये प्रणवेन व्याहृतिभिर्वा त्रि
र्दत्त्वा मित्रस्य चर्षणीत्यादि पूर्वोक्तसौरीभिरिदं विष्णुस्त्रिर्देवो ब्रह्मजज्ञानमिति चोपस्थाय सर्वभूतेभ्यो नम इति प्रदक्षिणमावर्तेत
ततो नत्वा आदित्याय विद्महे सहस्राक्षाय धीमहि तन्नः सूर्यः प्रचोदयादिति त्रिर्जपेत् एवं त्रिकालं विष्णुपूजां मंत्रयज्ञं च कुर्या
त् अथ भिक्षा विधूमे सन्नमुसले व्यंगारे भुक्तवज्जने काले परान्ने भूयिष्ठे नित्यं भिक्षां यतिश्चरेत् इत्युक्ते काले उद्वयमिति वा ततः सौरा
दित्यमुपस्थायैक्यं ध्यात्वा कल्मेनेति प्रदक्षिणं कृत्वा येत पंथान इति जपित्वा योऽसौ विश्वाख्य आदित्ये पुरुषोऽन्तर्हृदि स्थितिः सोऽहंना

नि·द·प· रायणोदेवः इति आत्वा प्रणम्य तां त्रिदंडं दक्षिणेत्वंगे ततः संध्याय बाङ्क्ना पात्रं वामकरे क्षिप्त्वा [illegible] दक्षिणेनत्विति बौधायनोक्तदिशा त्रीन्संच
समन्वागत्य नागत्वा भवत्सु वा भिक्षां याचित्वा पूर्णमसि पूर्णं मे भूया इत्यागत्य शुचिः रन्नं प्रोक्ष्य ॐ भूः स्वधा नमः इत्यादि व्यस्त समस्त व्याहृतिभिः
सूर्यादिदेवेभ्यो भूतेभ्यश्च बलीन्क्षिप्त्वा भुक्त्वा प्रणवेन षोडश प्राणायामान्कुर्यादिति संक्षेपः गौतमव्याख्यायां मनुः यतिहस्ते जलं दत्वा भै
क्षं दद्यात्पुनर्जलं भैक्षं पर्वतमात्रं स्यात्तज्जलं सागरोपमं अत्र सर्वत्र मूलं माधवपरार्कमदनरत्नस्मृत्यर्थसारादौ ज्ञेयं कण्वः एकरात्रं व
सेद्ग्रामे नगरे पंचरात्रकं वर्षाभ्योन्यत्र वर्षासु मासांस्तु चतुरो वसेत् जाबालश्रुतौ अन्यागार देवगृह तृणकुटी वल्मीक वृक्षमूल कुलालशा
लाग्निहोत्रगृह नदीपुलिन गिरि कुहर निर्झर स्थंडिलेष्वनिकेतन इति माहे अष्टौ मासान्विहारः स्याद्यतीनां संयतात्मनां एकत्र चतुरो मा
सान्वार्षिकान्निवसेत्पुनः अत्रिः कुले प्रविष्टानां विहारस्तु न विद्यते अत्रिः भिक्षाटनं [illegible] जपं स्नानं ध्यानं शौचं सुरार्चनं कर्तव्यानि षडेतानि सर्व
थान्यपद्वत मंचकं शुक्लवस्त्रं स्त्रीकथा लौल्यमेव च दिवास्वापं च यानं च यतीनां पतनानि षट् आसनं पात्रलोभश्च संचयः शिष्यसंग्रहः
दिवास्वापो वृथाजल्पो यतेर्बंधकराणि षट् दक्षः नाध्येतव्यं न वक्तव्यं न श्रोतव्यं कथंचन याज्ञवल्क्यः यतिपात्राणि मृद्वेणुदार्वलाबुमया


नि द [illegible] नुस्लेऽत्रिः पित्रर्थं कल्पितं पूर्वमन्नं देवादिकारणात् वर्जयेत्तादृशीं भिक्षां परबाधाकरीं तथा बृहस्पतिः न तीर्थवासी नित्यं स्यान्नो
पवासपरो यतिः न चाध्ययनशीलः स्यान्न व्याख्यानपरो भवेत् एतद्वेदार्थभिन्नपरं अत्रिः स्नानं सुरार्चनं ध्यानं प्राणायामो बलिस्तु
तिः भिक्षाटनं जपः संध्या त्यागः कर्मफलस्य च एते यतिधर्मा इत्यर्थः अन्येपि माधवीय मिताक्षरादौ ज्ञेयाः यतिधर्मसमुच्चये न
स्नानमाचरेद्भिक्षुः पुत्रादिनिधने श्रुते पितृमातृक्षयं श्रुत्वा स्नात्वा शुध्यति साम्बरः अथ यतिसंस्कारः स्मृत्यर्थसारे सर्वसंग
निवृत्तस्य ध्यानयोगरतस्य च न तस्य दहनं कार्यं नाशौचं नोदकक्रिया तथा कुटीचकं तु प्रदहेत् पूरयेच्च बहूदकं हंसो जले तु
निक्षिप्य परहंसं प्रपूरयेत् पलाशमूले नदीतीरेन्यत्र वा गंधपुष्पालंकृतशवं वाद्यघोषैर्नीत्वा दंडं ॐ — व्याहृतिभिः खात्वा स
मस्तव्याहृतिभिस्त्रिः आस्यदेशे नारसीये नवघटे पञ्चरत्नोदकं क्षिप्त्वा नारायणः परब्रह्म — — तेनैव संस्नाप्याष्टाक्षरेण वस्त्र
गंधपुष्पधूपदीपान् दत्वा विष्णो हव्यं रक्षस्वेति गर्ते निधाय दंडं विष्णुरिति दक्षिणहस्ते दंडं यदस्य पारेरजस इति सव्ये शिक्यं येन देवाः
पवित्रेणाति मुखे जलपवित्रं सावित्र्योदरपात्रं भूमिश्च [illegible] गुह्ये कमंडलु निधाय [illegible] इति दशहोत्राभिमंत्रयेत् इति वि

निर्णय ३

श्राद्धषटीकायां स्मृत्यर्थसारे च दृष्टकोनकृत्यु यतिं पुरुषसूक्तेन स्नापयित्वा वटं ततः प्रणवेनाष्टवारं च प्रोक्षयेदथ सर्वतः विष्णोर्ह
व्यं रक्षस्वेति यजुषा प्रणवेन च गर्त्ते प्रेतं विनिक्षिप्य चेदं विष्णुर्विचक्रमे इति मंत्रेण दंडं तु दक्षिणहस्तके मूर्धानं भूर्भुवस्स्वरि
त्युक्त्वा शंखेन भेदयेत् गर्त्तं पुरुषसूक्तेन लवणेन प्रपूरयेत् शृगालश्वादिरक्षार्थं सम्यग्गर्त्तं प्रपूरयेत् इति कुटीचकस्य तु दाहः
कार्यः यथा सर्वभागवत कृत्वाग्निं प्रज्वाल्य साग्नेर्दक्षिणाकरे उपावरोह स्ववरोह्य निर्मथ्य वा गर्त्तं चितिं कृत्वा गिनाग्निः समिध्य
तदुत्याग्निं दत्वा सावित्र्या प्रणवेन वा दहेत् ततोऽष्टशतं प्रणवेन नारायणः परं ब्रह्मेति च जप्त्वा सशिरः प्रणवं व्याहृत्य गायत्र्या तस्या
स्थितीर्थे क्षिप्त्वा स्नात्वा नाशुचिः नास्यान्यदौर्ध्वदेहिकं त्रिदंडग्रहणादेव प्रेतत्वं नैव जायते इत्युशनसः स्मृतेः एकादशाहे पार्वणं
तदपि त्रिदंडिनः हंसपरमहंसादीनां पार्वणादि किमपि कार्यं नेति शूलपाणिः श्राद्धचिंतामणौ दत्तात्रेयः एकोद्दिष्टं जलं पि
डमाशौचं प्रेतसत्क्रिया न कुर्याद्वार्षिकादन्यद्ब्रह्मीभूताय भिक्षवे प्रेतक्रियं एकोद्दिष्टनिषेधसिद्धे पुनस्तद्ग्रहणं मासिक
परं तेन तु सार्वणमेव त्रिदंडिनां द्वादशे नारायणबलिः तद्विधिरन्यश्च विशेषः प्रागुक्तः इत्यलं बहुना एवं निरूपितमिदंग
हनं तु धर्मतत्त्वं विचार्य वचनैश्च नयैश्च सम्यक् तद्दोषदृष्टिमपहाय विवेचनीयं विद्वद्भिरित्यविरतं प्रणतोऽस्मि तेषु १

निर्ण ३

मयासह्यासह्यायदिह गदितं मंदमतिना किमेतद्वक्तुं वाध्यवसितुमपि स्वल्पमतिना तदेवं यत्किंचिद्गदितमिह विख्यात
माहिमा विकसतितु पित्रोश्चरणयोः २ योऽभूत्तंत्रगहनार्णवकर्णधारः शास्त्रांतरेषु निखिलेष्वपि म
मेभेत्ता यो वै श्रमः किल कृतः कमलाकरेण प्रीतोऽमुना कुसुमकृत्कलीबुधमकृतः ३ श्रीभट्टरामेश्वरसूरिसूनुः श्रीम
द्नारायणसूरिसूनोः श्रीरामकृष्णस्य सुतः कृतीमं व्यधान्निबंधं कमलाकराख्यः ४ नानानिर्णयचयस्वान्निर्णयसिं
धुः प्रोच्यतां विबुधाः निर्णयसारोऽजवस्त्वा वीणय कमलाकरोप्य कृतः ५ वसुसतुसतुभूमितेगतेब्दे नरपतिविक्रमतोऽथ
यातिरौद्रे तपसि शिववतिथौ समापितोऽयं रघुपतिपादसरोरुहेऽर्पितश्च ६ जगति सकलविद्यासिंधुमुद्दिंद्र नोप
रस तिपरीक्षाप्युज्ज्वलं तं सज्जनानां तदिदं मम निबंधे दूषणं भूषणं वा यदि भवति विदग्धैस्तद्व्यवश्यं विमृश्यं
७ इति श्रीमत्पदवाक्यप्रमाणपारावारीणश्रीमद्रामेश्वरभट्टसूरिसूनुनारायणभट्टसुतविद्वन्मुकुटहीरांकुर
श्रीरामकृष्णभट्टात्मजदिनकरभट्टानुजकमलाकरभट्टकृते निर्णयसिंधौ तृतीयः परिच्छेदः श्रीरस्तु
शके १६९३ खराब्दे जडियानांपुस्तकमिदं



602